ॐ आ नो भद्राःक्क्रतवो यन्तु विश्श्वतोऽदब्ब्धासोऽअपरीता-सऽउद्द्भिदः । देवा नो यथासदमिद्वृधेऽअसन्नप्प्रायुवो रक्षितारो दिवे-दिवे ॥१॥ ॐ देवानाम्भद्रासुमतिर्ऋजूयतान्देवानाछं रातिरभि नो निवर्त्तताम् । देवानाछं सक्ख्यमुपसेदिमा व्वयन्देवा नऽआयुःप्रतिरन्तु जीवसे ॥२॥ ॐ तान्पूर्वया निविदा हूमहे व्वयन्भगम्मित्रमदितिन्दक्ष-मस्त्रिधम् । अर्य्यमणं व्वरुणछ सोममश्श्विना सरस्वती नः सुभगा मय-स्क्करत् ॥३॥ ॐ तन्नो व्वातो मयोभुवातुभेषजन्तन्माता पृथिवी तत्पिता द्यौः । तद्ग्रावाणःसोमसुतो मयोभुवस्त्तदश्श्विना शृणुतन्धिधष्ण्यायु-वम् ॥४॥ ॐ तमीशानञ्जगतस्त्तस्थुषस्पतिन्धियञ्जिन्न्वमवसे हूमहे व्वयम्। पूषा नो यथा व्वेद सामसद्वृधेरक्षिता पायुरदब्ध्धः स्वस्त्तये॥५॥ ॐ स्वस्ति न ऽइन्द्रो व्वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः। स्वस्तिन-स्त्तार्क्ष्योऽअरिष्टनेमिःस्वस्ति नो बृहस्प्पतिर्द्दधातु॥६॥ ॐ पृषदश्श्वा मरुतः पृश्निमातरः शुभंय्यावा नो विदथेषुजग्ग्मयः। अग्ग्निजिह्वा मनवः-सूरचक्षसो विश्श्वे नो देवाऽअवसागमन्निह ॥७॥ ॐ भद्रङ्कर्ण्णेभिः शृणुयाम देवा भद्रम्पश्येमाक्षभिर्य्यजत्राः । स्थिरैरङ्गैस्त्तुष्टुवाछंसस्त्तनू-भिर्व्यशेमहि देवहितं य्यदायुः ॥८॥ ॐ शतमिन्नुशरदोऽअन्तिदेवा यत्रानश्श्चक्क्राजरसन्तनूनाम् । पुत्रासो यत्र पितरो भवन्ति मा नो मद्ध्यारीरिषतायुर्ग्गन्तोः ॥९॥ ॐ अदितिर्द्यौरदितिरन्तरिक्षमदिति-र्म्माता स पिता स पुत्रः । विश्श्वेदेवाऽअदितिः पञ्चजनाऽअदितिर्ज्जातम-दितिर्ज्जनित्त्वम् ॥१०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

0. In Public Domain. Digitization by eGangotri.Funding: M

गणेशस्मरणम् -

श्रीमन्महागणाधिपतये नमः । लक्ष्मीनारायणाभ्यां नमः । उमामहेश्वराभ्यां नमः। वाणीहिरण्यगर्भाभ्यां नमः । शचीपुरन्दराभ्यां नमः। मातृपितृचरणकमलेभ्यो नमः । इष्टदेवताभ्यो नमः । कुलदेवताभ्यो नमः । ग्रामदेवताभ्यो नमः । वास्तुदेवताभ्यो नमः । स्थानदेवताभ्यो नमः। सर्वेभ्यो देवेभ्यो नमः । सर्वेभ्यो ब्राह्मणेभ्यो नमः । ॐ सिद्धिबुद्धिसहिताय श्रीमन्महागणाधिपतये नमः ।

सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः ।
लम्बोदरश्च विकटो विघ्ननाशो विनायकः ।।
धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः ।
द्वादशैतानि नामानि यः पठेच्छृणुयादपि ।।
विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा ।
सङ्ग्रामे सङ्कटे चैव विघ्नस्तस्य न जायते ।।
शुक्लाम्बरधरं देवं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ।।
अभीप्सितार्थसिद्ध्यर्थं पूजितो यः सुरासुरैः ।
सर्वविघ्नहरस्तस्मै गणाधिपतये नमः ।।
सर्वमङ्गलमाङ्गल्ये ! शिवे ! सर्वार्थसाधिके ! ।
शरण्ये ! त्र्यम्बके ! गौरि ! नारायणि ! नमोऽस्तु ते ।।

— इति शान्तिपाठः —

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

0. In Public Domain. Digitization by eGangotri.Funding: M

पञ्चगव्यनिर्माणविधिः

विधिनिर्देश– एक भाग गोमूत्र, आधा भाग गोबर, तीन भाग दूध, दुई भाग दही, एक भाग घ्यू, एक भाग कुशपानी यी सबै क्रमैसित तल लेखिएका मन्त्रहरू पढी तामाका भाँडामा राख्नू । पाएसम्म कैली गाईको गोमूत्र, काली गाईको गोबर, सेती गाईको दूध, राती गाईको दही र माली गाईको घ्यू लिनुपर्छ। नपाएमा पाँचै थोक कैली गाईको लिनू, नपाए जस्तो गाईको पाइन्छ त्यस्तैको लिनू ।

वि.नि. – गन्धद्वारामूले अग्निको ध्यान गर्दै गोबर, **आप्यायस्व०** ले सोमको ध्यान गर्दै दूध, **दधिक्राब्णो०** ले वायुको ध्यान गर्दै दही, **तेजोसि०** ले सूर्यको ध्यान गर्दै घ्यू, **देवस्यत्वा०** ले हरिको ध्यान गर्दै कुशजल भाँडामा राखेपछि **आपोहिष्ठा०** ले होडल्नू अथवा चलाउनू । त्यसपछि **मानस्तोके०** ले पञ्चगव्य मन्त्रेर पहिले शिवजीलाई अर्पण गर्नू र **यत्त्वगस्थितं०** मन्त्रले पञ्चगव्य खानुपर्छ।

गोमूत्रम् – गायत्रीमन्त्रेण ।

गोमयम् – ॐगन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ।।

क्षीरम् – ॐ आप्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम् ।
भवा वाजस्य सङ्गथे ।।

दधि – ॐ दधिक्राब्णो अकारिषञ्जिष्णोरश्वस्य वाजिनः ।
सुरभिनोमुखाकरत् प्रणऽआयूꣳषि तारिषत् ।।

घृतम् – ॐ तेजोसि शुक्रमस्यमृतमसि धामनामासि
प्रियन्देवानामनाधृष्टन्देवयजनमसि ।।

कुशोदकम् –
ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

0. In Public Domain. Digitization by eGangotri.Funding: M

ॐ आपो हिष्ठा मयो भुवस्तान ऊर्जे दधातन । महेरणाय चक्षसे।।

ॐ मानस्तोके तनये मा न आयुषि मा नो गोषु मा नोऽअश्वेषु रीरिषः। मा नो वीरान् रुद्र भामिनो वधीर्हविष्मन्तः सदमित्त्वा हवामहे।।

पञ्चगव्यप्रासनम् – यत् त्वगस्थिगतं पापं देहे तिष्ठति मामके ।
प्राशनात् पञ्चगव्यं तद्दहत्वग्निरिवेन्धनम् ।।

विशेष– *जूठो, सूतक र उपाकर्म आदि नित्य एवं नैमित्तिक कर्महरूमा चोखो हुनका लागि पञ्चगव्य खानुपर्छ । यसमा नानाप्रकारका रोगका कीटाणु नाश गर्ने शक्ति छ । पञ्चगव्यको सेवनले शरीर र मन दुवैको मल नाश हुन्छ र पाप पखालिन्छ ।*

– इति पञ्चगव्यविधिः –

कर्मपात्रसम्पादनम्

विशेष– *स्नानादि नित्यकर्म गरिसकेपछि शुद्ध वस्त्र लगाई आसनमा बसी कर्ताले तीन पटक आचमन गर्नू । त्यसपछि ॐ आधारशक्तये नमः भनेर आफ्नो अगाडि दाहिनेतर्फ भुइँमा फूल, अक्षता राखी त्यसमाथि तामाको भाँडो राखेर तल लेखिएबमोजिम मन्त्रहरू पढी कर्मपात्र सम्पादन गर्नू–*

वि.नि. – कर्ताले सर्वप्रथम आफ्नो आसनमा बसी आचमन गरेर तलका तीन मन्त्रले कर्मपात्र स्थापना गर्नू–

ॐ यद्देवा देवहेडनन्देवासश्चकृमा वयम् ।
अग्निर्मा तस्मादेनसो विश्वान्मुञ्चत्वꣳहसः ।।
ॐ यदि दिवा यदि नक्तमेनाꣳसि चकृमा वयम् ।
वायुर्मा तस्मादेनसो विश्वान्मुञ्चत्वꣳहसः ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

0. In Public Domain. Digitization by eGangotri.Funding: M

ॐ यदि जाग्रद्यदि स्वप्नऽएनांꣳसि चकृमा वयम ।
सूर्यो मा तस्मादेनसो विश्वान्मुञ्चत्वꣳहसः ।।

वि.नि. – त्यसपछि निम्नलिखित मन्त्रले पवित्र र कुश राख्नू–

मन्त्रः – ॐपवित्रेस्थो वैष्णव्यो सवितुर्वः
प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्य्यस्य रश्मिभिः।
देवीरापोऽअग्रे गुवोऽअग्रे पुवोग्रऽइममद्य
यज्ञन्नयताग्रे यज्ञपतिꣳसुधातुं यज्ञपतिन्देवयुवम् ।।

वि.नि. – यो मन्त्रले कर्मपात्रमा जल राख्नू–

ॐ शन्नोदेवीरभिष्टयऽआपोभवन्तुपीतये । शंयोरभिस्त्रवन्तु नः।।

वि.नि. – निम्नलिखित मन्त्रले कर्मपात्रमा चन्दन राख्नू–

ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ।।

वि.नि. – तलको मन्त्रले कर्मपात्रमा जौ राख्नू–

ॐयवोसि यवयास्मद्वेषो यवयारातीः ।

वि.नि. – निम्नलिखित मन्त्रले कर्मपात्रमा तिल राख्नू–

ॐतिलोसि सोमदैवत्यो गोसवो देवनिर्मितः ।
प्रत्नमद्भिः पृक्तःस्वधया पितृँल्लोकान् प्रीणाहि नः स्वाहा ।।

वि.नि. – निम्नलिखित मन्त्रले कर्मपात्रमा अक्षता राख्नू–

ॐअक्षन्नमीमदन्त ह्यवप्रियाऽअधूषत ।
अस्तोषत स्वभानवो विप्रानविष्ठया मती योजान्वीन्द्रते हरी ।।

वि.नि. – तलको मन्त्र पढी कर्मपात्रमा फूल राख्नू–

ॐश्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रेपार्श्वेनक्षत्राणि रूपमश्विनौ व्यात्तम्। इष्णन्निषाणामुम्मऽइषाण सर्वलोकम्म इषाण ।।

वि.नि. – त्यसपछि निम्नलिखित मन्त्र पढेर कर्मपात्रको जलले आफूलाई र यज्ञ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

0. In Public Domain. Digitization by eGangotri.Funding: M

सामग्रीलाई सेचन गर्नू–

ॐअपवित्रः पवित्रो वा सर्वावस्थां गतोपि वा ।
यः स्मरेत् पुण्डकरीकाक्षं स बाह्याभ्यन्तरः शुचिः ।।
ॐपुण्डरीकाक्षः पुनातु ।

सूचना– *यसपछि ॐ अपसर्पन्तु ये भूता० मन्त्र पढी सर्स्यूं, जौ, अक्षता र तिल छर्की भूतोत्सादन गर्नू ।*

– इति कर्मपात्रविधिः –

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

0. In Public Domain. Digitization by eGangotri.Funding: M

पूर्वाङ्गविधिः

प्रयोगः – *यसमा कर्ता भएर काम गर्ने यजमानले अघिल्लो दिन मुण्डन गरी शुद्ध भएर एक छाक हविष्यान्न भोजन, ब्रह्मचर्य धारण, उपवास बस्नुपर्छ। पूर्वाङ्गका दिन विहान शौच, स्नानादि नित्यकर्मबाट निवृत्त भएर शुद्धवस्त्र धारण, यज्ञोपवीत धारण, पञ्चगव्यपान गरी पूजाका सामान ठीक पारेर पूजा मण्डपमा प्रवेश गर्नुभन्दा पहिले द्वारमा* **ॐ द्वारदेवतायै नमः ॐ देहल्यै नमः** *भनेर अलिकति फूल, अक्षता चढाई इष्टदेवताको स्मरण गर्दै मण्डपभित्र पसेर ब्राह्मणलाई प्रणाम गरी* **ॐभूम्यै नमः** *भनेर भूमिस्पर्श गरेर आसनमा बसी पवित्र धारण, आचमन गरी मङ्गलपाठ गर्दै शुभ मुहूर्तमा दियो बाली* **ॐ ह्रीं आधारशक्तिकमलासनाय नमः** *पढी आसनमुनि फूल, अक्षता चढाई तल लेखिएका मन्त्र पढी आसनलाई हातले छोएर मन्त्रनू–*

ॐ पृथ्वि! त्वया धृता लोका देवि ! त्वं विष्णुना धृता ।
त्वं च धारय मां देवि ! पवित्रं कुरु चासनम् ।।

वि.नि.– अब सर्स्यूं, रातो दही, अक्षता, तिल लिएर तलको मन्त्र पढ्दै छर्केर भूतोत्सारण गर्नू–

ॐ रक्षोहणं बलगहनं वैष्णवीमिदमहन्तं बलगमुत्किरामि यं मे निष्ट्यो यममात्यो निचखानेदमहन्तं बलगमुत्किरामि यम्मे समानो यमसमानो निचखानेदमहन्तं बलगमुत्किरामि यम्मे सबन्धुर्यमसबन्धुर्निचखानेदमहन्तं बलगमुत्किरामि यम्मे सजातो यमसजातो निचखानोत्कृत्याङ्किरामि ।।

ॐ अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिताः ।
ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

0. In Public Domain. Digitization by eGangotri.Funding: M

ॐ अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशम् ।
सर्वेषामविरोधेन पूजाकर्म सभारभे ।।

वि.नि.– यसपछि उपवीती भएर शिखाबन्धन, आचमन गरी तीन पल्ट प्राणायाम गर्नू । तीन टुक्रा कुश र दूवो हातमा लिएर तलको मन्त्र पढ्दै सबैतिर मण्डपमा पञ्चगव्य छर्कनू ।

ॐ रक्षोहणो वो बलगहनः प्रोक्षामि वैष्णवान् रक्षोहणो वो बलगहनोवनयामि वैष्णवान्रक्षोहणो वो बलगहनो वस्तृणामि वैष्णवान् रक्षोहणौ वा बलगहनौ पर्य्यूहामि वैष्णवी वैष्णवमसि वैष्णवाः स्थ।।

वि.नि.– भूतोत्सारण एवं भूशुद्धि गरेपछि एकपटक स्वस्तिवाचन गरी दुबै हात जोडेर निम्नलिखित मन्त्रहरू पढी गणेश आदि देवताहरूको स्मरण गर्दै मङ्गलप्रार्थना गर्नू–

मङ्गलप्रार्थना–

ॐ सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः ।
लम्बोदरश्च विकटो विघ्ननाशो विनायकः ।।
धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः ।
द्वादशैतानि नामानि यः पठेच्छृणुयादपि ।।
विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा ।
सङ्ग्रामे सङ्कटे चैव विघ्नस्तस्य न जायते ।।
अभीप्सितार्थसिद्ध्यर्थं पूजितो यः सुरासुरैः ।
सर्वविघ्नहरस्तस्मै गणाधिपतये नमः ।।
शुक्लाम्बरधरं देवं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ।।
सर्वमङ्गलमाङ्गल्ये शिवे ! सर्वार्थसाधिके ।
शरण्ये त्र्यम्बके गौरि ! नारायणि नमोऽस्तु ते ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

0. In Public Domain. Digitization by eGangotri.Funding: M

मङ्गलं भगवान् विष्णुर्मङ्गलं गरुडध्वजः ।
मङ्गलं पुण्डरीकाक्षो मङ्गलायतनो हरिः ।।
लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः ।
येषामिन्दीवरश्यामो हृदयस्थो जनार्दनः ।।
तदेव लग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव ।
विद्याबलं दैवबलं तदेव लक्ष्मीपते ! तेऽङ्घ्रियुगं स्मरामि ।।
शुभारम्भेषु सर्वेषु त्रयस्त्रिभुवनेश्वराः ।
देवा दिशन्तु नः सिद्धिं ब्रह्मेशानजनार्दनाः ।।
विनायकं गुरुं भानुं ब्रह्मविष्णुमहेश्वरान् ।
सरस्वतीं च वन्देऽहं सर्वकामार्थसिद्धये ।।
वक्रतुण्ड ! महाकाय कोटिसूर्यसमप्रभ ।
अविघ्नं कुरु मे देव ! सर्वकार्येषु सर्वदा ।।
ॐ विघ्नवल्लीकुठाराय मङ्गलमूर्तये श्रीगणाधिपतये नमः ।
ॐ गुरुभ्यो नमः, ॐ इष्टदेवताभ्यो नमः ।।

सूर्यायार्घदानम् –

वि.नि.– यसपछि निम्नलिखित मन्त्रहरू पढी चन्दन, अक्षता, जौ, तिल, कुश, दूबो, जल, फूलहरूले युक्त अर्घ सूर्य भगवान्लाई सम्फेर दिनू–

ॐ ध्येयः सदा सवितृमण्डलमध्यवर्ती
नारायणः सरसिजासनसन्निविष्टः ।
केयूरवान् मकरकुण्डलवान् किरीटी
हारी हिरण्मयवपुर्धृतशङ्खचक्रः ।।
ॐ नमः सवित्रे जगदेकचक्षुषे
जगत्प्रसूतिस्थितिनाशहेतवे ।
त्रयीमयाय त्रिगुणात्ममूर्तये
विरञ्चिनारायणशङ्करात्मने ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

0. In Public Domain. Digitization by eGangotri.Funding: M

ॐ एहि सूर्य ! सहस्रांशो तेजोराशे जगत्पते ।
अनुकम्पय मां देव ! गृहाणार्घ्यं दिवाकर ।।

वि.नि.– त्यसपछि आफ्नो आसनमा बसी विधिपूर्वक कर्मपात्र बनाई तीन टुक्रा कुशले कर्मपात्रको जल लिएर तलको मन्त्र पढ्दै आफूलाई र आफ्नो वरिपरिका पूजासामग्रीमा सेचन गर्नू–

ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा
यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ।।
ॐ पुण्डरीकाक्षः पुनातु ।

प्रायश्चित्तगोदानम् –

यसपछि कर्ताले एउटा प्रायश्चित्त गोदान गर्नू । पहिले आचमन गरी गोदानको निमित्त छुट्ट्याइएको रुपियाँलाई आफ्नो अगाडि राखेर तलको मन्त्रले त्यसमा पूजा गर्नू–

गोपूजनमन्त्रः –

ॐ नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ।।
ॐ गवे नमः । ॐ गोप्रत्याम्नायीभूतद्रव्याय नमः ।

वि.नि.– तलको मन्त्रले गाई दिइने ब्राह्मणलाई टीका लगाएर पूजा गर्नू–

ॐ नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ।।
ॐ ब्राह्मणाय नमः ।

वि.नि.– हातमा कर्मपात्रको जल र कुश लिएर गाईलाई छोएर निम्नअनुसार सङ्कल्प गरी सङ्कल्पको कुश जल ब्राह्मणको हातमा दिनू–

सङ्कल्पः – हरिः ॐ तत्सत् ३ ॐ विष्णुः ३ इत्यादि० । ॐ अद्येह अमुकगोत्रः अमुकप्रवरः अमुकशाखान्तर्गतः अमुकवेदाध्यायी अमुक–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

0. In Public Domain. Digitization by eGangotri.Funding: M

शर्मा/वर्मा अहं मम अमुकपुत्रस्य/पुत्र्याः/अन्यस्य अमुककर्मपूर्वाङ्गत्वेन श्रीगणपतिपूजनपूर्वकं विधीयमाने मातृकापूजननान्दीश्राद्धादिकर्मणि कायिकवाचिकमानसिकसकलपापप्रायश्चित्तार्थं तथा च सद्यो देह-विशुद्ध्यर्थम्, इमां गां रुद्रदैवत्यां तत्प्रत्याम्नायीभूतं द्रव्यं रजतखण्डं चन्द्रदेवताकं ताम्रखण्डं श्रीसूर्यदेवताकं द्रव्यान्तरं वा यथानाम-देवताकम्, अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय सुपूजिताय तुभ्यं सम्प्रददे तत्सन्न मम ।

वि.नि.– तलको मन्त्रले गाईको प्रार्थना गर्नू–

गोप्रार्थना–

ॐ कपिले ! सर्वदेवानां पूजनीयासि रोहिणि ।
तीर्थदेवमयी यस्मात् तस्मात् शान्तिं प्रयच्छ मे ।।
ॐ गावो मे अग्रतः सन्तु गावो मे सन्तु पृष्ठतः ।
गावो मे हृदये सन्तु गवां मध्ये वसाम्यहम् ।।

वि.नि.– दानप्रतिष्ठाको द्रव्य लिएर कर्मपात्रको जल, कुश हातमा लिई सङ्कल्प पढी ब्राह्मणलाई दिनू–

दानप्रतिष्ठा–

ॐ अद्येह कृतैतत्प्रायश्चित्तार्थगोप्रत्याम्नायीभूतरजतद्रव्य दानकर्मणः प्रतिष्ठार्थं तत्साङ्गतासिद्ध्यर्थम् इमां दक्षिणां रजतद्रव्यं चन्द्र-देवताकम्, ताम्रखण्डं वा श्रीसूर्यदेवताकम् अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे । तत्सन्न मम ।

वि.नि.– ब्राह्मणले ॐ स्वस्ति भनी लिनू र तलको मन्त्रले यजमानलाई अभिषेक गर्नू –

अभिषेकमन्त्रः–

ॐ द्यौः शान्तिरन्तरिक्षꣳशान्तिः पृथिवी शान्तिरापः शान्तिरोष-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

0. In Public Domain. Digitization by eGangotri.Funding: M

धयः शान्तिर्वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्वꣳ-शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि ।। ॐ सर्वारिष्टशान्तिरस्तु।

ब्राह्मणवरणम् –

वि.नि.– यसपछि पुनः आचमन गरी ब्राह्मणवरण र पुण्याहवाचनलाई चाहिने चन्दन, अक्षता, फूलमाला, दूबो, पान, सुपारी, वस्त्र, आसनी, पञ्चपात्र, औँठी, भेटीहरू सबै अघिल्तिर राखेर त्यसमा पूजा गरी निम्नलिखित सङ्कल्प पढ्नू–

ॐ वरणद्रव्येभ्यो नमः ॐ तत्सत् ३ ॐ विष्णुः ३ ।

ॐ अद्येह अमुकगोत्रः अमुकप्रवरः माध्यन्दिनीयशाखान्तर्गत-शुक्लयजुर्वेदाध्यायी अमुकशर्मा/वर्मा अहं मम अमुकनाम्न्याः पत्न्याः अमुकनाम्नः पुत्रस्य/कुमारस्य/बालकस्य अमुकनाम्न्याः पुत्र्याः/कन्यायाः/बालिकायाः करिष्यमाण अमुककर्मणि अमुककर्मणो निर्विघ्नतया परिसमाप्त्यर्थं च दीपकलशगणेशपूजनपूर्वकं मातृका-पूजाभ्युदयिकश्राद्धादिरूपपूर्वाङ्गकर्म करिष्ये । एतत्कर्मणि यथा-विहितोपयोग्याचार्यादिकर्म कर्तुं, पुण्याहवाचनार्थं च यथानामगोत्रान् यथानामशर्मणो ब्राह्मणान्, एभिश्चन्दनपुष्पाक्षतताम्बूलपूगीफलवासो-द्रव्याभरणादिभिर्युष्मान् वृणे ।

वि.नि.– वरण सामग्रीहरू ब्राह्मणहरूलाई टीका लगाएर दिनू र ब्राह्मणहरूले पनि ॐ वृताः स्मः भन्नू–

यजमानले– ॐ यथाविहितं कर्म कुरुत भनेपछि ब्राह्मणहरूले ॐ करवाम भन्नू ।

पुण्याहवाचनम् –

वि.नि.– यजमानले हात जोडी तल लेखिएको क्रमले पुण्याहवाचनका लागि ब्राह्मणहरूसँग प्रार्थना गर्दै जानू र ब्राह्मणहरूले पनि प्रार्थनाअनुसार क्रमैसित आशीर्वादका मन्त्रहरू पढ्दै जानू–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

0. In Public Domain. Digitization by eGangotri.Funding: M

यजमानः - ॐ अद्येह अमुकगोत्रः अमुकप्रवरः अमुकनामशर्मा/ वर्मा अहं मम करिष्यमाणस्य अमुककर्मणः पूर्वाङ्गकर्मणि मम गृहे भो ब्राह्मणाः पुण्याहं भवन्तो ब्रुवन्तु, पुण्याहं भवन्तो ब्रुवन्तु, पुण्याहं भवन्तो ब्रुवन्तु ।

ब्राह्मणाः - ॐ पुण्याहमस्तु ॐ पुण्याहमस्तु ॐ पुण्याहमस्तु ।
ॐ पुनन्तु मा देवजनाः पुनन्तु मनसा धियः ।
पुनन्तु विश्वाभूतानि जातवेदाः पुनीहि मा ।।१।।

यजमानः - ॐ अद्येह अमुकगोत्रः अमुकप्रवरः अमुकनाम शर्मा/ वर्मा अहं मम करिष्यमाणस्य अमुककर्मणः पूर्वाङ्गकर्मणि मम गृहे भो ब्राह्मणाः स्वस्ति भवन्तो ब्रुवन्तु, स्वस्ति भवन्तो ब्रुवन्तु, स्वस्ति भवन्तो ब्रुवन्तु।

ब्राह्मणाः - ॐ स्वस्ति, ॐ स्वस्ति, ॐ स्वस्ति ।

ॐ स्वस्तिन इन्द्रो वृद्धश्रवाः स्वस्ति नःपूषा विश्ववेदाः । स्वस्ति नस्तार्क्ष्योऽअरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ।।२।।

यजमानः - ॐ अद्येह अमुकगोत्रः अमुकप्रवरः अमुकनामशर्मा/ वर्मा अहं मम करिष्यमाणस्य अमुककर्मणः पूर्वाङ्गकर्मणि मम गृहे भो ब्राह्मणा ऋद्धिं भवन्तो ब्रुवन्तु, ऋद्धिं भवन्तो ब्रुवन्तु, ऋद्धिं भवन्तो ब्रुवन्तु ।

ब्राह्मणाः - ॐ ऋद्धिरस्तु ॐ ऋद्धिरस्तु ॐ ऋद्धिरस्तु ।
ॐ सत्रस्यऽऋद्धिरस्यगन्म ज्योतिरमृताऽअभूम ।
दिवं पृथिव्या अध्यारुहामाविदाम देवान्स्वर्ज्योतिः ।।३।।

यजमानः - ॐ अद्येह अमुकगोत्रः अमुकप्रवरः अमुकनाम शर्मा/ वर्मा अहं मम करिष्यमाणस्य अमुककर्मणः पूर्वाङ्गकर्मणि मम गृहे भो ब्राह्मणा वृद्धिं भवन्तो ब्रुवन्तु वृद्धिं भवन्तो ब्रुवन्तु ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

0. In Public Domain. Digitization by eGangotri.Funding: M

ब्राह्मणः - ॐ वृद्धिरस्तु, ॐ वृद्धिरस्तु, ॐ वृद्धिरस्तु ।

ॐ ज्यैष्ठ्यञ्च मऽआधिपत्यञ्च मे मन्युश्च मे भामश्च मेऽमश्च-मेऽम्भश्च मे जेमा च मे महिमा च मे वरिमा च मे प्रथिमा च मे वर्षिमा च मे द्राघिमा च मे वृद्धञ्च मे वृद्धिश्च मे यज्ञेन कल्पन्ताम् ।।४।।

यजमानः - ॐ अद्येह अमुकगोत्रः अमुकप्रवरः अमुकनाम शर्मा/ वर्मा अहं मम करिष्यमाणस्य अमुककर्मणः पूर्वाङ्गकर्मणि मम गृहे भो ब्राह्मणाः कल्याणं भवन्तो ब्रुवन्तु, कल्याणं भवन्तो ब्रुवन्तु, कल्याणं भवन्तो ब्रुवन्तु ।

ब्राह्मणाः - ॐ कल्याणमस्तु ॐ कल्याणमस्तु ॐ कल्याणमस्तु ।

ॐ यथेमां वाचं कल्याणीमावदानि जनेभ्यः । ब्रह्मराजन्या-भ्याꣳशूद्राय चार्याय च स्वाय चारणाय च । प्रियो देवानां दक्षिणायै दातुरिह भूयासमयं मे कामः समृद्ध्यतामुपमादो नमतु ।।५।।

यजमानः - ॐ अद्येह अमुकगोत्रः अमुकप्रवरः अमुकनाम शर्मा/ वर्मा अहं मम करिष्यमाणस्य अमुककर्मणः पूर्वाङ्गकर्मणि मम गृहे भो ब्राह्मणाः शान्तिं भवन्तो ब्रुवन्तु, शान्तिं भवन्तो ब्रुवन्तु, शान्तिं भवन्तो ब्रुवन्तु।

ब्राह्मणाः - ॐ शान्तिरस्तु ॐ शान्तिरस्तु ॐ शान्तिरस्तु ।

ॐ द्यौः शान्तिरन्तरिक्षꣳशान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः। वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्मशान्तिः सर्वꣳशान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि ।।६।।

यजमानः - ॐ अद्येह अमुकगोत्रः अमुकप्रवरः अमुकनाम शर्मा/ वर्मा अहं मम करिष्यमाणस्य अमुककर्मणः पूर्वाङ्गकर्मणि मम गृहे भो ब्राह्मणाः श्रियं भवन्तो ब्रुवन्तु, 'श्रियं भवन्तो ब्रुवन्तु', श्रियं भवन्तो ब्रुवन्तु ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

0. In Public Domain. Digitization by eGangotri.Funding: M

ब्राह्मणाः – ॐ श्रीरस्तु ॐ श्रीरस्तु ॐ श्रीरस्तु ।
ॐ मनसः काममाकूतिं वाचः सत्यमशीय ।
पशूनाꣳरूपमन्नस्य रसो यशः श्रीः श्रयताम् ।।७।।

वि.नि.– यसपछि तलका मन्त्र पढेर ब्राह्मणले यजमानलाई फूल, प्रसाद लगाइदिनू–

ॐ मन्त्रार्थाः सफलाः सन्तु पूर्णाः सन्तु मनोरथाः ।
शत्रूणां बुद्धिनाशोऽस्तु मित्राणामुदयस्तव ।।
भद्रमस्तु शिवं चास्तु महालक्ष्मीः प्रसीदतु ।
रक्षन्तु त्वां सदा देवा आशिषः सन्तु सर्वदा ।।
ॐ पुण्याहवाचनसमृद्धिरस्तु

– इति पुण्याहवाचनम् –

अर्घस्थापनम्

वि.नि. – यजमान अथवा आचार्यले आसनमा बसी आचमन, प्राणायाम गरी आफ्नो दाहिनेतर्फ भूमिमा कर्मपात्रको जल छर्की त्यसको बीचमा विन्दुसहितको त्रिकोण लेख्नू । त्रिकोण बाटुलो रेखाले घेरी त्यसबाहिर वर्गाकार चतुष्कोण मण्डल बनाई **ॐ आधारशक्तये नमः** भनेर फूल, अक्षता चढाउनू । चारकुने बोहोता अथवा त्रिकुटी राखी जल छर्केर अर्घपात्र स्थापना गरी तल लेखिएको मन्त्रले अर्घपात्रमा जल राख्नु । अनि **सर्वे समुद्रा** मन्त्र पढी अंकुश मुद्राले तीर्थहरूको आवाहन गरी **ॐ गङ्गादितीर्थेभ्यो नमः** भनेर नमस्कार पूजा गरेपछि अर्घपात्रमा कुश, चन्दन, अक्षता, फूल, दूबो, जौ, तिल, सर्स्यूँ एवं फलहरू राखेर निम्नलिखितवचनहरू पढ्दै अर्घपूजा गर्नू । दश पटक ॐ जपेर मन्त्रनू वं भनी धेनुमुद्राले अमृतीकरण, शङ्खमुद्रा देखाई मत्स्यमुद्राले अर्घपात्र ढाक्नु । त्यसबाट अलिकति अर्घ लिएर सबैतिर छर्कनू –

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

0. In Public Domain. Digitization by eGangotri.Funding: M

ॐ आधारशक्तये नमः
ॐ गङ्गे ! च यमुने ! चैव गोदावरि ! सरस्वति ! ।
नर्मदे ! सिन्धु ! कावेरि ! जलेऽस्मिन् सन्निधिं कुरु ।।
ॐ सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः ।
आयान्तु यजमानस्य दुरितक्षयकारकाः ।
ॐ वह्निमण्डलाय दशकलात्मने नमः ।।१।।
ॐ सूर्यमण्डलाय द्वादशकलात्मने नमः ।।२।।
ॐ सोममण्डलाय षोडशकलात्मने नमः ।।३।।

दीपपूजा–

वि.नि. – यसमा पहिले फूल, अक्षताहरू हातमा लिएर तलको मन्त्रले दियोमा आवाहन गर्नू र पूजा गर्नू –

ॐ दीपनारायण इह आगच्छ, इह तिष्ठ, मम/मद्यजमानस्य पूजां गृहाण, यावत् पूजां करोमि तावत् त्वं सुस्थिरो भव, सुप्रसन्नो भव, सुवरदो भव ।

ॐ नमोस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटीयुगधारिणे नमः ।।
ॐ कर्मसाक्षिणे दीपनारायणाय नमः ।

वि.नि. – निम्नलिखित मन्त्र पढी जल, चन्दन, अक्षता, फूल, नैवेद्य, भेटी चढाएर दियो पूजा र प्रार्थना गर्नू–

प्रार्थना– ॐ शुभं भवतु कल्याणमारोग्यं सुखसम्पदः ।
सर्वदुःखविनाशाय दीपज्योतिर्नमोऽस्तु ते ।।

कलशस्थापनम् –

वि.नि. – सर्वप्रथम हातमा फूल, अक्षताहरू लिएर पहिले भूरसि० मन्त्र पढी भूमिमा छुनू, धान्यमसिले धान राख्नू, आजिघ्रले धानमाथि कलश राख्नू,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

. In Public Domain. Digitization by eGangotri.Funding:

वरुणस्योले गङ्गाजल, औषधीले सर्वोषधी, हिरण्यगर्भले पञ्चरत्न, या फलिनीले फल या सुपारी, ओषधयःले जौ, गन्धद्वारांले चन्दन, काण्डात्ले दूबो, स्योना पृथिवीले सात ठाउँको माटो, अश्वत्थले पञ्चपल्लव, बृहस्पतेले कपडा, तत्त्वायामिले कलशको पूजा गर्नू ।

ॐ भूरसि भूमिरस्यदितिरसि विश्वधाया विश्वस्य भुवनस्य धर्त्री।
पृथिवीं यच्छ पृथिवीन्दृꣳह पृथिवीं मा हिꣳसीः ।।१।।

ॐ धान्यमसि धिनुहि देवान्प्राणाय त्वोदानाय त्वा व्यानाय त्वा ।
दीर्घामनु प्रसितिमायुषे धान्देवो वः सविता हिरण्यपाणिः
प्रतिगृभ्णात्वच्छिद्रेण पाणिना चक्षुषे त्वा महीनां पयोसि ।।२।।

ॐ आजिघ्र कलशं मह्या त्वा विशन्त्विन्दवः । पुनरूर्जा निवर्तस्व
सा नः सहस्रन्धुक्ष्वोरुधारा पयस्वती पुनर्मा विशताद्रयिः ।।३।।

ॐ वरुणस्योत्तम्भनमसि वरुणस्यस्कम्भसर्जनी स्थो वरुणस्य ऋत-
सदन्यसि वरुणस्यऽऋतसदनमसि वरुणस्यऽऋतसदनमासीद।।४।।

ॐ या ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा ।
मनैनु बभ्रूणामहꣳशतन्धामानि सप्त च ।।५।।

ॐ हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् ।
स दाधार पृथिवीन्द्यामुतेमां कस्मै देवाय हविषाविधेम ।।

ॐ याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः ।
बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वꣳहसः ।।७।।

ॐ ओषधयः समवदन्त सोमेन सह राज्ञा ।
यस्मै कृणोति ब्राह्मणस्तꣳराजन्पारयामसि ।।८।।

ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ।।९।।

ॐ काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि ।
एवा नो दूर्वे प्रतनू सहस्रेण शतेन च ।।१०।।

lepal Sanskrit University, Balmeeki Campus, Kathmand

0. In Public Domain. Digitization by eGangotri.Funding: M

ॐ स्योना पृथिवि नो भवाननृक्षरा निवेशनी ।
यच्छा नः शर्म सप्रथाः ।।११।।
ॐ अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता ।
गोभाज इत्किलासथ यत्सनवथ पूरुषम् ।।१२।।
ॐ बृहस्पतेऽअति यदर्योऽअर्हाद्द्युमद्विभातिक्रतुमज्जनेषु ।
यद्दीदयच्छवसऽऋतप्रजा तदस्मासु द्रविणन्धेहि चित्रम् ।
उपयाम गृहीतोसि बृहस्पतये त्वैषते योनिर्बृहस्पतये त्वा ।।१३।।
ॐ तत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः ।
अहेडमानो वरुणेह वोध्युरुशꣳसमानऽआयुः प्रमोषीः ।।१४।।

वि.नि. – निम्नलिखित वचनले सपरिवार वरुणको आवाहन गरी तल लेखिएका वाक्य पढी आसनादि षोडशोपचारले पूजा, नमस्कार र प्रार्थना गर्नू–

ॐ साङ्ग सपरिवार वरुण! इह आगच्छ इह तिष्ठ मम/ मद्यजमानस्य पूजां गृहाण यावत् पूजां करोमि तावत् त्वं सुस्थिरो भव, सुप्रसन्नो भव, सुवरदो भव ।

इदमासनम्, पाद्यम्, अर्घ्यम्, आचमनीयम्, पञ्चामृतस्नानम्, शुद्धोदकस्नानम्, वस्त्रम्, गन्धम्, अक्षतान्, सिन्दूरम्, यवतिलान्, पुष्पम्, माल्यम्, धूपम्, दीपम्, नैवेद्यम्, ताम्बूलम्, द्रव्याभरणादीनि च समर्पयामि– 'ॐ साङ्गाय सपरिवाराय सायुधाय सवाहनाय स्वशक्तिसहिताय वरुणाय नमः ।

प्रार्थना– वरुण ! त्वं महाभाग सर्वदेवप्रपूजित ।
वितते मम यज्ञेस्मिन्नविघ्नं कुरु सर्वदा ।।

वि.नि. – निम्नलिखित मन्त्रले कलशमा तीर्थहरूको आवाहन र पूजा गर्नू–

ॐ सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः ।
आयान्तु यजमानस्य दुरितक्षयकारकाः ।।
ॐ गङ्गादिसकलतीर्थेभ्यो नमः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

0. In Public Domain. Digitization by eGangotri.Funding: M

वि.नि. – यसपछि तलको मन्त्रले कलशमा छोएर अभिमन्त्रण गर्नू–

कलशस्पर्शः –

ॐ कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः ।
मूले त्वस्य स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ।।
कुक्षौ तु सागराः सप्त सप्तद्वीपा वसुन्धरा ।
ऋग्वेदोऽथ यजुर्वेदः सामवेदोप्यथर्वणः ।।
अङ्गैश्च सहिताः सर्वे कलशन्तु समाश्रिताः ।।

कलश प्रार्थना–

ॐ देवदानवसंवादे मथ्यमाने महोदधौ ।
उत्पन्नोऽसि तदा कुम्भ ! विधृतो विष्णुना स्वयम् ।।
त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः ।
त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः ।।
शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः ।
आदित्या वसवो रुद्रा विश्वेदेवाः सपितृकाः ।।
त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदाः ।
त्वत्प्रसादादिमां पूजां कर्तुमीहे जलोद्भव ।।
सान्निध्यं कुरु देवेश ! प्रसन्नो भव सर्वदा ।।

गणेशपूजा–

वि.नि. – कर्ताले आसनमा बसेर आचमन गरी तीन टुक्रा कुशसहित कर्मपात्रको जल लिएर पहिले तल लेखिएअनुसार गणेशपूजाको सङ्कल्प गरेर भूईंमा अष्टदल कमलको रेखी बनाएर त्यसमाथि चारकुने टपरी अथवा थाली राख्नू । त्यसपछि हातमा फूल, अक्षताहरू लिएर तल लेखिएका नाममन्त्रहरू पढ्दै पूर्वादिक्रमले अष्टदलकमलको वरिपरि पीठपूजा गर्नू–

हरिः ॐ तत्सत् इत्यादि। अद्येह अमुकगोत्रः अमुकप्रवरः अमुक-शर्मा/वर्मा अहं मम/मद्यजमानस्य वा प्रारिप्सित अमुककर्मनिर्विघ्न-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

0. In Public Domain. Digitization by eGangotri.Funding: M

अ०२५०।

परिसमाप्त्यर्थं तत्पूर्वाङ्गत्वेन यथामिलितोपचारैः श्रीगणपतिपूजनं करिष्ये ।

पीठपूजा–

ॐ तीव्रायै नमः । ॐ ज्वालिन्यै नमः । ॐ नन्दायै नमः । ॐ भोगदायै नमः । ॐ कामरूपिण्यै नमः । ॐ उग्रायै नमः । ॐ तेजोवत्यै नमः । ॐ सत्यायै नमः । ॐ विघ्नविनाशिन्यै नमः । ॐ सर्वशक्तिकमलासनाय नमः ।

वि.नि. – निम्नलिखित मन्त्रले गणेशको ध्यान गरी गणानान्त्वाले आवाहन गर्नू–

ॐ एकदन्तं शूर्पकर्णं गजवक्त्रं चतुर्भुजम् ।
पाशाङ्कुशधरं देवं ध्यायामि श्रीगणाधिपम् ।।

ॐ गणानान्त्वा गणपतिꣳहवामहे प्रियाणान्त्वा प्रियपतिꣳहवामहे निधीनान्त्वा निधिपतिꣳहवामहे वसो मम । आहमजानि गर्भधमात्वमजासि गर्भधम् ।

ॐ भूर्भुवः स्वः गणपते ! सिद्धिबुद्धिसहित साङ्ग सपरिवार सायुध सवाहन इह आगच्छ इह तिष्ठ मम/मद्यजमानस्य पूजां गृहाण, यावत् पूजां करोमि तावत् त्वं सुस्थिरो भव सुप्रतिष्ठितो भव, सुप्रसन्नो भव, सुवरदो भव ।

वि.नि. – यसपछि तल लेखिएअनुसार नाममन्त्र पढेर क्रमैसित प्राप्त उपचारले पूजा गर्नू–

आसनम् – ॐ आसनं समर्पयामि साङ्गाय सपरिवाराय सायुधाय सवाहनाय सिद्धिबुद्धिसहिताय मङ्गलमूर्तये श्रीगणाधिपतये नमः ।

पाद्यम् – ॐ पाद्यं समर्पयामि साङ्गाय सपरिवाराय सायुधाय सवाहनाय सिद्धिबुद्धिसहिताय मङ्गलमूर्तये श्रीगणाधिपतये नमः ।

अर्घ्यम् – ॐ अर्घ्यं समर्पयामि साङ्गाय सपरिवाराय सायुधाय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

. In Public Domain. Digitization by eGangotri.Funding: I

सवाहनाय सिद्धिबुद्धिसहिताय मङ्गलमूर्तये श्रीगणाधिपतये नमः ।

आचमनीयम् - ॐ आचमनीयं समर्पयामि साङ्गाय सपरिवाराय सायुधाय सवाहनाय सिद्धिबुद्धिसहिताय मङ्गलमूर्तये श्रीगणाधिपतये नमः।

पञ्चामृतम् - ॐ पञ्चामृतस्नानं समर्पयामि साङ्गाय सपरिवाराय सायुधाय सवाहनाय सिद्धिबुद्धिसहिताय मङ्गलमूर्तये श्रीगणाधिपतये नमः।

शुद्धोदकम्- ॐ शुद्धोदकस्नानं समर्पयामि साङ्गाय सपरिवाराय सायुधाय सवाहनाय सिद्धिबुद्धिसहिताय मङ्गलमूर्तये श्रीगणाधिपतये नमः।

वस्त्रम् - ॐ वस्त्रं समर्पयामि साङ्गाय सपरिवाराय सायुधाय सवाहनाय सिद्धिबुद्धिसहिताय मङ्गलमूर्तये श्रीगणाधिपतये नमः ।

यज्ञोपवीतम् - ॐ यज्ञोपवीतं समर्पयामि साङ्गाय सपरिवाराय सायुधाय सवाहनाय सिद्धिबुद्धिसहिताय मङ्गलमूर्तये श्रीगणाधिपतये नमः ।

गन्धम् - ॐ गन्धं समर्पयामि साङ्गाय सपरिवाराय सायुधाय सवाहनाय सिद्धिबुद्धिसहिताय मङ्गलमूर्तये श्रीगणाधिपतये नमः ।

अक्षतान् - ॐ अक्षतान् समर्पयामि साङ्गाय सपरिवाराय सायुधाय सवाहनाय सिद्धिबुद्धिसहिताय मङ्गलमूर्तये श्रीगणाधिपतये नमः ।

सिन्दूरम् - ॐ सिन्दूरं समर्पयामि साङ्गाय सपरिवाराय सायुधाय सवाहनाय सिद्धिबुद्धिसहिताय मङ्गलमूर्तये श्रीगणाधिपतये नमः ।

यवतिलान् - ॐ यवतिलान् समर्पयामि साङ्गाय सपरिवाराय सायुधाय सवाहनाय सिद्धिबुद्धिसहिताय मङ्गलमूर्तये श्रीगणाधिपतये नमः ।

पुष्पाणि - ॐ पुष्पाणि समर्पयामि साङ्गाय सपरिवाराय सायुधाय सवाहनाय सिद्धिबुद्धिसहिताय मङ्गलमूर्तये श्रीगणाधिपतये नमः ।

माल्यम् - ॐ माल्यं समर्पयामि साङ्गाय सपरिवाराय सायुधाय सवाहनाय सिद्धिबुद्धिसहिताय मङ्गलमूर्तये श्रीगणाधिपतये नमः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmand

0. In Public Domain. Digitization by eGangotri.Funding: M

आभूषणम्- ॐ आभूषणादिकं समर्पयामि साङ्गाय सपरिवाराय सायुधाय सवाहनाय सिद्धिबुद्धिसहिताय मङ्गलमूर्तये श्रीगणाधिपतये नमः।

धूपम् - ॐ धूपं समर्पयामि साङ्गाय सपरिवाराय सायुधाय सवाहनाय सिद्धिबुद्धिसहिताय मङ्गलमूर्तये श्रीगणाधिपतये नमः ।

दीपम् - ॐ दीपं समर्पयामि साङ्गाय सपरिवाराय सायुधाय सवाहनाय सिद्धिबुद्धिसहिताय मङ्गलमूर्तये श्रीगणाधिपतये नमः ।

नैवेद्यम् - ॐ मोदकादिसहितं नैवेद्यं समर्पयामि साङ्गाय सपरिवाराय सायुधाय सवाहनाय सिद्धिबुद्धिसहिताय मङ्गलमूर्तये श्रीगणाधिपतये नमः ।

फलम् - ॐ इक्षुखण्डादिफलं समर्पयामि साङ्गाय सपरिवाराय सायुधाय सवाहनाय सिद्धिबुद्धिसहिताय मङ्गलमूर्तये श्रीगणाधिपतये नमः।

आचमनीयम् -ॐ आचमनीयं जलं समर्पयामि साङ्गाय सपरिवाराय सायुधाय सवाहनाय सिद्धिबुद्धिसहिताय मङ्गलमूर्तये श्रीगणाधिपतये नमः ।

करोद्वर्तनकम् - ॐ करोद्वर्तनकं समर्पयामि साङ्गाय सपरिवाराय सायुधाय सवाहनाय सिद्धिबुद्धिसहिताय मङ्गलमूर्तये श्रीगणाधिपतये नमः ।

ताम्बूलम् - ॐ ताम्बूलं समर्पयामि साङ्गाय सपरिवाराय सायुधाय सवाहनाय सिद्धिबुद्धिसहिताय मङ्गलमूर्तये श्रीगणाधिपतये नमः ।

दक्षिणा - ॐ दक्षिणार्थं द्रव्यं समर्पयामि साङ्गाय सपरिवाराय सायुधाय सवाहनाय सिद्धिबुद्धिसहिताय मङ्गलमूर्तये श्रीगणाधिपतये नमः ।

वि.नि. - निम्नलिखित मन्त्रहरू पढी गणेशलाई दूबो अर्पण गरेपछि तल लेखिएका नाममन्त्रहरू पढ्दै चन्दन, अक्षतासहित एकएक दूबोका मुन्टा चढाएर पूजा गर्नू-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

. In Public Domain. Digitization by eGangotri.Funding: I

ॐ काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि ।
एवा नो दूर्वे प्रतनु सहस्त्रेण शतेन च ।।

१) ॐ गणाधिप ! नमस्तेऽस्तु-
२) ॐ उमापुत्र ! नमोऽस्तु ते-
३) ॐ अघनाशन ! नमस्तेऽस्तु-
४) ॐ विनायक ! नमोऽस्तुते-
५) ॐ ईशपुत्र ! नमस्तेऽस्तु-
६) ॐ सर्वसिद्धिप्रदायक ! नमोऽस्तु ते-
७) ॐ एकदन्त ! नमस्तेऽस्तु-
८) ॐ इभवक्त्र ! नमोऽस्तु ते-
९) ॐ मूषकवाहन ! नमस्तेऽस्तु-
१०) ॐ मोदकप्रिय ! नमस्तेऽस्तु-
११) ॐ कुमारगुरवे तुभ्यं नमोऽस्तु-
१२) ॐ चतुर्थीश ! नमोऽस्तु ते-

वि.नि. - यसपछि हातमा एउटा सिङ्गो नरिवल वा फल लिएर गणेशजीको अघिल्तिर राखिदिनू र तलको मन्त्र पढी हात जोडेर प्रार्थना गर्नू-

ॐ इदं फलं मया देव स्थापितं पुरतस्तव ।
तेन मे सुफलावाप्तिर्भवेज्जन्मनि जन्मनि ।।

वि.नि. - यसपछि आरतीमा कपूर र बत्ती बालेर तलको मन्त्रले घुमाउँदै नीराजन गर्नू-

ॐ चन्द्रादित्यौ च धरणी विद्युदग्निस्तथैव च ।
त्वमेव सर्वज्योतींषि तेन नीराजयाम्यहम् ।।

वि.नि. - निम्नलिखित मन्त्र पढ्दै जल घुमाएर तीन पल्ट प्रदक्षिणा गर्नू-

ॐ यानि कानि च पापानि जन्मान्तरकृतानि च ।
तानि सर्वाणि नश्यन्तु प्रदक्षिणपदे पदे ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmand

0. In Public Domain. Digitization by eGangotri.Funding: M

दिकपालो

वि.नि. – यसपछि हातमा फूल, अक्षताहरू लिएर तलका स्तोत्र र मन्त्रहरूले गणेशलाई पुष्पाञ्जलि अर्पण गर्नू–

ॐ सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः ।
लम्बोदरश्च विकटो विघ्ननाशो विनायकः ।।
धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः ।
द्वादशैतानि नामानि यः पठेच्छृणुयादपि ।।
विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा ।
संग्रामे सङ्कटे चैव विघ्नस्तस्य न जायते ।।
ॐ विघ्नवल्लीकुठाराय श्रीगणाधिपतये नमः ।।
ॐ इमानि पुष्पाणि मनोहराणि सुरासुराणामपि दुर्लभानि ।
कल्पद्रुमादिद्रुमवल्लिजानि पुष्पाञ्जलिं तेऽद्य समर्पयामि ।।

प्रार्थना– ॐ अविरलमदजलनिवहं भ्रमरकुलानीकसेवितकपोलम्।
अभिमतफलदातारं कामेशं गणपतिं वन्दे ।।

प्रार्थना– ॐ वक्रतुण्ड ! महाकाय कोटिसूर्यसमप्रभ ।
अविघ्नं कुरु मे देव ! सर्वकार्येषु सर्वदा ।।

वि.नि. – यसपछि ग्रहशान्ति छुट्टै नगर्ने भए हातमा फूल, अक्षताहरू लिएर कलशमा तल लेखिएअनुसारका गणपति आदि वनस्पतिसम्मका र आफ्ना इष्टदेवता, कुलदेवताहरूसमेतको आवाहन गरेर नाममन्त्रले पूजा गर्नू–

ॐ भूर्भुवः स्वः साङ्गाः सपरिवाराः सायुधाः सवाहनाः गणपति–सूर्यदेवीशिवविष्णवः पञ्चायतनदेवताः इह आगच्छन्तु, इह तिष्ठन्तु, सुप्रतिष्ठिता वरदा भवन्तु ।

पञ्चायतनदेवताः – ॐ गणपत्यादिपाञ्चायनेभ्यो पञ्चायतनदेवता–भ्यो नमः ।

पञ्चलोकपालाः – ॐ विनायकदुर्गावाय्वाकाशाऽश्विनीकुमाराः पञ्चलोकपालाः इह आगच्छन्तु इह तिष्ठन्तु सुप्रतिष्ठिता वरदा भवन्तु।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

0. In Public Domain. Digitization by eGangotri.Funding: M

ॐ विनायकादिपञ्चलोकपालेभ्यो नमः ।

सूर्यादिनवग्रहाः – ॐ सूर्यसोमभौमबुधबृहस्पतिशुक्रशनिराहुकेतवो नवग्रहाः इह आगच्छन्तु, इह तिष्ठन्तु सुप्रतिष्ठिता वरदा भवन्तु । ॐ सूर्यादिनवग्रहेभ्यो नमः ।

अधिदेवताः – ॐ ईश्वरोमास्कन्दहरिब्रह्मेन्द्रयमकालचित्रगुप्ता नवाधिदेवता इह आगच्छन्तु, इह तिष्ठन्तु, सुप्रतिष्ठिता वरदा भवन्तु । ॐ ईश्वराद्यधिदवेभ्यो नमः ।

प्रत्यधिदेवताः – ॐ अग्न्यब्भूमिविष्णिवन्द्रेद्राणीप्रजापतिसर्पब्रह्माणः प्रत्यधिदेवता इह आगच्छन्तु, इह तिष्ठन्तु, सुप्रतिष्ठिता वरदा भवन्तु । ॐ अग्न्यादिप्रत्यधिदेवेभ्यो नमः ।

दशदिक्पालाः – ॐ इन्द्राग्नियमनिर्ऋतिवरुणवायुसोमेशानब्रह्मानन्ता दशदिक्पाला इह आगच्छन्तु, इह तिष्ठन्तु, सुप्रतिष्ठिता वरदा भवन्तु । ॐ इन्द्रादिदशदिक्पालेभ्यो नमः ।

[1]ध्रुवाद्यष्टवसवः – ॐ ध्रुवाद्यष्टवसव इह आगच्छन्तु, इह तिष्ठन्तु सुप्रतिष्ठिता वरदा भवन्तु । ॐ ध्रुवाद्यष्टवसुभ्यो नमः ।

[2]धात्रादिद्वादशादित्याः – ॐ धात्रादिद्वादशादित्या इह आगच्छन्तु, इह तिष्ठन्तु सुप्रतिष्ठिता वरदा भवन्तु । ॐ धात्रादिद्वादशादित्येभ्यो

---

१. अष्टवसवः –

ध्रुवोऽध्वरस्तथा सोमं आपश्चैवानिलोऽनलः ।
प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्तिताः ।।

२. द्वादशादित्याः –

धातार्यमा च मित्रश्च वरुणेशौ भगस्तथा ।
इन्द्रो विवस्वान् पूषा च पर्जन्यो दशमः स्मृतः ।।
ततस्त्वष्टा ततो विष्णुरजघन्यो जघन्यजः ।
इत्येते द्वादशादित्या नामभिः परिकीर्तिताः ।।१।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

0. In Public Domain. Digitization by eGangotri.Funding: M

नमः।

[३]वीरभद्राद्येकादशरूद्राः – ॐ वीरभद्राद्येकादशरुद्रा इह आगच्छन्तु, इह तिष्ठन्तु सुप्रतिष्ठिता वरदा भवन्तु । ॐ वीरभद्राद्येकादशरुद्रेभ्यो नमः ।

गौर्यादिषोडशमातरः – ॐ गौर्यादिषोडशमातर इह आगच्छन्तु, इह तिष्ठन्तु सुप्रतिष्ठिता वरदा भवन्तु । ॐ गौर्यादिषोडशमातृभ्यो नमः ।

[४]आवहादिसप्तमरुतः – ॐ आवहादिसप्तमरुत इह आगच्छन्तु इह तिष्ठन्तु सुप्रतिष्ठिता वरदा भवन्तु । ॐ आवहादिसप्तमरुद्भ्योनमः ।

विनायकब्रह्मविष्णुरुद्रार्कवनस्पतयः – ॐ विनायकब्रह्मविष्णुरुद्रार्क-वनस्पतय इह आगच्छन्तु इह तिष्ठन्तु सुप्रतिष्ठिता वरदा भवन्तु । ॐ विनायकब्रह्मविष्णुरुद्रार्कवनस्पतिभ्यो नमः ।

वि.नि. – यसपछि गणपतिदेखि वनस्पतिसम्मका देवताहरूको कलशमा आवाहन गर्नू र तल लेखिएका षोडशोपचारले पूजा गर्नू–

इदमासनम्, पाद्यम्, अर्घ्यम्, आचमनीयम्, स्नानीयम्, पञ्चामृत-स्नानम्, शुद्धोदकस्नानम्, वस्त्रम्, गन्धम्, अक्षतान्, सिन्दूरम्, यव-तिलान्, पुष्पाणि, धूपम्, दीपम्, नैवेद्यम्, फलानि, ताम्बूलादिकम्, द्रव्यम्, पुनराचमनीयं च सपर्मयामि ।

---

३. एकादशरुद्राः –

वीरभद्रश्च शम्भुश्च गिरीशश्च महायशाः ।
अजैकपादहिर्बुध्न्यः पिनाकी चापराजितः ।।
भुवनाधीश्वरश्चैव कपाली च विशाम्पतिः ।
स्थाणुर्भवश्च भगवान् रुद्रा एकादश स्मृताः ।।१।।

४. सप्तमरुतः –

आवहः प्रवहश्चैव उद्वहः संवहस्तथा ।
वहः परावहश्चैव तथा परिवहोऽनिलः ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

. In Public Domain. Digitization by eGangotri.Funding:

ॐ गणपत्यादिवनस्पत्यन्तदेवताभ्यो नमः ।
ॐ इष्टदेवताभ्यो नमः । ॐ कुलदेवताभ्यो नमः ।

वि.नि. – यसरी पूजा गरिसकेपछि हातमा फूल, अक्षताहरू लिएर तलका मन्त्रले प्रार्थना गर्नू र धूप, बत्ती, नैवेद्य आदि पनि समर्पण गर्नू–

प्रार्थना –

ॐ ब्रह्मा मुरारिस्त्रिपुरान्तकारी भानुः शशी भूमिसुतो बुधश्च ।
गुरुश्च शुक्रः शनिराहुकेतवो नवग्रहाः शान्तिकरा भवन्तु ।।
ॐ सूर्यः शौर्यमथेन्दुरिन्द्रपदवीं सन्मङ्गलं मङ्गलः
सद्बुद्धिं च बुधो गुरुश्च गुरुतां शुक्रः सुखं शं शनिः ।
राहुर्बाहुबलं करोतु सततं केतुः कुलस्योन्नतिम्
नित्यं प्रीतिकरा भवन्तु मम ते सर्वेऽनुकूला ग्रहाः ।।

मातृकापूजाविधिः

प्रयोगः – *यसमा कर्ताले आसनमा बसी पञ्चगव्यपान गरी पूर्वाभिमुख भई दियो बाल्नू, कलशको स्थापना गरी गणेशपूजा गर्नू । त्यसपछि मातृका पूजाको निम्ति आफ्नो अगाडि चोखो पीरा (पिर्का) मा गोबर अथवा दही अक्षताका साना–साना थुप्रा लहरै राखी तल भनिएबमोजिम क्रमैसँग मातृकाहरूको अलग–अलग पूजा गर्नू–*

विशेष– *मातृकापूजा मात्र गर्ने भए दीप, कलश, गणेशको पूजा गर्नू । एकै दिन गरिने पूर्वाङ्गविधिमा दीप, कलश, गणेश पूजा क्रमशः भएकै हुन्छ, दोहोऱ्याएर गर्नु पर्दैन ।*

वि.नि. – सर्वप्रथम कर्मपात्र निर्माण गरी कुश र कर्मपात्रको जल लिएर तल लेखिएबमोजिम मातृका पूजाको सङ्कल्प गर्नू–

हरिः ॐ तत्सत् पूर्वसङ्कल्पसिद्धिरस्तु– अद्येह अमुकगोत्रः

Nepal Sanskrit University, Balmeeki Campus, Kathmand

0. In Public Domain. Digitization by eGangotri.Funding: M

अमुकप्रवरः अमुकनामाऽहं मम .... करिष्यमाण अमुककर्मणो निर्विघ्न-परिसमाप्त्यर्थं तत्पूर्वाङ्गत्वेन यथाक्रमम्, अदित्यादिसप्तदशगोमय-मातृणां गौर्यादिदशतोरणमातृणां नन्दादिसप्तद्वारमातृणां गणपतिसहित-गौर्यादिषोडशमातृणां ब्राह्म्यादिसप्तमातृणां च यथामिलितोपचारैः पूजनं करिष्ये।

१. अदित्यादिसप्तदशगोमयमातृकापूजनम्-

वि.नि. - हातमा फूल, अक्षताहरू लिएर पहिले पीरामाथिको पहिलो लहरमा छोएर प्रणवव्याहृतिसहित तलको मन्त्रले अदिति आदि सत्र गोमयमातृकाहरूको आवाहन गर्नू-

आवाहनम् - ॐ अदित्यादिसप्तदशगोमयमातर इहागच्छन्तु इह तिष्ठन्तु मम/मद्यजमानस्य पूजां गृह्णन्तु, सुप्रतिष्ठिताः प्रसन्ना वरदा भवन्तु । ॐ अदित्यादिसप्तदशगोमयमातृभ्यो नमः ।

वि.नि. - निम्नलिखित मन्त्रले प्रतिष्ठा गर्नू-

प्रतिष्ठा-

ॐ मनोजूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञꣳसमिमन्दधातु । विश्वेदेवास इहमादयन्तामोंऽ प्रतिष्ठ ।।

वि.नि. - त्यसपछि हातमा फूल, अक्षता अथवा कुशको टुक्रा लिएर तल लेखिएअनुसार नाम उच्चारण गर्दै क्रमैसित प्रत्येक मातृकालाई छोएर जतिपाइन्छ त्यति सामग्रीले पूजा गर्नू-

१) ॐ अदितिरसि - ॐ अदित्यै नमः ।
२) ॐ देवमातासि - ॐ देवमात्रे नमः
३) ॐ स्वाहासि - ॐ स्वाहायै नमः ।
४) ॐ सिद्धिरसि - ॐ सिद्ध्यै नमः ।
५) ॐ सरस्वत्यसि - ॐ सरस्वत्यै नमः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

. In Public Domain. Digitization by eGangotri.Funding:

६)　ॐ कीर्तिरसि - ॐ कीर्त्यै नमः ।
७)　ॐ लक्ष्मीरसि - ॐ लक्ष्म्यै नमः ।
८)　ॐ धृतिरसि - ॐ धृत्यै नमः ।
९)　ॐ मेधासि - ॐ मेधायै नमः ।
१०)　ॐ पुष्टिरसि - ॐ पुष्ट्यै नमः ।
११)　ॐ श्रद्धासि - ॐ श्रद्धायै नमः ।
१२)　ॐ क्रियासि - ॐ क्रियायै नमः ।
१३)　ॐ मतिरसि - ॐ मत्यै नमः
१४)　ॐ बुद्धिरसि - ॐ बुद्ध्यै नमः ।
१५)　ॐ लज्जासि - ॐ लज्जायै नमः ।
१६)　ॐ वपुरसि - ॐ वपुषे नमः ।
१७)　ॐ शान्तिरसि - ॐ शान्त्यै नमः ।

वि.नि. - यसरी मातृकाहरूको आवाहन तथा स्थापना गरेर निम्नलिखित वचन पढी षोडशोपचारले पूजा गर्नू–

ॐ अदित्यादिसप्तदशगोमयमातृकाभ्यो नमः ।

इदमासनम्, पाद्यम्, अर्घ्यम्, आचमनीयम्, स्नानीयम्, पञ्चामृतस्नानम्, शुद्धोदकस्नानम्, वस्त्रम्, गन्धम्, अक्षतान्, सिन्दूरम्, यवतिलान्, पुष्पाणि, धूपम्, दीपम्, नैवेद्यम्, फलानि, ताम्बूलादिकम्, द्रव्यम्, पुनराचमनीयं च सपर्मयामि ।

क्षमाप्रार्थना -

भो अदित्यादिसप्तदशगोमयमातरः पूजिताः स्थ क्षमध्वम् ।

– इति गोमयमातृकापूजाविधिः –

२. गौर्यादिदशतोरणमातृकापूजनम् -

वि.नि. - यसपछि दोस्रो लहरमा छोएर तल लेखिएअनुसार गौरी आदि दश

lepal Sanskrit University, Balmeeki Campus, Kathmand

0. In Public Domain. Digitization by eGangotri.Funding: M

तोरणमातृकाहरूको आवाहन गर्नू–

आवाहनम् –

ॐ गौर्यादिदशतोरणमातर इह आगच्छन्तु इह तिष्ठन्तु मम/ मद्यजमानस्य पूजां गृह्णन्तु, सुप्रतिष्ठिताः सुप्रसन्ना वरदा भवन्तु । ॐ गौर्यादिदशतोरणमातृभ्यो नमः ।

वि.नि. – निम्नलिखित मन्त्रले प्रतिष्ठा गर्नू–

प्रतिष्ठा –

ॐ मनोजूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञꣳसमिमन्दधातु । विश्वेदेवास इहमादयन्तामों २ प्रतिष्ठ ।।

वि.नि. – यसपछि हातमा फूल, अक्षता र कुश टुक्रा लिएर तल लेखिएअनुसार नाम उच्चारण गर्दै क्रमैसित प्रत्येक मातृकालाई छोएर जो सकेको उपचारले पूजा गर्नू–

१) ॐ गौर्यसि – ॐ गौर्यै नमः ।
२) ॐ धनदासि – ॐ धनदायैनमः ।
३) ॐ नन्दासि – ॐ नन्दायै नमः ।
४) ॐ विमलासि – ॐ विमलायै नमः ।
५) ॐ मङ्गलासि – ॐ मङ्गलायै नमः ।
६) ॐ बलासि – ॐ बलायै नमः ।
७) ॐ गङ्गासि – ॐ गङ्गायै नमः ।
८) ॐ यमुनासि – ॐ यमुनायै नमः ।
९) ॐ धात्र्यसि – ॐ धात्र्यै नमः ।
१०) ॐ विधात्र्यसि – ॐ विधात्र्यै नमः ।

यसरी आवाहन र स्थापना गरेपछि नमस्कार गर्नू–
ॐ गौर्यादिदशतोरणमातृकाभ्यो नमः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

. In Public Domain. Digitization by eGangotri.Funding:

वि.नि.– माथि बताए झैं जल, पञ्चामृत, चन्दन, अक्षता, फूलहरू चढाएर यथाशक्ति उपचारले पूजा गरी हातमा फूल, अक्षताहरू लिएर तल लेखिएअनुसार क्षमाप्रार्थना गर्नू–

क्षमाप्रार्थना–

भो गौर्यादिदशतोरणमातरः पूजिताः स्थ क्षमध्वम् ।

३. नन्दादिसप्तद्वारमातृकापूजनम् –

वि.नि. – यसपछि तेस्रो लहरमा स्थापना गरिएका मातृकाहरूको हातमा फूल, अक्षता र कुश लिएर छुँदै तल लेखिएबमोजिम आवाहन र पूजा गर्नू–

आवाहनम्– ॐ नन्दादिसप्तद्वारमातर इहागच्छन्तु इह तिष्ठन्तु मम/मद्यजमानस्य पूजां गृह्णन्तु, सुप्रतिष्ठिताः सुप्रसन्ना वरदा भवन्तु। ॐ नन्दादिसप्तद्वारमातृभ्यो नमः ।

वि.नि. – निम्नलिखित मन्त्रले प्रतिष्ठा गर्नू–

प्रतिष्ठा – ॐ मनोजूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञꣳसमिमन्दधातु । विश्वेदेवास इह मादयन्तामोंऽ प्रतिष्ठ ।

विधि– निम्नलिखित नामहरू उच्चारण गर्दै फूल, अक्षता र कुशको टुक्रा लिएर प्रत्येकलाई छोई पूजा गर्नू –

१) ॐ नन्दासि – ॐ नन्दायै नमः ।
२) ॐ नन्दिन्यसि – ॐ नन्दिन्यै नमः ।
३) ॐ वासिष्ठ्यसि – ॐ वासिष्ठ्यै नमः ।
४) ॐ वसुदेवासि – वसुदेवायै नमः ।
५) ॐ भार्गव्यसि – ॐ भार्गव्यै नमः ।
६) ॐ जयासि – ॐ जयायै नमः ।
७) ॐ विजयासि – ॐ विजयायै नमः ।

ॐ नन्दादिसप्तभ्यो द्वारमातृभ्यो नमः ।

lepal Sanskrit University, Balmeeki Campus, Kathmand

0. In Public Domain. Digitization by eGangotri.Funding: M

क्षमाप्रार्थना–

भो नन्दादिसप्तद्वारमातरः पूजिताः स्थ क्षमध्वम् ।

४. गौर्यादिषोडशमातृकापूजाविधिः –

विधि– यसपछि पुनः हातमा फूल, अक्षताहरू लिएर तल लेखिएअनुसार गणपतिसहित गौरी आदि षोडश (सोह्र) मातृकाहरूको आवाहन, प्रतिष्ठा गरी नाममन्त्रहरू पढ्दै जो सकेको उपचारले पूजा गर्नू–

आवाहनम् –

ॐ गणपतिसहिता गौर्यादिषोडशमातर इहागच्छन्तु इह तिष्ठन्तु मम/मद्यजमानस्य पूजां गृह्णन्तु, सुप्रतिष्ठिताः सुप्रसन्ना वरदा भवन्तु। ॐ गणपतिसहितगौर्यादिषोडशमातृभ्यो नमः ।

प्रतिष्ठामन्त्रः – ॐ मनोजूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञꣳसमिमन्दधातु । विश्वेदेवास इह मादयन्तामोंꣳ प्रतिष्ठ।।

वि.नि. – निम्नलिखित नामहरू उच्चारण गर्दै जो सकेको उपचारले पूजा गर्नू –

१) ॐ गौर्यसि – ॐ गौर्यै नमः ।
२) ॐ पद्मासि – ॐ पद्मायै नमः ।
३) ॐ शच्यसि – ॐ शच्यै नमः ।
४) ॐ मेधासि – ॐ मेधायै नमः ।
५) ॐ सावित्र्यसि –ॐ सावित्र्यै नमः ।
६) ॐ विजयासि – ॐ विजयायै नमः ।
७) ॐ जयासि – ॐ जयायै नमः ।
८) ॐ देवसेनासि – ॐ देवसेनायै नमः ।
९) ॐ स्वधासि – ॐ स्वधायै नमः ।
१०) ॐ स्वाहासि – ॐ स्वाहायै नमः ।
११) ॐ मातरःस्थ – ॐ मातृभ्यो नमः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

. In Public Domain. Digitization by eGangotri.Funding:

१२) ॐ लोकमातरःस्थ - ॐ लोकमातृभ्यो नमः ।
१३) ॐ धृतिरसि - ॐ धृत्यै नमः ।
१४) ॐ पुष्टिरसि - ॐ पुष्ट्यै नमः ।
१५) ॐ तुष्टिरसि - तुष्ट्यै नमः ।
१६) ॐ आत्मनः कुलदेवतासि- ॐ आत्मनः कुलदेवतायै नमः
ॐ गणपतिसहितगौर्यादिषोडशमातृभ्यो नमः ।

वि.नि. - यसपछि तल लेखिए बमोजिम उपचारहरूले पूजा गर्नू-

इदमासनम्, पाद्यम्, अर्घ्यम्, आचमनीयम्, स्नानीयम्, पञ्चामृत-स्नानम्, शुद्धोदकस्नानम्, वस्त्रम्, गन्धम्, अक्षतान्, सिन्दूरम्, यवतिलान्, पुष्पाणि, धूपम्, दीपम्, नैवेद्यम्, फलानि, ताम्बूलादिकम्, द्रव्यम्, पुनराचमनीयं च सपर्मयामि ।

क्षमाप्रार्थना -

भो गणपतिसहिता गौर्यादिषोडशमातरः पूजिताः स्थ क्षमध्वम्।

- इति गौर्यादिषोडशमातृकापूजाविधिः -

५. ब्राह्म्यादिसप्तमातृकापूजनम् -

वि.नि. - यसपछि त्यहीं नजिकै भित्तामा गोबरका सानासाना सात थुप्रा लहरै लाएर तिनमा दूबो र रातो दही अक्षता टाँसेर हातमा फूल, अक्षताहरू लिएर तल लेखिएअनुसार ब्राह्मी आदि सात मातृकाको आवाहन गर्नू-

आवाहनम् - ॐ ब्राह्म्यादिसप्तमातर इहागच्छन्तु इह तिष्ठन्तु मम/मद्यजमानस्य पूजां गृह्णन्तु, सुप्रतिष्ठिताः सुप्रसन्ना वरदा भवन्तु । ॐ ब्राह्म्यादिसप्तमातृकाभ्यो नमः ।

प्रतिष्ठा - ॐ मनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञꣳसमिमन्दधातु । विश्वेदेवास इहमादयन्तामोंꣳ प्रतिष्ठ ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmand

0. In Public Domain. Digitization by eGangotri.Funding: M

पूर्वाङ्गविधिः

वि.नि. – निम्नलिखित नाममन्त्रहरू उच्चारण गर्दै जो भएको उपचारले पूजा गर्नू–

१) ॐ ब्राह्म्यसि – ॐ ब्राह्म्यै नमः ।
२) ॐ माहेश्वर्यसि – ॐ माहेश्वर्यै नमः ।
३) ॐ कौमार्यसि – ॐ कौमार्यै नमः ।
४) ॐ वैष्णव्यसि – ॐ वैष्णव्यै नमः ।
५) ॐ वाराह्यसि – ॐ वाराह्यै नमः ।
६) ॐ इन्द्राण्यसि – ॐ इन्द्राण्यै नमः ।
७) ॐ चामुण्डासि – ॐ चामुण्डायै नमः ।
ॐ ब्राह्म्यादिसप्तमातृकाभ्यो नमः ।

वि.नि. – निम्नलिखित षोडशोपचारले पूजा गर्नू –

इदमासनम्, पाद्यम्, अर्घ्यम्, आचमनीयम्, स्नानीयम्, पञ्चामृतस्नानम्, शुद्धोदकस्नानम्, वस्त्रम्, गन्धम्, अक्षतान्, सिन्दूरम्, यवतिलान्, पुष्पाणि, धूपम्, दीपम्, नैवेद्यम्, फलानि, ताम्बूलादिकम्, द्रव्यम्, पुनराचमनीयं च सपर्मयामि–

विशेष – *माथि लेखिएका सामानबाहेक अबीर, सुगन्ध द्रव्य, आरतीमा कपूर बालेर नीराजन, तीन पटक प्रदक्षिणा पनि गर्नू र हातमा चन्दन, अक्षता, फूल, लावाहरू लिएर तलको मन्त्रले पुष्पञ्जलि अर्पण गर्नू–*

क्षमाप्रार्थना –

भो ब्राह्म्यादिसप्तमातरः पूजिताः स्थ क्षमध्वम् ।

पुष्पाञ्जलि–

ॐ ब्रह्माणी कमलेन्दुसौम्यवदना माहेश्वरी लीलया
कौमारी रिपुदर्पनाशनकरी चक्रायुधा वैष्णवी ।
वाराही घनघोरघर्घरमुखी चैन्द्री च वज्रायुधा
चामुण्डा गणनाथरुद्रसहिता रक्षन्तु नो मातरः ।।
पुष्पाञ्जलिं समर्पयामि– ॐ मातृकाभ्यो नमः ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

. In Public Domain. Digitization by eGangotri.Funding:

वसुधारा–

वि.नि. – पुष्पाञ्जलि चढाइसकेपछि यजमानका दम्पतिलाई आसनमा बसालेर तल लेखिएअनुसार मन्त्र पढ्दै घ्यूको धारा लगाएर वसुधारा (पाँच अथवा सात धारा) गर्नू–

वसोर्धाराः –

ॐ वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्त्रधारम् ।
देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्वा कामधुक्षः।।
ताꣳसवितुर्वरेण्यस्य चित्रामाहं वृणे सुमतिं विश्वजन्याम ।
यामस्य कण्वोऽअदुहत्प्रपीनाꣳसहस्त्रधारां पयसा महीं गाम् ।।
कण्वो हैनां ददर्श साहास्मै सहस्त्रधाराः सर्वान्कामान्दुदुहे ।
तथैवैतद्यजमानाय सहस्त्रधाराः सर्वान्कामान्दुदुहे ।।

वि.नि. – हात जोडी निम्नलिखित मन्त्रले 'शान्ति–प्राथना' र आशीर्वाद प्रार्थना गर्नू–

ॐ द्यौः शान्तिरन्तरिक्षꣳशान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिर्वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्वꣳशान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि ।।

ॐ पुनस्त्वादित्यारुद्रावसवःसमिन्धतां पुनर्ब्रह्माणोवसुनीथ यज्ञैः।
घृतेन त्वं तन्वं वर्धयस्व सत्याः सन्तु यजमानस्य कामाः ।। स्वस्ति।।

दक्षिणा –

वि.नि. – दक्षिणाद्रव्य आफ्नो अगाडि राखी नमस्कार पूजा गरेर सङ्कल्प गर्नू–

ॐ दक्षिणाद्रव्याय नमः ।

दक्षिणासङ्कल्पः – हरिः ॐ तत्सत् पूर्वोक्तसङ्कल्पसिद्धिरस्तु अद्येह अमुकगोत्रः अमुकप्रवरः अमुकशर्मा/वर्मा अहं मम अमुकपूर्वाङ्गतया यथामिलितोपचारैर्दीपकलशगणेशपूजनपूर्वकं विहितस्य मातृकापूजनकर्मणः साद्गुण्यार्थमिमां दक्षिणां अमुकद्रव्यं अमुकदेवताकं

lepal Sanskrit University, Balmeeki Campus, Kathmand

0. In Public Domain. Digitization by eGangotri.Funding: N

यथानामगोत्रेभ्यो ब्राह्मणेभ्यो दातुमुत्सृजे ॐ तत्सन्न मम ।

विष्णुस्मरणम् –

ॐ यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ।।
ॐ अच्युताय नमः ॐ अच्युताय नमः ॐ अच्युताय नमः ।

कर्मसमर्पणम् –

वि.नि. – अनि कर्मपात्रको जल, कुश हातमा लिएर र तलको मन्त्र पढी ईश्वरलाई कर्म समर्पण गर्नू–

ॐ कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वा प्रकृतिस्वभावात्।
करोमि यद्यत् सकलं परस्मै नारायणायेति समर्पये तत् ।।

– इति मातृकापूजाविधिः –

अथाभ्युदयिकश्राद्धविधिः

प्रयोगः – *यसमा श्राद्धकर्ताले शुद्ध भएर पूर्व वा उत्तर फर्केर आचमन गरी दियो बाल्नू । आसनमा बसेर कर्मपात्र निर्माणविधिले तिलबाहेक सबैथोक राखी कर्मपात्र बनाएर निम्नलिखित मन्त्र पढी कर्मपात्रको जलले आफूलाई र वरिपरीका सामग्रीहरूलाई सेचन गर्नू –*

ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा ।
यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ।।
ॐ पुण्डरीकाक्षः पुनातु ।

वि.नि. – त्यसपछि कुश र कर्मपात्रको जल लिएर तल लेखिए अनुसार सङ्कल्प

Nepal Sanskrit University, Balmeeki Campus, Kathmand

. In Public Domain. Digitization by eGangotri.Funding:

गर्नु–

हरि ॐ तत्सत् । ॐ अद्येह अमुकगोत्रः अमुकप्रवरः अमुकशर्मा, वर्मा वा अहं मम/मद्यजमानस्यान्यस्य अमुककर्मणः पूर्वाङ्गतया अमुकगोत्राणाम् अस्मन्मातृपितामहीप्रपितामहीनाम्/अस्मद्यजमानस्य मातृपितामहीप्रपितामहीनां देवीनां नान्दीमुखीनां तथा अमुकगोत्राणाम्, अस्मत्पितृपितामहप्रपितामहानाम्/अस्मद्यजमानस्य पितृपितामह-प्रपितामहानां शर्मणाम्/वर्मणां नान्दीमुखानां तथा अमुकगोत्राणाम्, अस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाम्/अस्मद्यजमानस्य माता-महप्रमातामहबृद्धप्रमातामहानां सपत्नीकानां नान्दीमुखानां सत्यवसु-संज्ञकविश्वेदेवपूर्वकाणां नान्दीमुखश्राद्धमेभिर्द्रव्यैरहं करिष्ये ।

वि.नि. – सङ्कल्पपछि तीनपल्ट गायत्री जप गरी हात जोडेर तलका मन्त्रले देव, पितृ, तीर्थ आदिको स्मरण गर्नू र नमस्कार गर्नू –

ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च ।
नमः स्वाहायै स्वधायै नित्यमेव नमो नमः ।।
सप्त व्याधा दशार्णेषु मृगाः कालञ्जरे गिरौ ।
चक्रवाकाः सरद्वीपे हंसाः सरसि मानसे ।।
तेऽपि जाताः कुरुक्षेत्रे ब्राह्मणा वेदपारगाः ।
प्रस्थिता दीर्घमध्वानं यूयं किमवसीदथ ।।
पञ्चक्रोशं गयाक्षेत्रं क्रोशमेकं गयाशिरः ।
यत्र यत्र स्मरेद्विद्वान् पितॄणां दत्तमक्षयम् ।।
श्राद्धकाले गयां ध्यात्वा तथा देवं गदाधरम् ।
उभ्याभ्यां च नमस्कृत्य ततः श्राद्धं समारभे ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

0. In Public Domain. Digitization by eGangotri.Funding: M

दिग्बन्धनम् -

वि.नि. - यसपछि हातमा जौ र कुश लिएर तल लेखिएबमोजिम मन्त्र पढी कुशले जौ छर्दै दिग्बन्धन गर्नू -

पूर्वे - ॐ अग्निष्वात्ताः पितृगणाः प्राचीं रक्षन्तु मे दिशम् ।
ॐ अपहताऽ असुरा रक्षाꣳसि वेदिषदः ।।

दक्षिणे - ॐ तथा वर्हिषदः पान्तु याम्यां ये पितरः स्थिताः ।
ॐ अपहताऽ असुरा रक्षाꣳसि वेदिषदः ।।

पश्चिमे - ॐ प्रतीचीमाज्यपास्तद्वत् पान्तु ।
ॐ अपहताऽ असुरा रक्षाꣳसि वेदिषदः ।।

उत्तरे - ॐ उदीचीमपि सोमपाः पान्तु ।
ॐ अपहताऽ असुरा रक्षाꣳसि वेदिषदः ।।

उर्ध्वम् - ॐ उर्ध्वतस्त्वर्यमा रक्षेत् ।
ॐ अपहताऽ असुरा रक्षाꣳसि वेदिषदः ।।

भूमौ - ॐ कव्यवाडनलोऽप्यधः, रक्षेत् ।
ॐ अपहताऽ असुरा रक्षाꣳसि वेदिषदः ।।
ॐ रक्षोभूतपिशाचेभ्यस्तथैवासुरदोषतः ।
सर्वतश्चाधिपस्तेषां यमो रक्षां करोतु मे ।।

नीविबन्धनम् -

वि.नि. - निम्नलिखित मन्त्र पढी दिग्बन्धन गरेको जौ, कुशलाई आफ्नो कम्मरमा घुसार्नू -

ॐ त्वमग्ने, द्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वमश्मनस्परि ।
त्वं वनेभ्यस्त्वमोषधीभ्यस्त्वं नृणां नृपते जायसे शुचिः ।।

- इति नीवीबन्धनम् -

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

. In Public Domain. Digitization by eGangotri.Funding:

विश्वेदेवब्राह्मणासनम् –

वि.नि. – यसपछि कर्मपात्रको जल र दुई दुई टुक्रा कुश हातमा लिएर निम्नलिखित वचन पढ्दै क्रमैसित तीनै पक्षका विश्वेदेव ब्राह्मणहरूलाई पृथक् पृथक् आसन दिनू-

आसनम् –

ॐ अद्येह अमुकगोत्राणाम् अस्मन्मातृपितामहीप्रपितामहीनाम्/अस्मद्यजमानस्य मातृपितामहीप्रपितामहीनां देवीनां नान्दीमुखीनामस्मिन्नाभ्युदयिकश्राद्धे श्राद्धसम्बन्धिनां विश्वेषां देवानां सत्यवसुसंज्ञकानामिदं कौशमासनं वो नमः[1] ।

ॐ अद्येह अमुकगोत्राणाम् अस्मत्पितृपितामहप्रपितामहानाम्/अस्मद्यजमानस्य पितृपितामहप्रपितामहानां शर्मणाम्/वर्मणां नान्दीमुखानामस्मिन्नाभ्युदयिकश्राद्धे श्राद्धसम्बन्धिनां विश्वेषां देवानां सत्यवसुसंज्ञकानामिदं कौशमासनं वो नमः ।

ॐ अद्येह अमुकगोत्राणाम् अस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाम्/अस्मद्यजमानस्य मातामहप्रमातामहवृद्धप्रमातामहानां शर्मणाम्/वर्मणां सपत्नीकानां नान्दीमुखानाम् अस्मिन्नाभ्युदयिकश्राद्धे श्राद्धसम्बन्धिनां विश्वेषां देवानां सत्यवसुसंज्ञकानामिदं कौशमासनं वो नमः ।

पितृब्राह्मणासनम् –

वि.नि. – यसमा पनि अघि झैं कर्मपात्रको जल र कुशको टुक्रा हातमा लिएर तल लेखिए अनुसार वाक्य पढ्दै क्रमैसित तीन पक्षका पितृब्राह्मणहरूलाई पृथक् पृथक् आसन दिनू –

प्रथमं मातृब्राह्मणासनम् – ॐ अद्येह अमुकगोत्राणाम् अस्मन्मातृपितामहीप्रपितामहीनाम्, अस्मद्यजमानस्य मातृपितामहीप्रपितामहीनां

१. कुनै कुनै पद्धतिमा सङ्कल्पवाक्यहरूको अन्तमा 'वृद्धिश्रियै' यो पद प्रयोग भएको देखिन्छ।

Nepal Sanskrit University, Balmeeki Campus, Kathmand

0. In Public Domain. Digitization by eGangotri.Funding: N

वा देवीनां सत्यवसुसंज्ञकविश्वेदेवपूर्विकाणां नान्दीमुखीनामस्मिन् कर्मपूर्वाङ्गभूताभ्युदयिकश्राद्धे इदं कौशमासनं त्रेधा विभज्य वो नमः।

पितृब्राह्मणासनम् – ॐ अद्येह अमुकगोत्राणाम्, अस्मत्पितृपितामह-प्रपितामहानाम्/अस्मद्यजमानस्य पितृपितामहप्रपितामहानां शर्मणाम्/वर्मणां सत्यवसुसंज्ञकविश्वेदेवपूर्वकाणां नान्दीमुखानामस्मिन् अमुक-कर्मणः पूर्वाङ्ग भूताभ्युदयिकश्राद्धे इदं कौशमासनं त्रेधा विभज्य वो नमः ।

मातामहब्राह्मणासनम् – ॐ अद्येह अमुकगोत्राणाम्, अस्मन्मातामह-प्रमातामहवृद्धप्रमातामहानाम्/अस्मद्यजमानस्य मातामहप्रमातामहवृद्ध-प्रमातामहानां शर्मणाम्/वर्मणां सपत्नीकानां सत्यवसुसंज्ञकविश्वेदेव-पूर्वकाणां नान्दीमुखानामस्मिन् अमुककर्मणः पूर्वाङ्गभूताभ्युदयिकश्राद्धे इदं कौशमासनं त्रेधा विभज्य वो नमः ।

विश्वेदेवब्राह्मणपूजनम् –

वि.नि. – यसमा तीनै पक्षका विश्वेदेव ब्राह्मणहरूलाई जल, पञ्चामृत, वस्त्र, जनै, चन्दन, अक्षता, जौ, फूलमाला, धूप, बत्ती, नैवेद्य, रोटी, मिठाइ, फलफूल, पान, सुपारी, मसला, भेटीहरू चढाएर पूजा गर्नू र हातमा कर्मपात्रको जल कुश फूलहरू लिएर तल लेखिए अनुसार वाक्य पढी सङ्कल्प गरेर अर्पण गर्नू–

ॐ अद्येह अमुकगोत्राणामस्मन्मातृपितामहीप्रपितामहीनाम्/अस्मद्यजमानस्य मातृपितामहीप्रपितामहीनां देवीनां नान्दीमुखीनां तथा अमुकगोत्राणाम् अस्मत्पितृपितामहप्रपितामहानाम्/अस्मद्यजमानस्य पितृपितामहप्रपितामहानां शर्मणाम्/वर्मणां नान्दीमुखानां तथा अमुकगोत्राणाम् अस्मन्मातामहप्रमातामहवृद्धप्रमातामहनाम्/अस्मद्य-जमानस्य मातामहप्रमातामहवृद्धप्रमातामहानां शर्मणाम्/वर्मणां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

. In Public Domain. Digitization by eGangotri.Funding.

वेदारम्भप्रयोगः– अथ ब्रह्मचारी प्रथमं गणेशादीन् पूजयेत् । तद्यथा– अद्येहामुकोऽहं वेदारम्भकर्मणः पूर्वाङ्गत्वेन गणेशादीनामावाहनस्थापनपूजनानि करिष्ये इति संकल्प्य, ताम्रस्थाल्यादौ दध्यक्षतान् गृहीत्वा उत्तरवृद्ध्या स्थापयेत्।

ॐ भूः गणेश इहागच्छ पूजार्थं त्वामावाहयामि इह तिष्ठ, ॐ भूर्भुवःस्वः विष्णो इहा०, ॐ भू० सरस्वति इहा०, ॐ भू० लक्ष्मि इहा०, ॐ भू० स्वविद्ये इहा०, ॐ मनोजूतिः० इति प्रतिष्ठाप्य ध्यानादिनीराजनान्तं संपूज्य गुरुञ्च गन्धपुष्पादिभिरभ्यर्च्य पादोपसङ्ग्रहणं कुर्यात् । गुरुश्च ततो ब्रह्मचारिणं यथाविधि वेदानध्यापयेत् । तद्यथा– अग्नेरुत्तरतोब्रह्मचारिणमुदङ्मुखं प्राङ्मुखं वा प्रागग्रेषु कुशेषूपवेश्य स्मार्ताचमनं प्राणायामं ब्रह्माञ्जलिञ्च कारयित्वा प्रणवव्याहृतिपूर्वां गायत्रीं पाठयित्वा स्ववेदारम्भं कारयेत् ।

यजुर्वेदाध्ययनविनियोगः – तत्र ॐ इषेत्वादि खम्ब्रह्मान्तस्य माध्यन्दिनीयकस्य व्वाजसनेयकस्य यजुर्व्वेदाम्नायस्य विवस्वानृषिर्गायत्र्यादीनि सर्व्वाणि छन्दाꣳसि सर्व्वाणि यजूꣳषि लिङ्गोक्ता देवताः स्वाध्यायाध्ययने विनियोगः। ॐ हरिः ॐ, ॐ भूर्भुवः स्वः तत्स०, ॐ इषेत्वोर्ज्जेत्त्वाव्वायवस्स्थदेवोवःसविताप्प्रार्पयतुश्श्रेष्ठतमायकर्म्मणऽआप्प्यायद्ध्वमग्घ्न्याऽइन्द्रायभागम्प्रजावतीरनमीवाऽअयक्ष्मामावस्तेनऽईशतमाघशꣳसोद्ध्रुवाऽअस्मिन्गोपतौस्यातबह्वीर्य्यजमानस्य पशून्पाहि ।।१।। व्वसोपवित्त्रम् इति स्वल्पारम्भं कारयित्वा अध्यायादीन् प्रब्रूयात् । ॐ कृष्णोसि०।।२।। ॐ समिधाग्निम्०।।३।। ॐ एदम्०।।४।। ॐ अग्नेस्त्तनूः० ।।५।।

pal Sanskrit University, Balmeeki Campus, Kathman

0. In Public Domain. Digitization by eGangotri.Funding: M

ॐ देवस्यत्त्वा०।।६। ॐ ब्वाचस्पतये०।।७।। ॐ देवसवितः०।।९।। ॐ अपोदेवाः०।।१०।। ॐ युञ्जानःप्प्रथमम्०।।११।। ॐ दृशानो-रुक्क्मः०।।१२।। ॐ मयिगृह्णामि०।।१३।। ॐ ध्रुवक्षितिर्द्ध्रुव-योनिः० ।।१४।। ॐ अग्ग्नेजातान्० ।।१५।। ॐ नमस्त्ते० ।।१६।। ॐ अश्म्मन्नूर्ज्जम्० ।।१७।। ॐ ब्वाजश्श्च० ।।१८।। ॐ स्वाह्वी-न्त्वा०।।१९।। ॐ क्षत्रस्ययोनिः० ।।२०।। ॐ इमम्मे०।।२१।। ॐ तेजोसि० ।।२२।। ॐ हिरण्यगर्ब्भःसम्० ।।२३।। ॐ अश्श्वस्त्तूप-रः०।।२४।। ॐ शादन्दद्भिः०।।२५।। ॐ अग्ग्निश्श्च०।।२६।। ॐ समास्त्त्वा०।।२७।। ॐ होतायक्षत्०।।२८।। ॐ समिद्धोऽअञ्ज-न्०।।२९।। ॐ देवसवितः०।।३०।। ॐ सहस्त्रशीर्षापुरुषः०।।३१।। ॐ तदेव०।।३२।। ॐ अस्याजरासः०।।३३।। ॐ यज्जाग्ग्रतः०।।३४।। ॐ अपेतः० (जलस्पर्शः विष्णोर्वा स्मरणम्) ।।३५।। ॐ ऋचंब्वा-चम्० ।।३६।। ॐ देवस्यत्त्वा०।।३७।। ॐ देवस्यत्त्वा० ।।३८।। ॐ स्वाहाप्प्राणेब्भ्य० ।३९।। ॐ ईशाब्वास्यम्० ।।४०।। ॐ हिरण्मयेनपात्रेणसत्त्यस्यापिहितम्मुखम् । योसावादित्त्येपुरुषःसोसावहम् ।। ॐ खम्ब्रह्म ।।४०।। ॐ ब्व्रतमुपैष्ष्यन्नन्तरेणाहवनीयञ्चगार्हपत्त्यञ्च-प्प्राङ्क्तिष्ठन्नपऽउपस्पृशतितद्यदपऽउपस्पृशत्यिमेद्ध्यम्भ्रैपुरुषोयदनृतंब्वद-तितेनपूतिरन्तरतोमेद्ध्यावाऽआपोमेद्ध्योभूत्त्वाव्व्रतमुपायानीतिपवित्रं-वाऽआपःपवित्रपूतोव्व्रतमुपायानीतितस्म्माद्द्वाऽअपऽउपस्पृशति ।।१।। ॐ सोग्ग्निमेवाभीक्षमाणोव्व्रतमुपैति । ॐ प्राश्न्नीपुत्रादासुरिवासिनः-प्राश्न्नीपुत्रऽआसुरायणादासुररायणऽआसुरेरासुरिर्य्याज्ञवल्क्याद्याज्ञव-ल्क्यऽउद्दालकादुद्दालकोरुणादरुणऽउपवेशेरुपवेशिःकुश्श्रेःकुश्श्र-र्व्वाजश्श्रवसोब्वाजश्श्रवाजिह्वावतोबाद्ध्योगाज्जिह्वावान्बाद्ध्योगोसि-ताद्द्वार्षगणादसितोब्वार्षगणोहरितात्कश्यपाद्धरितःकश्यपःशिल्पा-त्कश्यपाच्छिल्पःकश्यपःकश्यपान्नैध्रुवेकश्यपोनैध्रुविर्व्वाचोब्वागम्भि-ण्याऽअम्भिण्यादित्त्यादादित्त्यानीमानिशुक्लानियजूꣳषिब्वाजसनेयेन-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

n Public Domain. Digitization by eGangotri.Funding

याज्ञवल्क्येनाख्यायन्ते ।।२।। इत्येवं यजुर्वेदारम्भं परिसमापयेत् ।

ऋग्वेदाध्ययनविनियोगः - अथ ऋग्वेदादिमन्त्रस्यमधुच्छन्दाऋषिर्गायत्रीच्छन्दोऽग्निर्देवता स्वाध्यायाध्ययने विनियोगः । ॐ अग्निमीळेपुरोहितंयज्ञस्यदेवमृत्त्विजम् । होतारंरत्नधातमम्।। इति ऋग्वेदारम्भः ।

सामवेदाध्ययनविनियोगः - अथ सामवेदादिमन्त्रस्य गौतमऋषिर्गायत्रीच्छन्दोऽग्निर्देवता स्वाध्यायाध्ययने विनियोगः । ॐ अग्नआयाहिवीतयेगृणानोहव्यदातये । निहोतासत्सिबर्हिषि।। इति सामवेदारम्भः ।

अथर्ववेदाध्ययनविनियोगः - शन्नोदेवीरिति अथर्ववेदादिमन्त्रस्य दध्यङ्ङाथर्वणऋषिर्गायत्रीछन्दोऽग्निर्देवता स्वाध्यायाध्ययने विनियोगः । ॐ शन्नोदेवीरभिष्टयऽआपोभवन्तुपीतये। शंयोरभिस्त्रवन्तुनः ।। इत्यथर्ववेदारम्भः।

अनिराकरणमन्त्रपाठः - पुनः पूर्ववत् प्रणव्याहृतिपूर्विकां गायत्रीं पठित्वा ॐ विरामोऽस्तु इति वदन्तं गुरुं शिष्यः पादोपसङ्ग्रहणपूर्वकं प्रणम्य विरमेत्। ततः अधीत्यानिराकरणमन्त्रान्पठेत्। ॐ अथातोधीत्याधीत्यानिराकरणम्। प्रतीकम्मेविचक्षणंजिह्वामेमधुयद्वचःकर्णाभ्यांभूरिशुश्रुवेमात्वंहार्षीच्छुतम्मयिब्रह्मणःप्रवचनमसि । ब्रह्मणःप्रतिष्ठानमसि । ब्रह्मकोशोसि। सनिरसिशान्तिरस्यनिराकरणमसि । ब्रह्मकोशम्मेविश । वाचात्वापिदधामिवाचात्वापिदधामि । स्वरकरणकण्ठ्यौरसदन्त्यौष्ठ्यग्रहणधारणोच्चारणशक्तिर्म्मयिभवतु। आप्यायन्तुमेङ्गानिवाक्प्राणश्चक्षुःश्रोत्रंयशोबलम् । यन्मेश्रुतमधीतंतन्मेमनसितिष्ठतुतिष्ठतु ॐ ।। इति पारस्करगृह्ये ३/१५ । अथाचारादस्मिन्नवसरे बटुं पाठार्थं वाराणसीं प्रेषयन्ति ।

अध्ययननियमाः- आचार्येणाहूतोऽधीयीत । आचार्येणाहूत उत्थाय प्रतिवचनं दद्यात् । शयानं चेदाह्वयति तदासीनः, आसीनं चेत्तिष्ठन्, तिष्ठन्तं चेदभिमुखं गच्छन्, अभिमुखमागच्छन्तं चेदभिधावन्, गुरुमेवं वर्तमानोऽध्येता ब्रह्मभूयाय कल्पत इति ।

pal Sanskrit University, Balmeeki Campus, Kathman

0. In Public Domain. Digitization by eGangotri.Funding: M

यजुर्वेदारम्भमन्त्रः -

ॐ हरिः ॐ समिधाग्निन्दुवस्यत घृतैर्बोधयतातिथिम् । आस्मिन् हव्या जुहोतन ।।१।। सुममिद्धाय शोचिषे घृतन्तीव्रञ्जुहोतन । अग्नये जातवेदसे ।।२।।

ऋग्वेदारम्भमन्त्रः - ॐ अग्निमीडे पुरोहितं यज्ञस्य देवमृत्विजम्। होतारं रत्नधातमम् ।।१।।

सामवेदारम्भमन्त्रः - ॐ अग्न ऽ आयाहि वीतये गृणानो हव्यदातये। निहोता सत्सि बर्हिषि ।।१।।

अथर्ववेदारम्भमन्त्रः - ॐ शन्नो देवीरभिष्टयऽआपो भवन्तु पीतये । शंयोरभिस्त्रवन्तु नः ।।१।।

अधीत्यानिराकरणमन्त्रः - ॐ प्रतीकम्मे विचक्षणं जिह्वा मे मधु यद्वचः ।। कर्णाभ्यां भूरि श्रुश्रुवे मा त्वꣳहार्षीः श्रुतम्मयि ।।१।।

ॐ ब्रह्मणः प्रवचनमसि ब्रह्मणः प्रतिष्ठानमसि ब्रह्मकोशोसि सनिरसि शान्तिरस्यनिराकरणमसि । ब्रह्मकोशं मे विश । वाचा त्वापिदधामि ।। स्वरकरणकण्ठ्यौरसदन्त्यौष्ठ्यग्रहणधारणशक्तिर्मयि भवतु । आप्यायन्तु मेङ्गानि वाक्प्राणश्चक्षुः श्रोत्रं यशोबलम् ।। यन्मे श्रुतमधीतं तन्मे मनसि तिष्ठतु तिष्ठतु ।

धनुर्वेदारम्भमन्त्राः -

ईश्वरोक्ताद्धनुर्वेदाद् व्यासस्यापि सुभाषितात् ।
पद्यान्याकृष्य रचितो ग्रन्थः संक्षेपतो मया ।।
यस्याभ्यासप्रसादेन निष्पद्यन्ते धनुर्धराः ।
जेतारः परसैन्यानां तस्याभ्यासो विधीयताम् ।।
एकोपि यत्र नगरे प्रसिद्धः स्याद् धनुर्धरः ।
ततो यान्त्यरयो दूरान्मृगाः सिंहभयादिव ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

n Public Domain. Digitization by eGangotri.Funding

क्रियाकलापान् वक्ष्यामि श्रमसाध्यान् शुचिस्मिते ।
येषां विज्ञानमात्रेण सिद्धिर्भवति नान्यथा ।।
एको रथो गजश्चैको जनाः पंच पदातयः ।
त्रयश्च तुरगाश्चैव पत्तिरित्यभिधीयते ।।
पत्तिं च त्रिगुणामेकमाहुः सेनामुखं बुधाः ।
त्रीणि सेनामुखान्येवं गुल्म इत्यभिधीयते ।।
त्रयो गुल्मा गणे ज्ञेयो बाहिनी तु गणास्त्रयः ।
स्मृतास्तिस्त्रस्तु बाहिन्यः पृतनेति विचक्षणैः ।।
चमूस्तु पृतनास्तिस्त्रश्चमूत्रयमनीकिनी ।
अनीकिनीं दशगुणां प्राहुरक्षौहिणीं बुधाः ।
खद्वयस्वरवस्विन्दुनेत्रैरक्षौहिणी मता ।।
खद्वयं निधिवेदाक्षिचन्द्राश्व्यग्निहिमांशुभिः ।
महाक्षौहिणिका प्रोक्ता संख्या गणितकोविदैः ।।
मुखे रथा गजाः पृष्ठे तत्पृष्ठे च पदातयः ।
पार्श्वयोश्च हयाः कार्या व्यूहस्यायं विधिः स्मृतः ।।
अर्धचन्द्रं च चक्रं च शकटं मकरं तथा ।
कमलं श्रेणिकां गुल्मं गिरिं वज्रं च कल्पयेत् ।।
ये राजपुत्राः सामन्ता आप्ताः सेवकजातयः ।
तान्सर्वानात्मनः पार्श्वे रक्षायै स्थापयेन्नृपः ।।
संभृत्य महतीं सेनां चतुरङ्गां महीपतिः ।
व्यूहयित्वाग्रतः शूरान् स्थापयेज्जयलिप्सया ।।
क्षत्रं सारभृतं शूरं शस्त्रज्ञमनुरागि च ।
अपि स्वल्पं श्रिये सैन्यं वृथान्या मुण्डमण्डली ।।
अल्पायां वा महत्यां वा सेनायामिति निश्चयः ।
हर्षो योधगणस्यैको जयलक्षणमुच्यते ।।
यस्मिन् बले यः पुरुषः प्रधानः स सर्वयत्नैः परिरक्षणीयः ।
तस्मिन् विनष्टे खिलसारभूते न नाभिभङ्गे ह्यरका वहन्ति ।।

pal Sanskrit University, Balmeeki Campus, Kathmar

0. In Public Domain. Digitization by eGangotri.Funding: M

रक्षामन्त्राः –

ॐ शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके ।
घंटास्वनेन नः पाहि चापज्यानिस्वनेन च ।।
प्राच्यां रक्ष प्रतीच्यां च चण्डिके रक्ष दक्षिणे ।
भ्रामणेनात्मशूलस्य उत्तरस्यां तथेश्वरि ।।
सौम्यानि यानि रूपाणि त्रैलोक्ये विचरन्ति ते ।
यानि चात्यर्थधोराणि तैरक्षास्मांस्तथा भुवम् ।।
खड्गशूलगदादीनि यानि चास्त्राणि तेऽम्बिके ।
करपल्लवसङ्गीनि तैरस्मान् रक्ष सर्वतः ।।
लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः ।
येषामिन्दीवरश्यामो हृदयस्थो जनार्दनः ।।
अर्जुनः फाल्गुनो जिष्णुः किरीटी श्वेतवाहनः ।
बीभत्सुर्विजयः कृष्णः सव्यसाची धनञ्जयः ।।
ॐ धन्वना गा धन्वनाजिं जयेम धन्वना तीव्राः समदो जयेम ।
धनुः शत्रोरप कामं कृणोति धन्वना सर्वाः प्रदिशो जयेम ।।
धृतं कृष्णेन रक्षार्थं संहारार्थं हरेण च ।
त्रयीमूर्तिगतं दिव्यं धनुस्त्वां प्रणमाम्यहम् ।।
कामदेवस्य ये वाणाः सफला अर्जुनस्य च ।
रामस्य च यथा वाणास्तथास्माकं भवन्त्विह ।।
ॐ धनुषे नमः, ॐ वाणेभ्यो नमः, ॐ धनुर्वाणेभ्यो नमः ।

वि. नि. – अब वेदारम्भपछि कुमारलाई एकपल्ट गुरुको पाउमा र पुस्तकमा पनि दर्शन गर्न लगाउनू ।

पूर्णाहुतिः –

सर्वप्रथम स्वस्तिवाचन गरेर कुमारका हातबाट सुरोमा सग्लोनरिवल, सुपारी केही राख्न लगाई उठेर घ्यूको धारा लगाउँदै विनियोगसहित तलको मन्त्रले

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

n Public Domain. Digitization by eGangotri.Funding

केशान्त -

अग्निमा पूर्णाहुति होम गर्नू -

विनियोगः - ॐ मूर्धानमिति मन्त्रस्य भरद्वाज ऋषिस्त्रिष्टुप् छन्दः अग्निर्देवता पूर्णाहुतिहोमे विनियोगः ।

ॐ मूर्धानं दिवोऽअरतिं पृथिव्या वैश्वानरमृतऽआजातमग्निम्। कविंᳬसम्राजमतिथिं जनानामासन्नापात्रं जनयन्त देवाः स्वाहा।।

त्र्यायुषकरणम् -

विनियोगः - ॐ त्र्यायुषमिति मन्त्रस्य नारायण ऋषिरुष्णिक् छन्दो लिङ्गोक्ता देवता भस्मना तिलककरणे विनियोगः ।

ॐ त्र्यायुषं जमदग्नेः, ललाटे , ॐ कश्यपस्य त्र्यायुषम्, ग्रीवायाम्, ॐ यद्देवेषु त्र्यायुषम्, दक्षिणबाहुमूले, ॐ तन्नोऽअस्तु त्र्यायुषम्, हृदि ।

यसपछि वेदारम्भसम्बन्धी होमसाङ्गतासिद्धिका लागि एउटा गोदान गरेर आचार्यलाई दिनू र ॐ उत्तिष्ठ ब्रह्मणस्पते. ॐ यज्ञ यज्ञं गच्छ० इत्यादि पढेर यज्ञको विसर्जन गर्नू र कर्म ईश्वरमा अर्पण गर्नू ।

दक्षिणासङ्कल्पः- अद्येहामुकोऽहममुकशर्मणो बटोर्वेदारम्भकर्मणः साङ्गतासिद्ध्यर्थं साद्गुण्यार्थं च इदं सुवर्णमग्निदैवतं वररूपेणाचार्याय कर्मोपदेशकाय तुभ्यमहं सम्प्रददे इति दद्यात् । ततः पित्रादिर्दश यथाशक्ति वा ब्राह्मणान् भोजयिष्ये इति संकल्पं कृत्वा हरिनामाग्निं संपूज्य विसृजेत्। इति वेदारम्भः ।

- इति वेदारम्भः -

pal Sanskrit University, Balmeeki Campus, Kathman

0. In Public Domain. Digitization by eGangotri.Funding: M

समावर्त्तनम्

प्रयोगः[१] - तत्र शुभे दिने प्रह्वीभूय आचार्य ! **स्नास्यामी**ति कुमार आचार्यं भाषते, ततः **स्नाही**त्याचार्यः । ततो ब्रह्मचारिणि आचार्यसन्निहितप्रदेशे उपविष्टे कृतस्नानादिराचार्यः कुशैर्हस्तमात्रपरिमितभूमिं परिसमूह्य तानैशान्यां परित्यज्य गोमयोदकेनोपलिप्य स्रुवमूलेनोत्तरोत्तरक्रमेण त्रिरुल्लिख्योल्लेखन-क्रमेणानामिकाङ्गुष्ठाभ्यामुद्धृत्य जलेनाभ्युक्ष्य कांस्यपात्रेणाग्निमानीय प्रत्यङ्मुखं तदुपरि निदध्यात् ।

प्रयोग – वेदारम्भ गरी यथासमय विद्या र व्रत दुवै पूरा गरेको कुमार ब्रह्मचारी विद्यार्थीले आचार्यलाई गुरुदक्षिणा अथवा गाई दिएर सन्तुष्ट गराई गुरुको अघिल्तिर हात जोडी बसेर अथवा उभिएर नम्रतासाथ **ॐ आचार्य ! स्नास्यामि** भन्नू । आचार्यले पनि **ॐ स्नाहि** अनुमति दिएपछि समावर्त्तन होम गर्न ठीक

---

१. अथ समावर्त्तनम्- तत्र विधिस्तु वेदारम्भवत्कार्यः एतदेव व्रतादेशनविसर्गेषु इति पारस्करवचनात् ।

अथ स्नास्यन् वररूपेण गवादिकमाचार्याय दद्यात् । गुरवे तु वरं दत्वा स्नायीत तदनुज्ञया इति याज्ञवल्क्यवचनात् । तत्र संकल्पः- अद्येहामुकोऽहं स्नानाधिकारसिद्धये इमां गां गोप्रत्याम्नायीभूतं सुवर्णं रजतं वा आचार्याय तुभ्यं संप्रददे इति संकल्प्य गुरवे वरं दत्त्वा भो गुरो अहं स्नास्यामि इति संप्रार्थ्य स्नाहि इति लब्धानुज्ञो वक्ष्यमाणविधिना स्नायात् । अत्र स्नानादौ ब्रह्मचार्येवाधिकारी स्नायादिति कर्त्रर्थकलकारश्रवणात् ।

अथाचार्यः समावर्त्तनवेदीसमीपमागत्य प्राङ्मुख उपविश्य स्वदक्षिणत उदङ्मुखं ब्रह्मचारिणमुपवेश्य गणेशादीन्प्रणम्य वेद्यां पञ्चभूसंस्कारपूर्वकमग्निं संस्थाप्य प्रतिज्ञासंकल्पं कुर्यात् । अद्येहामुकोऽहममुकराशेरस्य बटोः स्नातकत्वसिद्धये समावर्त्तनकर्म करिष्ये इति संकल्प्य ब्रह्मोपवेशनादिपूर्णपात्रासादनान्ते विशेषोपकल्पनीयानि ।

इन्धनं पञ्चधा विभक्तम्, पर्युक्षणार्थमुदकम्, समिधस्तिस्रः पुनरिन्धनं पञ्चधा विभक्तम्, पर्युक्षणार्थमुदकञ्च, हरिताः कुशाः, स्नानाधिकरणाभूताः सर्वौषधिमिश्रिततीर्थवारिपूर्णा अष्टौ कुम्भाः, दक्षिणोपक्रमा उदक्संस्थाः सहस्रधाराः, सूर्योपस्थानार्थं वस्त्रम्, भोजनार्थं दधि,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

n Public Domain. Digitization by eGangotri.Funding

बनाएको वेदी नजिक बसी आचमन, प्राणायाम गरी हातमा चन्दन, अक्षता, फूल, जौ लिएर कर्मपात्रको जलसहित सङ्कल्प गरी उपनयनमा बताएजस्तै विधिले अग्निस्थापनाअनुसार वेदीको पञ्चभूसंस्कार गरी कुशकण्डिका पनि गर्नू। त्यसपछि वेदीमा वैश्वानर नामका अग्निको स्थापना गरेर ब्रह्म रूप ब्राह्मणवरण गर्नू ।

प्रतिज्ञासङ्कल्पः - ॐ अद्येह अमुकगोत्रस्य अमुकनाम्न अमुकअस्य ब्रह्मचारिणः अथवा कुमारस्य स्नातकत्वसिद्ध्या ब्रह्मचर्यावस्थातो गृहस्थाद्याश्रमान्तरप्राप्त्यर्थं तत्स्वीकारार्थं वा श्रीमत्परमेश्वरप्रीतये समावर्त्तनकर्माहं करिष्ये ।

ब्राह्मणवरणम् -

सङ्कल्पः - ॐ हरिः ॐ तत्सत्. अद्येह अमुकगोत्रस्य अमुकनाम्नः अस्य ब्रह्मचारिणः, कुमारस्य अद्यकर्तव्यसमावर्त्तनहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्म कर्तुम् अमुकगोत्रममुकशर्माणं ब्राह्मणमेभिश्चन्दनपुष्पाक्षतताम्बूलपूगीफलवासोद्रव्यादिभिर्ब्रह्मत्वेन त्वामहं वृणे।

ब्रह्मा हुने ब्राह्मणले ॐ वृतोस्मि भन्नू । यजमान (आचार्य) ले ॐ

क्षौरार्थ नापितः, स्नानार्थ शीतं वारि, औदुम्बरं दन्तधावनम्, उत्सादनीयद्रव्यम्, स्नानार्थमुष्णमुदकम्, चन्दनम्, अहते वाससी, यज्ञोपवीतम्, पुष्पमाला, शिरोवेष्टनम्, कञ्चुकादीनि परिधानवस्त्राणि, कर्णवेष्टकौ, अञ्जनम्, दर्पणः, छत्रम्, उपानहौ, वैणवो दण्डश्चेति । ततः पवित्रच्छेदनादि-पर्युक्षणान्तं कर्म कृत्वा द्रव्यदेवताभिध्यानं कुर्यात् ।

अद्येह अस्य बटोः समावर्त्तनकर्मणाहं यक्ष्ये तत्र प्रजापतिम्, इन्द्रम्, अग्निम्, सोमम्, अन्तरिक्षम्, वायुम्, ब्रह्माणम्, छन्दांसि, दिशः, चन्द्रमसम्, ब्रह्माणम्, छन्दांसि, प्रजापतिम्, देवान्, ऋषीन्, श्रद्धाम्, मेधाम्, सदसस्पतिम्, अनुमतिम्, अग्निम्, वायुम्, सूर्यम्, अग्नीवरुणौ, अग्नीवरुणौ अग्निम्, वरुणꣳसवितारम्, विष्णुम्, विश्वान् (देवान्), मरुतः, स्वर्कान्, वरुणम्, प्रजापतिम्, स्विष्टकृतश्चाज्येनाहं यक्ष्ये ।

पित्रादेरन्यस्य कृतस्याचार्यस्य होमकर्तृत्वे पित्रादिः, इदमाज्यं तत्तद्देवतायै मया परित्यक्तम् यथा दैवतमस्तु न मम इति त्यागं पूर्वमेव कुर्यात् । ततो राजपुत्र (वैश्वानरनामाग्निरिति केचित्) नामानमग्निं ॐ मनोजूतिः० ॐ भू० राजपुत्रनामाग्ने सुप्रतिष्ठो वरदो भव इति प्रतिष्ठाप्य ॐ तदेवाग्निरित्यादिभिर्मन्त्रैर्नाममन्त्रेण च ध्यानावाहनपाद्यादिनीराजनान्तं संपूज्य रेखापूजनं जिह्वापूजनञ्च कृत्वा दक्षिणं जान्वाच्य जुहुयात् इति संस्कारदीपके ।)

pal Sanskrit University, Balmeeki Campus, Kathman

0. In Public Domain. Digitization by eGangotri.Funding: M

यथाविहितं कर्मकुरु भन्नू र ब्राह्मणले ॐ करवाणि भनेपछि अग्निको दक्षिणपट्टि एक ठाउँमा आसन ठीक पारी त्यसमा पूर्वपट्टि टुप्पो पारेर कुशहरू विच्छ्याइदिनू र ब्रह्मालाई अग्निको प्रदक्षिणा गराई लगेर अस्मिन् (समावर्त्तनहोम) कर्मणि त्वं मे ब्रह्मा भव भनेर राखिदिनू । ब्रह्माले ॐ भवानि भनेर आसनमा बसी संक्षिप्त कुशकण्डिका अग्निस्थापना विधिअनुसार गर्नू ।

अग्निध्यानम् –

ॐ चत्वारि शृङ्गा त्रयोऽअस्य पादा द्वे शीर्षे सप्त हस्तासो ऽ अस्य । त्रिधा बद्धो वृषभो रोरवीति महोदेवो मर्त्त्यां २ँ आविवेश ।।

ॐ वैश्वानरनामाग्ने इहागच्छ, इह तिष्ठ, अत्र आवाहितो भव सुप्रतिष्ठितो भव सुप्रसन्नो वरदो भव ।।

ॐ अग्निं प्रज्वलितं वन्दे जातवेदं हुताशनम् ।
सुवर्णवर्णममलं समिद्धं सर्वतोमुखम् ।।
होमार्थं प्रार्थयेऽहं त्वा समिदाज्यैर्हुताशन ।
वैश्वानर ! दिव्यरूप ! मयात्रावाहितो भव ।।
प्रतिष्ठितो भव तथा प्रसन्नो वरदो भव ।
तावच्च तिष्ठ मे ब्रह्मन् यावत् कर्म समाप्यते ।।
ॐ स्वाहाशक्तियुताय वैश्वानरनामाग्नये जातवेदसे नमः ।

वि.नि. – यसपछि समावर्त्तनको होमसङ्कल्प गर्नू –

ॐ हरिः ॐ तत्सत् इत्यादि । अद्येह अस्य ब्रह्मचारिणः, कुमारस्याद्यकर्तव्यसमावर्त्तन होमकर्मणि प्रथमं प्रजापतिम्, इन्द्रम्, अग्निं सोमम्, तदनु, अन्तरिक्षम्, वायुम्, ब्रह्माणम्, छन्दाँसि, पृथिवीम्, अग्निम्, ब्रह्माणं छन्दाँसि, दिवम्, सूर्यम्, ब्रह्माणम्, छन्दाँसि, दिशः, चन्द्रमसम्, ब्रह्माणम्, छन्दांसि, तदन्तरम् प्रजापतिम्, देवान्, ऋषीन्, श्रद्धाम्, मेघाम्, सदसस्पतिम्, अनुमतिम्, ततोऽग्निम्, वायुम्, सूर्यम्, अग्नीवरुणौ, अग्नीवरुणौ, अग्निम्, वरुणसवितृविष्णुविश्वेदेवमरुत्स्वर्कान्, वरुणम्, प्रजापतिम्, स्विष्टकृतं चाज्येन अग्नावाज्याहुतिदानेनाहं यक्ष्ये ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

n Public Domain. Digitization by eGangotri.Funding

प्रयोग – *आचार्यले कुमारलाई सँगै देब्रेपट्टि राखेर ब्रह्माद्वारा अन्वारम्भण गर्न लगाई दाहिने घुँडा मोडेर विनियोगसहित मन्त्र पढ्दै अग्निमा सुरोले घ्यूको चार आहुति दिनू र आहुतिपछि सुरोमा बाँकी रहेको शेष घ्यू प्रोक्षणीपात्रमा चुहाइदिनू –*

आघाराज्यहोमः –

विनियोगः – ॐ प्रजापतय इति प्रजापतिर्ऋषिस्त्रिष्टुप् छन्दः प्रजापतिर्देवता समावर्त्तनकर्मणि आज्यहोमे विनियोगः ।

ॐ प्रजापतये स्वाहा– इदं प्रजापतये न मम ।। इति मनसा।।१।।

विनियोगः – ॐ इन्द्रायेति प्रजापतिर्ऋषिस्त्रिष्टुप् छन्द इन्द्रो देवता समावर्त्तन–कर्मणि आज्यहोमे विनियोगः ।

ॐ इन्द्राय स्वाहा– इदमिन्द्राय न मम ।।२।। (इत्याघारौ)

विनियोगः – ॐ अग्नय इति प्रजापतिर्ऋषिस्त्रिष्टुप् छन्दोऽग्निर्देवता समावर्तनकर्मणि आज्यहोमे विनियोगः ।

ॐ अग्नये स्वाहा– इदमग्नये न मम ।।३।।

विनियोगः – ॐ सोमायेति प्रजापतिर्ऋषिस्त्रिष्टुप् छन्दः सोमो देवता समावर्त्तनकर्मणि आज्यहोमे विनियोगः ।

ॐ सोमाय स्वाहा– इदं सोमाय न मम ।।४।। (एतावाज्यभागौ)

समावर्त्तनहोमः –

प्रयोग – *ब्रह्माद्वारा अन्वारम्भण नगराई धमाधम सुरोमा घ्यू लिएर तल लेखिएका मन्त्र पढ्दै क्रमैसित अग्निमा आहुति दिनू । आहुति दिंदा कुमारलाई अघि आरम्भ गरेर अध्ययन गराइएको आफ्नो एउटा वेदसम्बन्धी मुख्य दुई (जम्मा चार) आहुति पहिले दिएर त्यसपछि पछाडिका अरु सामान्य आहुतिहरू दिनू ।*

pal Sanskrit University, Balmeeki Campus, Kathman

0. In Public Domain. Digitization by eGangotri.Funding: M

यजुर्वेदाहुतिः -

१) ॐ अन्तरिक्षाय स्वाहा- इदमन्तरिक्षाय न मम ।

२) ॐ वायवे स्वाहा- इदं वायवे न मम ।

३) ॐ ब्रह्मणे स्वाहा- इदं ब्रह्मणे न मम ।

४) ॐ छन्दोभ्यः स्वाहा-इदं छन्दोभ्यो न मम । इति यजुर्वेदे।

ऋग्वेदाहुतिः -

१) ॐ पृथिव्यै स्वाहा- इदं पृथिव्यै न मम ।

२) ॐ अग्नये स्वाहा- इदमग्नये न मम ।

३) ॐ ब्रह्मणे स्वाहा- इदं ब्रह्मणे न मम ।

४) ॐ छन्दोभ्यः स्वाहा- इदं छन्दोभ्यो न मम ।इति ऋग्वेदे।

सामवेदाहुतिः -

१) ॐ दिवे स्वाहा- इदं दिवे न मम ।

२) ॐ सूर्याय स्वाहा- इदं सूर्याय न मम ।

३) ॐ ब्रह्मणे स्वाहा- इदं ब्रह्मणे न मम ।

४) ॐ छन्दोभ्यः स्वाहा- इदं छन्दोभ्यो न मम ।इति सामवेदे।

अथर्ववेदाहुतिः -

१) ॐ दिग्भ्यः स्वाहा- इदं दिग्भ्यो न मम ।

२) ॐ चन्द्रमसे स्वाहा- इदं चन्द्रमसे न मम ।

३) ॐ ब्रह्मणे स्वाहा- इदं ब्रह्मणे न मम ।

४) ॐ छन्दोभ्यः स्वाहा- इदं छन्दोभ्यो न मम ।इत्यथर्ववेदे।

सर्वसामान्याहुतयः -

१) ॐ प्रजापतये स्वाहा- इदं प्रजापतये न मम । इति मनसा

२) ॐ देवेभ्यः स्वाहा- इदं देवेभ्यो न मम ।

३) ॐ ऋषिभ्यः स्वाहा- इदमृषिभ्यो न मम ।

४) ॐ श्रद्धायै स्वाहा- इदं श्रद्धायै न मम ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

n Public Domain. Digitization by eGangotri.Funding

५) ॐ मेधायै स्वाहा- इदं मेधायै न मम ।

५) ॐ सदसस्पतये स्वाहा- इदं सदसस्पतये न मम।।६।।

७) ॐ अनुमतये स्वाहा- इदम् अनुमतये न मम ।।७।।

– इति समावर्त्तनहोमः –

महाव्याहृतिहोमः –

प्रयोग – *ब्रह्माद्वारा अन्वारम्भण गर्न लगाई विनियोगसहित मन्त्र पढ्दै अग्निमा घ्यूको आहुति दिनू र आहुतिपछि सुरोमा बाँकी रहेको शेष घ्यू प्रोक्षणीपात्रमा चुहाइदिनू ।*

विनियोगः – ॐ तिसृणां महाव्याहृतीनां प्रजापतिर्ऋषिः क्रमेण गायत्र्युष्णिगनुष्टुभश्छन्दांसि, अग्निवायुसूर्या देवता अत्र समावर्त्तन-कर्मणि आज्यहोमे विनियोगः ।

मन्त्रः – ॐ भूः स्वाहा- इदमग्नये न मम ।
ॐ भुवः स्वाहा- इदं वायवे न मम ।
ॐ स्वः स्वाहा- इदं सूर्याय न मम ।

– एता महाव्याहृतयः –

पञ्चवारुणीहोमः (प्रायश्चित्तहोमः) –

विनियोगः –ॐ त्वन्नो ऽअग्न इति मन्त्रस्य वामदेव ऋषिस्त्रिष्टुप् छन्दः अग्नीवरुणौ देवते समावर्त्तनकर्मणि सर्वप्रायश्चित्तहोमे विनियोगः।

ॐ त्वन्नो ऽ अग्ने वरुणस्य विद्वान् देवस्य हेडोऽअवया सिसीष्ठाः। यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषाꣳसि प्रमुमुग्ध्यस्मत् – स्वाहा।। इदमग्नीवरुणाभ्यां न मम ।।४।।

विनियोगः – ॐ स त्वन्न इति मन्त्रस्य वामदेव ऋषिस्त्रिष्टुप् छन्दः अग्नीवरुणौ देवते समावर्त्तनकर्मणि सर्वप्रायश्चित्तहोमे विनियोगः ।

pal Sanskrit University, Balmeeki Campus, Kathman

0. In Public Domain. Digitization by eGangotri.Funding: M

ॐ स त्वन्नोऽअग्नेवमो भवोती नेदिष्ठोऽअस्या ऽउषसो व्युष्टौ । अवयक्ष्व नो वरुणꣳरराणो वीहि मृडीकꣳसुहवो नऽएधि - स्वाहा । इदमग्नीवरुणाभ्यां न मम ।।५।।

विनियोगः -ॐ अयाश्चाग्न इति मन्त्रस्य वामदेवऋषिस्त्रिष्टुप् छन्दः, अग्निर्देवता समावर्त्तनकर्मणि सर्वप्रायश्चित्तहोमे विनियोगः ।

ॐ अयाश्चाग्ने स्यनभिशस्तिपाश्च सत्यमित्त्वमयाऽअसि। अया नो यज्ञं वहास्ययानो धेहि भेषजꣳस्वाहा ।। इदमग्नये न मम ।।६।।

विनियोगः - ॐ ये ते शतमिति मन्त्रस्य वामदेव ऋषिस्त्रिष्टुप् छन्दो वरुणः सविता विष्णुर्विश्वे देवा मरुतः स्वर्का देवता समावर्त्तनकर्मणि सर्वप्रायश्चित्तहोमे विनियोगः ।

ॐ ये ने शतं वरुण ये सहस्त्रं यज्ञियाः पाशा वितता महान्तः । तेभिर्नोऽ अद्य सवितोत विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः स्वाहा ।। इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यो न मम ।।७।।

विनियोगः - ॐ उदुत्तममिति मन्त्रस्य शुनःशेप ऋषिस्त्रिष्टुप् छन्दो वरुणो देवता समावर्त्तनकर्मणि सर्वप्रायश्चित्तहोमे विनियोगः ।

ॐ उदुत्तमं वरुणपाशमस्मदवाधमं वि मध्यमꣳश्रथाय । अथा वयमादित्य ब्रते तवानागसोऽ अदितये स्याम स्वाहा ।। इदं वरुणाय न मम ।।८।। (एताः प्रायश्चित्तसंज्ञकाः)

प्राजापत्यहोमः -

ॐ प्रजापतय इति प्रजापतिर्ऋषिस्त्रिष्टुप् छन्दः प्रजापतिर्देवता समावर्तनकर्मणि आज्यहोमे विनियोगः ।

ॐ प्रजापतये स्वाहा- इदं प्रजापतये न मम ।।९।। इति मनसा।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

n Public Domain. Digitization by eGangotri.Funding

स्विष्टकृद्धोमः -

ॐ अग्नये स्विष्टकृत इति मन्त्रस्य प्रजापतिर्ऋषिस्त्रिष्टुप् छन्दः अग्निर्देवता समावर्त्तनकर्मणि स्विष्टकृद्धोमे विनियोगः ।

ॐ अग्नये स्विष्टकृते स्वाहा- इदमग्नये स्विष्टकृते न मम ।

- इति स्विष्टकृदाज्याहुतिहोमः -

संस्रवप्राशनम् -

आहुति दिंदा सुरोमा बाँकी रहेर प्रोक्षणीमा चुहाएको घ्यू (संस्रव) आचार्यले चाट्नू र आचमन गर्नू -

पूर्णपात्रदानम्-

यसपछि फल, सुपारी, फूल, वस्त्र, द्रव्य यज्ञोपवीतसहित चामलको पूर्णपात्रलाई अघिल्तिर राखेर पूजा गरी सङ्कल्पपूर्वक ब्राह्मणलाई दिनू, ब्राह्मणले पनि स्वस्ति भनेर लिनू -

ॐ पूर्णा दर्वि परापत सुपूर्णा पुनरापत । वस्नेवविक्रीणावहाऽइषमूर्जं शतक्रतो । ॐ पूर्णपात्राय नमः ।

ॐ अद्येह कृतेऽस्मिन् समावर्त्तनहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्मप्रतिष्ठार्थमिदं (तण्डुल) पूर्णपात्रं प्रजापतिदेवताकम् अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय ब्रह्मणे दक्षिणात्वेन तुभ्यमहं सम्प्रददे ।

प्रणीताविमोकः -

वि.नि. - विनियोग वाक्य पढेर प्रणीताविमोक गर्नू -

ॐ सुमित्रिया दुर्मित्रिया इति द्वयोर्यजुषोः प्रजापतिर्ऋषिरापो देवता अपामादानप्रक्षेपयोर्विनियोगः ।

वि.नि. - यो मन्त्र पढी पवित्रले प्रणीताको जल लिएर आचार्य र कुमार दुवैका शिरमा अभिषेक गर्नू -

ॐ सुमित्रिया नऽआपऽओषधयः सन्तु ।

pal Sanskrit University, Balmeeki Campus, Kathman

0. In Public Domain. Digitization by eGangotri.Funding: M

वि.नि. – त्यसपछि यो मन्त्र पढेर प्रणीतापात्रलाई ईशानतर्फ राख्नू –

ॐ दुर्मित्रियास्तस्मै सन्तु योस्मान्द्वेष्टि यंच वयं द्विष्मः ।

बर्हिहोमः –

वि.नि. – विच्छाएका कुश उठाएर विनियोगपूर्वक ॐ देवगातु० मन्त्रले घ्यूमा चोपेर हातले हवन गर्नू –

विनियोगः – ॐ देवागातुविद इति मन्त्रस्य मनसस्पतिर्ऋषि विराट्छन्दो वातोदेवता बर्हिहोमे विनियोगः ।

मन्त्रः – ॐ देवागातुविदो गातुंवित्वागातुमित । मनसस्पत इमन्देव यज्ञꣳस्वाहा वातेधाः, स्वाहा । इति बर्हिहोमः ।

समिदाधानम् –

प्रयोग – *अब ब्रह्मचारी (कुमार) लाई तल लेखिएअनुसार विनियोगपूर्वक प्रत्येक मन्त्रले एक–एकवटा सुकेका दाउरा या गुइठा अग्निमा राखेर आगो फुक्न लगाउनू –*

विनियोगः – ॐ अग्ने सुश्रव इत्यादीनां पञ्चानां यजुषां प्रजापतिर्ऋषिरग्नि–र्देवता अग्नेः परिसमूहने, अग्निसमिन्धने विनियोगः।

१) ॐ अग्ने सुश्रवः सुश्रवसं मा कुरु ।

२) ॐ यथा त्वमग्ने सुश्रवः सुश्रवाऽअसि ।

३) ॐ एवं माꣳसुश्रवः सौश्रवसं कुरु ।

४) ॐ तथा त्वमग्ने देवानां यज्ञस्य निधिपाऽअसि ।

५) ॐ एवमहम् मनुष्याणां वेदस्य निधिपो भूयासम्।

पलाशसमिद्धोमः –

प्रयोग – *अग्निमा समिधा राखेर आगो फुकेपछि कुमारलाई दाहिने हातमा अलिकति जल लिन लगाएर अग्निमा वरिपरि सेचन गर्न लगाउनू । त्यसपछि एकएक*

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

n Public Domain. Digitization by eGangotri.Funding

कुरेत (कुरी) लामा पलाशका समिधा घ्यूमा चोपी उठेर विनियोगपूर्वक तलका मन्त्रले एकएक गरी तीन पटक अग्निमा चढाउन लगाउनू –

विनियोगः – ॐ अग्नये समिधमिति मन्त्रस्य प्रजापतिर्ऋषिराकृतिश्छन्दो-ऽग्निर्देवता समिदाधाने विनियोगः ।

ॐ अग्नये समिधमाहार्षं बृहते जातवेदसे। यथा त्वमग्ने समिधा समिद्ध्यसे एवम् अहमायुषा मेधया वर्चसा प्रजया पशुभिर्ब्रह्म-वर्चसेन समिन्धे ।। जीवपुत्रो ममाचार्यो मेधाव्यहमासानि अनिरा-करिष्णुर्यशस्वी तेजस्वी ब्रह्मवर्चसी, अन्नादो भूयासꣳस्वाहा ।।१।।

पुनःपञ्चाहुतिहोमः –

प्रयोग – कुमारलाई तल लेखिए अनुसार मन्त्र पढ्दै मन्त्रै पिच्छे अग्निमा एकएवटा सुकेका दाउरा अथवा गुइँठा अग्निमा राख्न लगाउनू । हातले हम्कँदै आगो पनि बाल्न लगाउनू –

विनियोगः – ॐ अग्ने सुश्रव इत्यादीनां पञ्चानां यजुषां प्रजापतिर्ऋषिरग्नि-र्देवता अग्नेः परिसमूहने अग्निसमिन्धने विनियोगः।

मन्त्राः – १) ॐ अग्ने सुश्रवः सुश्रवसं मा कुरु ।
२) ॐ यथा त्वमग्ने सुश्रवः सुश्रवाऽअसि ।
३) ॐ एवं माꣳसुश्रवः सौश्रवसं कुरु ।
४) ॐ यथा त्वमग्ने देवानां यज्ञस्य निधिपाऽअसि ।
५) ॐ एवमहं मनुष्याणां वेदस्य निधिपो भूयासम् ।

मुखादिस्पर्शः –

वि.नि. – कुमारलाई पुनःदाहिने हातमा अलिकति जल लिन लगाएर अग्निमा सेचन गर्न लगाउनू । त्यसपछि विनामन्त्र वेदीको आगोमा दुवै हात सेकाउन लगाई विनियोगसहित तल दिइएका सात मन्त्रमध्ये एकएक मन्त्रले जम्मा सात

pal Sanskrit University, Balmeeki Campus, Kathman

0. In Public Domain. Digitization by eGangotri.Funding: M

समावर्तनविधिः

पल्ट निधारदेखि चिउँडोसम्म सेकाउन लगाउनू -

विनियोगः - ॐ तनूपाऽअग्ने इत्यादीनां सप्तमन्त्राणां प्रजापतिर्ऋषिःपूर्व मन्त्रचतुष्कं यजुः, उत्तरत्रिकस्यानुष्टुपछन्दो ऽग्निर्देवता माणी प्रतप्य मुखविमार्जने विनियोगः ।

मन्त्राः - १) ॐ तनूपाऽअग्नेऽसि तन्वं मे पाहि ।
२) ॐ आयुर्दाऽअग्नेऽस्यायुर्मे देहि ।
३) ॐ वर्चोदाऽअग्नेसि वर्चो मे देहि ।
४) ॐ अग्ने यन्मे तन्वाऽऊनं तन्म ऽ आपृण ।
५) ॐ मेधां मे देवः सविता आदधातु ।
६) ॐ मेधां मे देवी सरस्वती आदधातु ।
७) ॐ मेधां मे अश्विनौ देवा आधत्तां पुष्करस्त्रजौ ।

सर्वगात्रस्पर्शः -

वि.नि. - कुमारलाई विनियोगसहित तल लेखिएका मन्त्र पढ्दै मन्त्रैपिच्छे एकएक गरेर क्रमैसँग शिरदेखि पाउसम्मका अङ्ग स्पर्श (छुंन) गर्न लगाउनू-

विनियोगः - ॐ अङ्गानि च म इत्यादेर्यजुषः प्रजापतिर्ऋषिर्लिङ्गोक्ता देवता अङ्गाप्यायने विनियोगः ।

मन्त्राः - १) ॐ अङ्गानि च मऽआप्यायन्ताम् । (शिरदेखि पाउसम्म)
२) ॐ वाक्च मऽआप्यायताम् । (मुखमा)
३) ॐ प्राणश्च मऽआप्यायताम् । (नाकमा)
४) ॐ चक्षुश्च मऽआप्यायताम् । (आँखामा)
५) ॐ श्रोत्रं च मऽआप्यायताम् । (कानमा)
६) ॐ यशोबलं च मऽआप्यायताम् । (दुवै पाखुरामा)

यसपछि कुमारलाई आचमन गर्न लगाउनू ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

n Public Domain. Digitization by eGangotri.Funding

त्र्यायुषकरणम् -

वि.नि. - वेदीबाट अलिकति भस्म झिकेर कुमारलाई विनियोगसहित तल लेखिएका मन्त्र पढ्दै दाहिने हातको साहिंली औंलाले तिलक धारण गर्न लगाउनू-

विनियोग- ॐ त्र्यायुषमिति मन्त्रस्य नारायण ऋषिरुष्णिक् छन्दो लिङ्गोक्ता देवता भस्मना तिलककरणे विनियोगः ।

मन्त्रः - ॐ त्र्यायुषं जमदग्नेः, ललाटे, ॐ कश्यपस्य त्र्यायुषम्, ग्रीवायाम्, ॐ यद्देवेषु त्र्यायुषम्, दक्षिणबाहुमूले, ॐ तन्नो ऽ अस्तु त्र्यायुषम्, हृदि ।

कुमारानुष्ठेयमभिवादनम् -

प्रयोग - *उपनयनमा बताएझैं दुई हातले दुवै कान समाती तल लेखिएअनुसार आफ्नो नाम, गोत्र उच्चारण गरी क्रमैसँग अग्नि, वरुण, सूर्य र गुरुलाई भुईंमा शिर राखी कुमारलाई ढोग्न लगाउनू -*

वैश्वानरम् - ॐ अमुकगोत्रः, अमुकप्रवरः, अमुकशर्मा/वर्मा अहं भो वैश्वानर ! त्वामभिवादये ।

वरुणम् - ॐ अमुकगोत्रः, अमुकप्रवरः, अमुकशर्मा/वर्मा अहं भो वरुण ! त्वामभिवादये ।

सूर्यम् - ॐ अमुकगोत्रः, अमुकप्रवरः, अमुकशर्मा/वर्मा अहं भो सूर्य! त्वामभिवादये ।

गुरुम् - ॐ अमुकगोत्रः, अमुकप्रवरः, अमुकशर्मा/वर्मा अहं भो गुरो त्वामभिवादये ।

कुमारायाशीर्वादप्रदानम् -

वि.नि. - गुरुले निम्न वाक्य पढी कुमारलाई आशीर्वाद दिनू -

ॐ आयुष्मान् भव सौम्य अमुकशर्मन्, अमुकवर्मन् वा ।

al Sanskrit University, Balmeeki Campus, Kathman

0. In Public Domain. Digitization by eGangotri.Funding: M

कलशजलेनाभिषेकः –

प्रयोग – *अग्नि वेदीको उत्तरपट्टि अथवा पूर्वपट्टि कुश विच्छ्याएर दक्षिणदेखि उत्तरसम्म लहरै आठ कलश राखेर तिनमा चन्दन, जौ, तिल, फूल, सर्वोषधि, पञ्चरत्न, पञ्चपल्लव, दूवो, गङ्गाजल राखेर ठीक पार्नुपर्छ । कलशहरू सिंगारेर राख्नू । त्यसपछि कुमारलाई कशलको अगाडिपट्टि विच्छ्याइएका कुशमाथि टेकेर उत्तरफर्की उभिन लगाउनू । दक्षिणदेखि क्रमैसँग एकएकवटा कलश हातमा लिन लगाएर विनियोगसहित तलका मन्त्रले पञ्चपल्लवद्वारा कुमारलाई सेचन गर्न लगाउनू –*

वि.नि. – सर्वप्रथम दक्षिणपट्टिको कलश हातमा लिएर तलको विनियोग र मन्त्र पढी पहिलो कलशको जल लिनू –

विनियोगः – ॐ येप्स्वन्तरिति यजुषः प्रजापतिर्ऋषिरापो देवता समावर्त्तन–कर्मणि अभिषेकार्थमुदकग्रहणे विनियोगः ।

मन्त्रः – ॐ येप्स्वन्तरग्नयः प्रविष्टा गोह्य ऽ उपगोह्यो मयूखो मनोहा–ऽस्खलो विरुजस्तनूदूषिरिन्द्रियहा । ताञ्विजहामि यो रोचनस्तमिह गृह्णामि।

वि.नि. – पञ्चपल्लवले कलशबाट जल हातमा लिएपछि विनियोगसहित तलको मन्त्र पढेर कुमारले आफूलाई अभिषेक गर्नू र त्यो कलश जहाँ थियो त्यहीं राख्नू –

विनियोगः – ॐ तेन मामिति यजुषः प्रजापतिर्ऋषिरापो देवता समावर्त्तन–कर्मणि अभिषेचने विनियोगः ।

प्रथमकलशाभिषेकः –

ॐ तेन मामभिषिञ्चामि श्रियै यशसे ब्रह्मणे ब्रह्मवर्चसाय ।

वि.नि. – अब त्यसैगरी दोस्रो कलश हातमा लिएर विनियोगसहित माथि बताएझैं येप्स्वन्तरग्नयः इत्यादि मन्त्र पढी पञ्चपल्लव चोपेर कलशबाट जल लिनू

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

n Public Domain. Digitization by eGangotri.Funding

विनियोगसहित तलको मन्त्र पढेर अभिषेक गर्नू –

विनियोगः – ॐ येन श्रियमिति मन्त्रस्य प्रजापतिर्ऋषिरनुष्टुप्छन्द आपो देवता समावर्त्तनकर्मणि अभिषेचने विनियोगः ।

द्वितीयाभिषेकः –

ॐ येन श्रियमकृणुतां येनावमृशताꣳसुराम् । येनाक्ष्या (क्षा) वभ्यषिञ्चतां यद्वां तदश्विना यशः ।।२।।

वि.नि. – अब तेस्रो घडा हातमा लिएर अघि ॐ येप्स्वन्तरग्नयः यो मन्त्रले जल लिनू र विनियोगसहित तलका मन्त्रले अभिषेक गर्नू । तेस्रो, चौथो, पाँचौं तीनै मन्त्रको एउटै विनियोग हो –

विनियोगः – ॐ आपोहिष्ठेत्यादीनां त्रयाणामपि मन्त्राणां सिन्धुद्वीप ऋषि-र्गायत्री छन्द आपो देवता समावर्त्तनकर्मणि अभिषेचने विनियोगः ।

तृतीयाभिषेकः – ॐ आपो हिष्ठा मयोभुवस्तान ऽ ऊर्जे दधातन । महेरणाय चक्षसे ।।३।।

चतुर्थाभिषेकः – ॐ यो वः शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः ।।४।।

पञ्चमाभिषेकः – ॐ तस्मा ऽ अरङ्गमाम वो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः ।।५।।

वि.नि. – अब क्रमैसित छैठौं, सातौं, आठौं तीनै घडा एक एक गरेर हातमा लिनू र प्रत्येकबाट येप्स्वन्तरग्नयः यही मन्त्रले क्रमैसित जल लिएर विनामन्त्र नै अलग-अलग अभिषेक गर्नू र घडालाई यथास्थान राखिदिनू –

सहस्रधारास्नानम् –

प्रयोग – *आठ कलशको जलले अभिषेक गरेपछि तामाको सहस्रधारा (चाल्नी) शिरमाथि राख्नू । त्यसमा अघिका आठ कलशहरूमा बाँकी रहेको जल*

pal Sanskrit University, Balmeeki Campus, Kathman

0. In Public Domain. Digitization by eGangotri.Funding: M

एकएक गरेर खन्याउँदै आपोहिष्ठा इत्यादि मन्त्रले सहस्रधारास्नान गर्नू-

मेखलामोचनम् -

प्रयोग - *सहस्रधारास्नानपछि स्नातकलाई विनियोगसहित निम्नलिखित मन्त्रले शिरपट्टिबाट मेखला फिकेर भूइँमा राख्न लगाउनू -*

विनियोगः - ॐ उदुत्तममिति मन्त्रस्य शुनःशेप ऋषिस्त्रिष्टुप्छन्दो वरुणो देवता अत्र मेखलोन्मोचने विनियोगः ।

मेखलामोचनमन्त्रः -

ॐ उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमछंश्रथाय । अथा वयमादित्य व्रते तवानागसो ऽ अदितये स्याम ।।

प्रयोग - *कुमारले लिएको दण्ड, मृगछाला, फोलीहरू विनामन्त्र फिकेर भूइँमा राख्न लगाउनू । पहिले लाएको लगौंटी पनि फाल्न लगाएर अर्को कपडा धोती अथवा लगौंटी फेर्न लगाउनू र तीनपल्ट आचमन पनि गर्न लाउनू-*

सूर्योपस्थानम् -

वि.नि. - विनियोगसहित तलका मन्त्रले दुवै हात उठाई कुमारलाई सूर्यको उपस्थान गर्न लगाउनू -

विनियोगः- ॐ उद्यन्भ्राजभृष्णुरिति मन्त्रस्य प्रजापतिर्ऋषिः शक्वरी छन्दः सविता देवता समावर्त्तनकर्मणि आदित्योपस्थाने विनियोगः ।

उपस्थानमन्त्रः-

ॐ उद्यन्भ्राजभृष्णुरिन्द्रो मरुद्भिरस्थात्प्रातर्यावभिरस्थाद् दशसनिरसि दशसनिंमा कुर्वाविदन्मा गमय । उद्यन्भ्राजभृष्णुरिन्द्रो मरुद्भिरस्थाद्दिवा यावभिरस्थाच् छतसनिरसि शतसनिंमा कुर्वाविदन्मा गमय। उद्यन्भ्राजभृष्णुरिन्द्रो मरुद्भिरस्थात्सायं यावभिरस्थात् सहस्रसनिरसि सहस्रसनिं मा कुर्वाविदन्मा गमय ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

n Public Domain. Digitization by eGangotri.Funding

दधिप्राशनम् -

प्रयोग - *अब कुमारलाई हातमा अलिकति दही अथवा तिल लिन लगाएर दाहिने हत्केलाको बीच (सोमतीर्थ) बाट चाट्न लगाउनू । उपनयनका दिन नगरेर पछि समावर्त्तन गरिएको भए बढेका केशहरू मुण्डन गर्न लगाई नङसमेत काट्न भनेर स्नान गर्न लगाउनू । (अन्यथा) तीनपल्ट आचमनसम्म गर्न लगाएर विनियोगसहित तल दिइएको मन्त्रले पूर्व फर्केर दत्तिउन गर्न भन्नू।*

विशेष - *दतिउन लाउँदा ब्राह्मणलाई बाह्र अंगुल, क्षत्रियलाई दश अंगुल र वैश्यलाई आठ अंगुल लामो, कान्छी औंला जत्तिको डोलो, बोक्रै समेतको आलो भन्ने छ । पाएसम्म डुम्रीकै नपाए मात्र अरू काठको लगाउनू ।*

दन्तधावनम् -

वि.नि. - विनियोगपूर्वक तल लेखिएको मन्त्रले कुमारलाई दत्तिउन गर्न लगाउनू-

विनियोगः - ॐ अन्नाद्यायेति मन्त्रस्याथर्वणऋषिरनुष्टुप्छन्दः सोमो देवता इह समावर्त्तनकर्मणि दन्तधावने विनियोगः ।

मन्त्रः - ॐ अन्नाद्याय व्यूहध्वङ्सोमो राजाऽयमागमत् । स मे मुखं प्रमाक्ष्यते यशसा च भगेन च ।

मुखनासिकालम्भनम् -

प्रयोग - *अब कुमारलाई बुकुवा घस्न लगाएर एकपल्ट फेरि राम्रोसँग स्नान गर्न लगाउनू । तीनपल्ट आचमन गर्न लगाई श्रीखण्ड, चन्दन आदि सुगन्धित लेपहरू लिएर दुवै हातमा दल्न लगाउनू । विनियोगसहित तलका मन्त्रले क्रमैसित नाक, मुख, आँखाहरूमा त्यही हातले छुन लगाउनू-*

विनियोगः - ॐ प्राणापानावित्यादेर्यजुषः प्रजापतिर्ऋषिर्लिङ्गोक्ता देवता इह समावर्त्तनकर्मणि चन्दनाद्यनुलेपनोपग्रहणे विनियोगः ।

pal Sanskrit University, Balmeeki Campus, Kathman

0. In Public Domain. Digitization by eGangotri.Funding: M

स्पर्शमन्त्रः- ॐ प्राणापानौ मे तर्पय । (नाकमा)
ॐ चक्षुर्मे तर्पय । (आँखामा)
ॐ श्रोत्रं मे तर्पय । (कानमा)

यज्ञोपवीतधारणम् -

वि.नि. - पहिले अचमन गरी जनै हातमा लिएर गायत्रीले मन्त्रेर मात्र तलको विनियोग गरी मन्त्रपूर्वक जनै लगाउनु पर्दछ ।

विनियोगः - ॐ यज्ञोपवीतमिति प्रथममन्त्रस्य परमेष्ठी ऋषिस्त्रिष्टुप् छन्दो लिङ्गोक्ता देवता, द्वितीयस्य यजुर्मन्त्रस्य प्रजापतिर्ऋषिर्यज्ञोपवीतं देवता उभयोरुपवीतधारणे विनियोगः ।

मन्त्रः - ॐ यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात् ।
आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः ।।
ॐ यज्ञोपवीतमसि यज्ञस्य त्वा यज्ञोपवीतेनोपनह्यामि ।।

अवनेजननिषेकः -

प्रयोग - *अब कुमारलाई दक्षिण फर्केर अपसव्य हुन भनेर सुगन्धि लेपसहितको हातमा अञ्जुलीभरि जल लिन लगाउनू । त्यो जल विनियोगसहित तलको मन्त्र ॐ पितरः शुन्धध्वम्० पढेर पितृतीर्थले दक्षिणतिर छोड्न लगाउनू-*

विनियोगः - ॐ पितरः शुन्धध्वमिति यजुषः प्रजापत्यश्विसरस्वत्य ऋषयः पितरो देवता इह अवनेजनोदकस्य दक्षिणस्यां दिशि निषेचने विनियोगः ।

मन्त्रः - ॐ पितरः शुन्धध्वम् ।

चन्दनलेपनम् -

वि.नि. - यसपछि कुमारलाई फूर्व फर्केर सव्य भई आचमन गर्न लगाउनू । अङ्गमा श्रीखण्ड, चन्दन आदि सुगन्धित द्रव्य लेप गर्न लगाउनू । त्यसपछि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

n Public Domain. Digitization by eGangotri.Funding

विनियोगसहित तलको मन्त्रहरू पढी ती–ती ठाउँमा छुन लगाउनू –

विनियोगः – ॐ सुचक्षाऽअहमित्यादेर्यजुषः प्रजापतिर्ऋषिः सविता देवता अनुलेपनानन्तरं जपे विनियोगः ।

स्पर्शमन्त्रः – ॐ सुचक्षाऽअहमक्षिभ्यां भूयासꣳसुवर्चा मुखेन भूयासम्। सुश्रुत्कर्णाभ्यां भूयासम् ।।

प्रयोग – *यस अवसरमा स्नातक कुमारको निधारमा कस्तूरी, केशरी मिसाएर घोटेको श्रीखण्ड, चन्दनले तिलक लगाइदिनुपर्छ ।*

वस्त्रधारणम् –

वि.नि. – विनियोगसहित तलको मन्त्रले कुमारलाई नयाँ वस्त्र पहिले धोती, कछाड लगाउन भन्नू । त्यसपछि तीन पल्ट आचमन पनि गर्न लगाउनू –

विनियोगः – ॐ परिधास्या, इति मन्त्रस्याथर्वण ऋषिः पङ्क्तिश्छन्दो वासो देवता अधोवस्त्रपरिधाने विनियोगः ।

मन्त्रः – ॐ परिधास्यै यशोधास्यै दीर्घायुत्वाय जरदष्टिरस्मि । शतं च जीवामि शरदः पुरूची रायस्पोषमभिसंव्ययिष्ये ।।

उत्तरीयवस्त्रधारणमाचमनञ्च –

प्रयोग – *विनियोगसहित निम्नलिखित मन्त्रले कुमारलाई उत्तरीय माथि ओढ्ने कपडा ओढ्न लगाउनू । त्यसपछि तीनपल्ट आचमन पनि गर्न लगाउनू-*

विनियोगः – ॐ यशसामेति मन्त्रस्याथर्वण ऋषिस्त्रिष्टुप्छन्दो लिङ्गोक्ता देवता उत्तरीयवस्त्रधारणे विनियोगः ।

मन्त्रः – ॐ यशसा मा द्यावापृथिवी यशसेन्द्राबृहस्पती ।
यशो भगश्च मा विन्दद्यशो मा प्रतिपद्यताम् ।।

pal Sanskrit University, Balmeeki Campus, Kathman

0. In Public Domain. Digitization by eGangotri.Funding: M

विशेष – *यसै समयमा कुमारलाई चलनअनुसारको लगनको भोटो अथवा अरू कपडा इत्यादि पनि लगाइदिने गरिन्छ ।*

पुष्पमालाग्रहणम् –

वि.नि. – विनियोगसहित तलका मन्त्रले कुमारलाई बासना आउने फूल, दूवोका माला हातमा लिन लगाउनू –

विनियोगः – ॐ याऽआहरदिति मन्त्रस्य भरद्वाज ऋषिरनुष्टुप्छन्दःसुमनसो देवता पुष्पमालाग्रहणे विनियोगः ।

मन्त्रः – ॐ या ऽ आहरज्जमदग्निः श्रद्धायै मेधायै कामायेन्द्रियाय । ता ऽ अहं प्रतिगृह्णामि यशसा च भगेन च ।।

विनियोगः – ॐ यद्यश इति मन्त्रस्य भरद्वाज ऋषिरनुष्टुप् छन्दः सुमनसो देवता पुष्पमालाधारणे विनियोगः ।

मन्त्रः – ॐ यद्यशो ऽ प्सरसामिन्द्रश्चकार विपुलं पृथु । तेन संग्रथिताः सुमनसऽ आबध्नामि यशो मयि ।।२।।

शिरोवेष्टनम् –

वि.नि. – विनियोगसहित तलको मन्त्र पढी कुमारलाई पगरी अथवा टोपी धारण गर्न लगाउनू –

विनियोगः – ॐ युवा सुवासा इति मन्त्रस्य अंगिरा ऋषिर्बृहतीछन्द उष्णीषं देवता उष्णीषेण शिरोवेष्टने विनियोगः ।

मन्त्रः – ॐ युवा सुवासाः परिवीतऽआगात्स उ श्रेयान् भवति जायमानः। तं धीरासः कवय उन्नयन्ति स्वाध्यो मनसा देवयन्तः।।

कुण्डलधारणम् –

वि.नि. – विनियोगसहित तलको मन्त्रले कुमारलाई कानमा कुण्डल र हातमा औंठी लगाइदिनू –

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

n Public Domain. Digitization by eGangotri.Funding

विनियोगः - ॐ अलङ्करणमिति मन्त्रस्य प्रजापतिर्ऋषिरुष्णिक् छन्दोऽलङ्कारो देवताऽलङ्कारधारणे विनियोगः ।

मन्त्रः - ॐ अलङ्करणमसि भूयोऽलङ्करणं भूयाः ।

विशेष - *पहिले दाहिनेपट्टि त्यसपछि देब्रेपट्टि मन्त्र पढेर दुवैतिरका कुण्डलहरू लगाइदिनुपर्छ ।*

चक्षुषोरञ्जनम् (गाजल) -

वि.नि. - विनियोगसहित निम्नलिखित मन्त्र पढी कुमारलाई आँखामा अञ्जन (गाजल) लगाइदिनू -

विनियोगः - ॐ वृत्रस्येति यजुषः प्रजापतिर्ऋषिरञ्जनं देवता चक्षुषोरञ्जने विनियोगः ।

मन्त्रः - ॐ वृत्रस्यासि कनीनकश्चक्षुर्दाऽअसि चक्षुर्म्मेदेहि ।

दर्पणेनात्मावलोकनम् -

वि.नि. - विनियोगसहित तलको मन्त्रले कुमारलाई ऐनामा मुख हेर्न लगाउनू -

विनियोगः - ॐ रोचिष्णुरिति यजुषः प्रजापतिर्ऋषिरादर्शो देवता आदर्शावेक्षणे विनियोगः ।

मन्त्रः - ॐ रोचिष्णुरसि ।

छत्रग्रहणम् -

वि.नि. - विनियोगसहित तलको मन्त्रले कुमारलाई छाता लिन अथवा ओढ्न लगाउनू-

विनियोगः - ॐ बृहस्पतेश्छदिरिति मन्त्रस्य गौतम ऋषिरार्षी बृहतीछन्दः छत्रं देवता छत्रग्रहणे विनियोगः ।

मन्त्रः - ॐ बृहस्पतेश्छदिरसि पाप्मनो मामन्तर्धेहि तेजसो यशसो माऽन्तर्धेहि ।

pal Sanskrit University, Balmeeki Campus, Kathman

0. In Public Domain. Digitization by eGangotri.Funding: M

उपानत्परिधानम् -

वि.नि. – विनियोगसहित तलको मन्त्रले कुमारलाई मोजा, जुत्ता क्रमशः लगाउन भन्नू–

विनियोगः – **ॐ प्रतिष्ठेस्थ** इति यजुषः प्रजापतिर्ऋषिरुपानहौ देवते उपानत्प्रतिमोके उपानद्धारणे विनियोगः ।

मन्त्रः – ॐ प्रतिष्ठे स्थो विश्वतो मा पातम् ।

दण्डग्रहणम् -

वि.नि. – विनियोगसहित तलको मन्त्रले कुमारलाई दण्ड (लट्ठी) लिन लगाउनू–

विनियोगः – ॐ विश्वाभ्य इति यजुषो याज्ञवल्क्य ऋषिर्दण्डो देवता दण्डग्रहणे विनियोगः।

मन्त्रः – ॐ विश्वाभ्यो मा नाष्ट्राभ्यस्परिपाहि सर्वतः ।

नियम – *दत्तिउन लगाउँदा सधैं मन्त्र पढेर लगाउनू । छाता, जुत्ता, लुगाहरू नयाँ लगाउँदा मन्त्र पढेर लगाउनुपर्छ ।*

देशान्तरगमनम् -

प्रयोग – *यसपछि कुमारलाई उसको औकातअनुसार आमाको पाउमा द्रव्य (रुपियाँ) राखी दर्शन गर्न लगाउँछन् । आमाको दर्शनपछि कुमार देशान्तर जान लाग्दा मामाले सम्झाइ–बुझाई फर्काई ल्याउँछन् । यज्ञमण्डपमा राखेर देशान्तरको कथा कुमारलाई सुनाई सम्झाउँछन् ।*

देशान्तरकथा-

वसिष्ठ उवाच– गर्भाष्टमे ऽष्टमे वापि व्रतबन्धे कृते द्विज ।।
मातरं पितरं नत्वा गतो देशान्तरं सुतः ।।१।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

n Public Domain. Digitization by eGangotri.Funding

सुत उवाच- श्रृणु मातर्मयोक्तं यदहं यास्ये वनान्तरे ।।
तत्रैव शारदां देवी वरार्थे प्रार्थयाम्यहम् ।।२।।
सेवां कृत्वा गुरोस्तत्र काश्मीरे वापि शोभने ।।
विद्यासंग्रहणं कृत्वा आगमिष्ये पुनर्गृहम् ।।३।।

मातोवाच- बाल्यादेव मया पुत्र ! पालितः कृच्छ्रतः सदा ।
वृद्धावस्थामहं याता पुत्र त्वं पालनं कुरु ।।
स्वकर्त्तव्यं परित्यज्य कथं यास्यसि काननम् ।।४।।

सुत उवाच- ब्रह्मचर्ये कृते तत्र शुश्रूषापूर्वकं गुरोः ।।
स्नात्वाहं सर्वतीर्थेषु आगमिष्ये पुनर्गृहम् । ।।५।।
स कुलान्युद्धरेत् सप्त यस्तीर्थानि भ्रमेद् बटुः ।।
आगमिष्ये ततो मातर्वर्षद्वादशमध्यतः ।।६।।

मातोवाच- देशान्तरं महादुःखं महाघोरं च दारुणम् ।।
शीतवातातपैश्चैव क्षुत्तृड्भ्यां पीड्यते सुत ।।७।।

पितोवाच- कन्दमूलफलाहारो भूमिशय्या निराश्रया ।।
वने कष्टं महादुःखं गृहे तिष्ठ सदा सुत ।।८।।

सुत उवाच- धन्या माता पिता धन्यो ययोः पुत्रो व्रताश्रितः ।।
पितॄन् स तारयेत् सर्वान् दश पूर्वान् दशापरान् ।।९।।

मातोवाच- देशान्तरं नैव याहि महाघोरं सुदारुणम् ।।
दुर्गमाः पर्वतशिला दुर्गमश्च हिमालयः ।।१०।।

पितोवाच - सिंहव्याघ्रगजक्रोडचौरैस्तस्करकैर्वृतम् ।
एकाकी च निराहारो न याहि त्वं वनान्तरम् ।।११।।

सुत उवाच- जातोऽस्मि ब्राह्मणकुले वंशेऽस्मिंस्तव पुत्रकः ।।
करिष्येऽहं व्रतं सर्वं पितृवर्गस्य तारणम् ।।१२।।

मातोवाच- दशमासं धृतो गर्भे जित्वा निद्राक्षुधादिकम् ।।
त्वयि देशान्तरं याते का गतिर्मम पुत्रक ।।१३।।

pal Sanskrit University, Balmeeki Campus, Kathmar

0. In Public Domain. Digitization by eGangotri.Funding: M

पितोवाच- कष्टेन पालितोसि त्वमात्मनोऽर्थे मया सुत ।।
त्वयि देशान्तरं याते का गतिर्मम पुत्रक ।।१४।।
सुत उवाच- पञ्चवर्षे च सम्पूर्णे वनवासी जितेन्द्रियः ।।
व्रतं करिष्ये येनैव तेनाहं तारये पितॄन् ।।१५।।
मातोवाच- दुर्गमाः पर्वताः शैला दुर्गमश्च हिमालयः ।।
दुर्गमं शारदापीठं दुर्गमं वनगह्वरम् ।।१६।।
पितोवाच - काश्मीरो दुर्गमो देशस्तत्र विद्या सुदुष्करा ।।
दुष्करा गुरुसेवा च व्रतं चैव सुदुष्करम् ।।१७।।
मां त्यक्त्वा तात मा याहि बालबुद्धिकृताग्रहः ।।
त्वां विना मम वंशोऽयं नाशमेष्यति पुत्रक ।।१८।।
सुत उवाच - संपूर्णे द्वादशे वर्षे सेवां कृत्वा गुरोरपि ।।
आगमिष्ये व्रते पूर्णे पुनश्च स्वगृहं प्रति ।।१९।।
मातोवाच- गृहे शर्म गृहे धर्मो गृहे चेन्द्रियनिग्रहः ।।
गृहे विद्या गृहे लक्ष्मीर्गुरुसेवा गृहे भवेत् ।।२०।।
पितोवाच - गुरुः स्वगुरुरेवान्ये गुरवश्चैव बान्धवाः ।।
तेषां वाक्यावमानेन दुःखं स्यात्तु पदे पदे ।।२१।।
इतोऽरण्यं त्वयि गते रुदन्ति पितृमातरः ।।
महाभारं परित्यज्य कथं यास्यसि मे सुत ।।२२।।
रुदन्ति बान्धवाः सर्वे हाहा बाल कुमारक ।।
रुदन्ति गुरुवश्चापि स्वजना भृत्यवर्गकाः ।।२३।।
आचार्य उवाच- गेहे पित्रोरिदं कष्टं स्वर्गे च पितृदेवनम् ।।
का गतिस्ते भवेत् पुत्र! पित्रोः संतोषणं विना ।।२४।।
माता गङ्गासमं तीर्थं पिता पुष्करसंमितः ।।
गुरुः केदारकं तीर्थं भ्राता तीर्थं पुनःपुनः ।।२५।।
माता तीर्थं पिता तीर्थं तीर्थं स्वजनबान्धवाः ।।
वचने च गुरुस्तीर्थं गुरुरभ्यागतः परः ।।२६।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

n Public Domain. Digitization by eGangotri.Funding

एतद्वाक्यं मयोक्तं ते जानीहि हितकारणम् ।।
उत्साहवृद्धिं माङ्गल्यं कुरु पुत्र ! गृहे वसन् ।।२७।।

वसिष्ठ उवाच - ततो हृष्टा तस्य माता पिता हर्षेण संयुतः ।।
सहर्षा बान्धवा भृत्या वादित्रं बहु वादितम् ।।२८।।
भक्ष्यभोज्यलेह्यपेयचोष्यादिविविधै रसैः ।।
भोजनं कारयामासुर्बालस्य परिचारकाः ।।२९।।

सुत उवाच-

भरणं पोषणं चैव भोजनं रससंयुतम् ।।
कारितं मे त्वया तात ! प्रियदेव नमोस्तुते ।।३०।।
गुरुणा सर्वशास्त्राणि दत्तानि ज्ञानवृद्धये ।।
गुरुसन्तोषणार्थाय दक्षिणा दातुमुत्सहे ।।३१।।
वर्षद्वादशकालीनव्रतपूर्त्यै च दक्षिणा ।।
हिताय मम भो तात दीयतां गौः सदक्षिणा ।।३२।।
यो धर्मशीलो यजमानतोषी विद्याविनीतो न परप्रतापी ।
स्वदारतुष्टः परदारवर्जी न तस्य लोके भयमस्ति किंचित् ।।३३।।
न किंचित् पर्वता भारा न किंचित् सप्त सागराः ।।
स्वामिद्रोहकृता भारा भारा विश्वासघातकाः ।।३४।।

- इति देशान्तर कथा -

pal Sanskrit University, Balmeeki Campus, Kathman

0. In Public Domain. Digitization by eGangotri.Funding: M

॥
॥२७॥
॥
॥२८॥
॥
॥२९॥
ी ।
॥३३॥

स्नातकनियमाः

स्नातकनियमाः – स्नातकस्य नियमा आचार्यमुखाच्छ्रोतव्याःनृत्यगीतवादित्रत्यागः, न तत्र गमनम् । अमार्गेण न गच्छेत्, नग्नो न स्नायात्, न संधिशयनम्, न विषमभूमिलङ्घनम् । अश्लीलं नोपवदेत्, उदितास्तमये सूर्यं नोपपश्येत् । जलमध्ये सूर्यमाकाशस्थं न पश्येत् । देवे वर्षति न गच्छेत्, गमनावश्यकत्वेऽनाच्छादित एव, अनेन प्रकारेण विनियोगपुरसरं मन्त्रं पठित्वा गच्छेत् । तत्र विनियोगः – **ॐ अयमिति** मन्त्रस्य प्रजापतिर्ऋषिर्वज्रो देवता जगतीछन्दो वृष्टिजपे विनियोगः। **ॐ अयम्मेवज्रःपाप्मानमपहनत्।।** इमं मन्त्रं जपन् गच्छेत् । जले प्रतिबिम्बितं स्वमुखं न पश्येत् । भ्रूनेत्रादिस्थाने रोमरहितां श्मश्र्वादिना पुरुषाकृतिञ्च स्त्रियं नोपहसेत्, न च गच्छेत् । षण्ढञ्च नोपहसेत्, गर्भिणीं विजन्येति नकुलं सकुलमिति, कपालं भगालमिति, इन्द्रधनुर्मणिधनुरिति, पर्यायशब्दैर्ब्रूयान्न स्वशब्दैः । वत्सं पयो धापयन्तीं गां परस्मै (गौस्ते पयःपाययति वत्सम्) इति तत्स्वामिने न कथयेत् ।

सस्यवत्यां तृणादिनाऽनाच्छन्नायाञ्च भूमौ उत्सर्पन् ऊर्ध्वः सन् वा मूत्रं पुरीषञ्च न कुर्यात् । स्वयं प्रशीर्णेन काष्ठेन, लोष्ठादिना वा गुदं प्रमृज्य शौचं कुर्यात् । नील्यादिना रक्तं वस्त्रं न परिदधीत । दृढसङ्कल्पः स्यात्, घातादात्मानं यथाशक्ति परञ्च त्रायेत आत्मानं सर्वतो रक्षेत्, सर्वेषां हितकारी भवेत् । इति स्वगृह्योक्ता नियमाः । मन्वादिस्मृत्युक्तान् नियमाँश्च यथाशक्त्यनुतिष्ठेत् ।

समावर्त्तानन्तरं त्रिरात्रनियमाः – तिस्रोरात्रीर्व्रतं चरेत्, मृण्मयेन पात्रेण जलं न पिबेत्, एतच्चालाबुतुम्ब्यादीनामुपलक्षणम् । स्त्रीशूद्रशवकाककुक्कुराणां दर्शनं भाषणञ्च त्रिरात्रं वर्जयेत् । मृताशौचान्नम्, शूद्रस्य भोज्यान्नस्य नापितादेरपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

n Public Domain. Digitization by eGangotri.Funding

अन्नं जाताशौचान्नं च नाद्यात् । मूत्रपुरीषे ष्ठीवनञ्चातपे न कुर्यात् । छत्रवस्त्रादिना सूर्यादात्मानं गोपायेत् । शौचादींस्तप्तजलेन कुर्यात्। दीपादि प्रज्वलय्य रात्रौ भोजनं कुर्यान्नन्धकारे । अथवा सत्यवदनमेव नियमं कुर्यात्। अनृतं मिथ्याभाषणं न कुर्यात् । एवं शिक्षयित्वा एतान्नियमान्करिष्यामीति बटुमवधार्य एनं बटुं स्वपादयोः पातयित्वा आचार्यः पूर्णाहुतिं जुहुयात् ।

स्नातकले पालन गर्नुपर्ने नियमहरू आचार्यले सुनाइदिनू ।

पालन गर्नुपर्ने नियम-

नाच, गान, बजान नगर्नू, अरूले गर्न लागेको ठाउँमा हेर्न पनि नजानू, विनाकाम राती यताउता कतै नजानू, पानीमा निहुरेर नहेर्नू, रुख नचढ्नू, रुखबाट त्यसै फलफूलहरू नझार्नू, सन्ध्यावेला उल्लंघन नगर्नू, साँझ-विहानको सन्ध्याकर्म समयमा गर्नू । ब्राह्मण, गाई, आगो, अर्काकी स्वास्नी, महादेव, वसाहा, अरु मान्यजनहरूको बीचबाट नहिंड्नू, नाङ्गै ननुहाउनू, खाल्टोहरू नाघेर नहिंड्नू, लाज, भाँड र अर्कालाई मर्का पर्ने बोली मुखबाट ननिकाल्नू । उदाउने-अस्ताउने बेलाका, मध्याह्नका र ग्रहण लागेका सूर्यलाई नहेर्नू र पानीमा सूर्यको छायाँ पनि नहेर्नू, कसैसँग भिक्षा नमाग्नू, पानी परेको बेलामा टाउको ढाकेर नहिंड्नू बरु ॐ अयं मे वज्रः पाप्मानमपहनत् भन्ने मन्त्र जप्तै हिंड्नू ।

पानीमा छायाँ नहेर्नु, जुङ्गा, रेखी आएका स्त्रीहरू र नपुंसक देखेर निन्दा नगर्नु, गर्भिणी स्त्रीलाई देखेर पेट बोकेकी नभन्नू, विजन्या भन्नू, न्याउरी मूसोलाई सकुल, कपाललाई भगाल र इन्द्रधनुलाई मणिधनु भन्नू । अर्थात् उही नाम लिएर नभन्नू, गाईले दूध खुवाउन लागेको रहेछ भने नभनिदिनू, खेती भएको उर्वरभूमिहरूमा, खाली भूइँमा सुकेका झासझूस झारपातहरू केही नविच्छ्याई हिंड्दै, उठेर दिशापिशाबहरू नगर्नू, दिशा गरेर पानीले धुनुभन्दा अघि सुकेर झरेका काठ एवं माटाका डल्लाहरूले मात्र पुछ्नू ।

विरुप कपडा नलगाउनू, आँटेको काम पूरा गर्ने, खतरा, आत्महत्या तथा परहत्याबाट आफूलाई बचाएर हिंड्नू । आफन्त र पराई सबैको मित्र भएर रहनु।

pal Sanskrit University, Balmeeki Campus, Kathman

0. In Public Domain. Digitization by eGangotri.Funding: M

समावर्त्तनपछि तीन रात्रिका नियम –

व्रतबन्ध गरेर समावर्त्तन भइसकेपछि चलनअनुसार सके छ महीना नभए तीन दिन मात्र भए पनि ब्रह्मचर्यव्रतमा रहनू, मासु नखानू, माटाका भाँडाहरूमा पानी इत्यादि नपिउनू, जथाभावी अरू सुवासिनीहरूलाई हेर्ने र उनीहरूँग बोल्ने, कुराकानी गर्ने नगर्नू। मरेको लाश, काग, कुकुरहरूलाई हेर्ने र तिनलाई बोलाउने, बोल्ने नगर्नू, सूर्यतिर फर्केर दिशा पिशाब गर्ने र थुक्ने नगर्नू, टाउकोमा घाम परे पनि कपडाले छेक्ने गर्नू, शौच स्नानहरू गर्दा तातो पानीले नगर्नू, बत्ती बालेर मात्र खानू, अँध्यारोमा नखानू, साँचो मात्र बोल्ने गर्नू, झूठो साक्षी नबस्नू, खाली नून नखानू, दूधमा नून मिसाएर नखानू, तामाको भाँडामा राखेको दूध नखानू, अर्काको निन्दा, चर्चा, उपहास नगर्नू, अर्काको छिद्र हेर्ने विचार गर्ने नगर्नू, परस्त्रीसँग बसउठ गर्ने सँगै बस्ने इत्यादि नगर्नू, रीस नगर्नू, ब्रह्मचारी विद्यार्थीले आफूलाई धक्का पर्ने काम र विचार पनि नगर्नू, गुरुको सेवा गर्नू, बिहान-बेलुका सन्ध्या वन्दन, जप, पाठपूजा, होम गर्नू, नित्यस्नान, तर्पण गर्नू, यथाशक्य हविष्य भोजन गर्नू, आमिष भोजन नगर्नू, सज्जनको मात्र संगत गर्नू, देवता गाई बाह्मण अतिथिहरूलाई मान्नू, तिनको पूजा गर्नू, आफ्नो कुलाचारमा रहनू, आफ्नो कुलको, कुलका परिवारको भरणपोषण गर्नू, आफ्नो धनसम्पत्तिहरूमा सन्तोष गर्नू, अर्काको चीजमा लोभ नगर्नू, असल काम गर्नू, स्वामिद्रोह, देशद्रोह, राजद्रोह नगर्नू, अनाचार नगर्नू, अपवित्र नरहनू, गुरुजन, देवता, ब्राह्मणको निन्दा नगर्नू, छुल्याई नगर्नू, आफ्नो धर्ममा रहनू, आफ्नो धर्म नछोड्नू, यति उपदेश गरिसकेपछि कुमारलाई ब्रह्मचर्यव्रतसहित पढाई पूरा भएपछि यथासमय विवाह गरेर गृहस्थाश्रम गर्ने कुरा पनि सुनाइदिनुपर्छ।

आचार्याय गोदानम् –

वि.नि. – कुमारका पिता अथवा कर्ताले कुमारलाई साथमा लिएर बस्नू। गाई अथवा गाईको सट्टा दिइने द्रव्य अगाडि राखी तलको मन्त्रले पूजा गर्नू। तथा गाई दिइने ब्राह्मणको पनि पूजा गरी सङ्कल्पपूर्वक ब्राह्मण (आचार्य) को हातमा राखिदिनू –

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

n Public Domain. Digitization by eGangotri.Funding

ॐ नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ।।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ।।
ॐ गवे नमः ॐ गोप्रत्याम्नायीभूतसुवर्णद्रव्याय नमः ।

गोदानसङ्कल्पः – ॐ अद्येह अमुकगोत्रः, अमुकप्रवरः, अमुकशर्मा/वर्मा अहं मम ब्रह्मचर्यव्रतान्तरकृतैतत्समावर्त्तनस्नानकर्मणः चूडोपनयनवेदारम्भसमावर्त्तनकर्मणो वा साङ्गतासिद्ध्यर्थमिमां सालङ्कारां सवत्सां गां रुद्रदेवताकां तत्प्रत्याम्नायीभूतं द्रव्यं सुवर्णमग्निदैवतं रजतं वा चन्द्रदैवतम् अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय आचार्याय दक्षिणा-त्वेन तुभ्यमहं सम्प्रददे तत्सन्न मम ।

ॐ कपिले सर्वदेवानां पूजनीयासि रोहिणि ।
तीर्थदेवमयी यस्मात् तस्माच्छान्तिं प्रयच्छ मे ।।
ॐ गावो मे अग्रतः सन्तु गावो मे सन्तु पृष्ठतः ।
गावो मे हृदये सन्तु गवां मध्ये वसाम्यहम् ।।

दानप्रतिष्ठा – हरिः ॐ तत्सत् पूर्वसंकल्पसिद्धिरस्तु, अद्येह अमुकगोत्रः, अमुकप्रवरः, अमुकशर्मा/वर्मा अहं मम कृतैतद्गोप्रत्याम्नायीभूत-सुवर्णरजतात्मकद्रव्यदानकर्मणः साङ्गतासिद्ध्यर्थम् तत्प्रतिष्ठार्थम्, इमां दक्षिणां रजतखण्डं चन्द्रदेवताकं ताम्रखण्डं वा श्रीसूर्यदेवताकं अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे । ॐ तत्सन्न मम।

ब्राह्मणले ॐ स्वस्ति भनेर लिनू र ॐ द्यौः शान्तिः इत्यादि मन्त्र पढेर कुमारलाई अभिषेक गरिदिनू ।

पूर्णाहुतिहोमः –

वि.नि. – अब उठेर कुमारका हातबाट सुरोमा एउटा सुपारी अथवा नरिवल आदि राख्न लगाएर घ्यूको धारा लगाउँदै विनियोगसहित तलको मन्त्रले अग्निमा पूर्णाहुति होम गर्न लगाउनू –

pal Sanskrit University, Balmeeki Campus, Kathman

0. In Public Domain. Digitization by eGangotri.Funding: M

विनियोगः – ॐ मूर्धानमिति मन्त्रस्य भरद्वाज ऋषिस्त्रिष्टुप् छन्दोऽग्नि-र्देवता अत्र पूर्णाहुतिहोमे विनियोगः ।

पूर्णाहुतिमन्त्रः –

ॐ मूर्धानन्दिवोऽअरतिं पृथिव्या वैश्वानरमृतऽआजातमग्निम्।।
कविꣳसम्राजमतिथिं जनानामासन्ना पात्रं जनयन्त देवाः स्वाहा।।

भूयसीदक्षिणा –

वि.नि. – कुमारको पिताले कुमारलाई सँगै लिएर दक्षिणा दिने दक्षिणा द्रव्य अगाडि राखी पूजा गरेर सङ्कल्प गर्नू –

ॐ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ।।
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ।।
ॐ देयद्रव्याय नमः ॐ दक्षिणाद्रव्याय नमः ।

दक्षिणासङ्कल्पः – हरिः ॐ तत्सत् पूर्वसंकल्पसिद्धिरस्तु– अद्येह अमुक-गोत्रः, अमुकप्रवरः, अमुकशर्मा/वर्मा अहं मम अमुकनाम्नः, अस्य कुमारस्याद्यकृतैतच्चूडोपनयनवेदारम्भसमावर्त्तनकर्मणः साङ्गतासि-द्ध्यर्थं न्यूनातिरिक्ततादिदोषपरिहारार्थं च इमां भूयसीदक्षिणां हिरण्य-मग्निदैवत्यं रजतं चन्द्रदेवताकं ताम्रं श्रीसूर्यदेवताकं यथानामगोत्रेभ्यो यथानामशर्मभ्यो ब्राह्मणेभ्यः कन्याकुमारीसुवासिन्यादिभ्यश्च यथाभागं विभज्य दातुं समुत्सृजे । ॐ तत्सन्न मम।।

विसर्जनम् –

वि.नि. – हातमा फूल र अक्षता लिएर निम्नलिखित मन्त्र पढ्दै त्यहाँ स्थापना गरिएका देवताहरूलाई चढाई नमस्कार गर्नू र विसर्जन गरिदिनू–

ॐ यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।
तेहनाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्तिदेवाः ।।१।।
ॐ उत्तिष्ठ बह्मणस्पते देवयन्तस्त्वेमहे ।
उप प्रयन्तु मरुतः सुदानव इन्द्र प्राशूर्भवा सचा ।।२।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

n Public Domain. Digitization by eGangotri.Funding

ॐ यज्ञ यज्ञं गच्छ यज्ञपतिं गच्छ स्वां योनिं गच्छ स्वाहा ।
एष ते यज्ञो यज्ञपते सहसूक्तवाकः सर्ववीरस्तज्जुषस्व स्वाहा ।।३।।
ॐ उस्त्रावेतं धूर्षाहौ युज्येथामनश्रूऽअवीरहणौ ब्रह्मचोदनौ ।
ॐ स्वस्ति यजमानस्य गृहान् गच्छतम् ।।४।।
ॐ यान्तु देवगणाः सर्वे पूजामादाय पार्थिवीम् ।
इष्टकामप्रसिद्ध्यर्थं पुनरागमनाय च ।।१।।
गच्छ गच्छ सुरश्रेष्ठ स्वस्थानं परमेश्वर ।
यत्र ब्रह्मादयो देवास्तत्र गच्छ सुरेश्वर ।।

विष्णुस्मरणम् –

ॐ प्रमादात् कुर्वतां कर्म प्रच्यवेताध्वरेषु च ।
स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः ।।१।।
ॐ यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ।।२।।
ॐ अच्युताय नमः ॐ अच्युताय नमः ॐ अच्युताय नमः ।
ॐ चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च ।।
हूयते च पुनर्द्वाभ्यां स मे विष्णुः प्रसीदतु ।
श्रीयज्ञपुरुषः प्रीयताम् ।।

कर्मसमर्पणम् –

ॐ कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वा प्रकृतिस्वभावात्।
करोमि यद्यत् सकलं परस्मै नारायणायेति समर्पये तत् ।।

यसपछि ब्राह्मणका हातबाट आशीर्वादसहित अभिषेक, रक्षाबन्धन, तिलक, फूलप्रसादग्रहण गरी ब्राह्मणहरूलाई दक्षिणा दिएर भोजन गराउनू ।

यसमा कुमारलाई पनि सँगै राखेर विधिपूर्वक मन्त्र पढी बलि र प्राणाहुतिहरू गर्न लगाई मौन धारण गरेर भोजन गर्न लगाउनू ।

– इति समावर्त्तनविधिः –

pal Sanskrit University, Balmeeki Campus, Kathman

0. In Public Domain. Digitization by eGangotri.Funding: M

ग्रहशान्तिविधिः

ग्रहस्थापनाप्रकारः -

मध्ये तु भास्करं विद्याच्छशिनं पूर्वदक्षिणे ।
दक्षिणे लोहितं विद्याद्बुधं पूर्वोत्तरेण तु ।।१।।
उत्तरेण गुरुं विद्यात् पूर्वेणैव तु भार्गवम् ।
पश्चिमेन शनिं विद्याद् राहुं पश्चिमदक्षिणे ।।२।।
पश्चिमोत्तरतः केतून् स्थापयेच्छुक्लतण्डुलैः ।

ग्रहस्वरूपनिर्देशः -

वर्तुलं भास्करं विद्यादर्धचन्द्रं निशाकरम् ।।३।।
अङ्गारकं त्रिकोणं च बुधं च धनुराकृतिम् ।
पद्माकृतिं गुरुं विद्याच्चतुष्कोणञ्च भार्गवम् ।।४।।
पुरुषाकृतिं शनिं विद्याद्राहुं च मकराकृतिम् ।
खड्गाकृतीन् हि केतूँश्च सन्त्येवं ग्रहमूर्तयः ।।५।।

ग्रहवर्णाः -

भौमार्कौ रक्तवर्णौ च श्वेतौ शुक्रनिशाकरौ ।
बुधजीवौ सुवर्णाभौ कृष्णौ राहुशनैश्चरौ ।।६।।
केतवो बहुवर्णाश्च सर्वे तेजोमया ग्रहाः । इति ।

ग्रहाणां समिधः -

अर्कः पलाशः खदिरो ह्यपामार्गोऽथ पिप्पलः ।
उदुम्बरः शमी दूर्वा कुशाश्च समिधः क्रमात् ।।१।। इति।

देवस्थापनाप्रकारः -

पूर्वे गणपती रक्तो ब्रह्मा पीतश्च दक्षिणे ।
विष्णुः कृष्णः पश्चिमायां शिवः श्वेतस्तथोत्तरे ।।१।। इति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

n Public Domain. Digitization by eGangotri.Funding

ग्रहप्रभावः

स्कन्दपुराणे- सुखोपविष्टं गार्ग्यं तु कौशिकः परिपृच्छति ।
निखिलां ग्रहशान्तिं मे भगवन् वक्तुमर्हसि ।।१।।

गार्ग्य उवाच - देवदानवगन्धर्वा यक्षराक्षसकिन्नराः ।
पीडिता ग्रहपीडाभिः किं पुनर्भुवि मानवाः ।।२।।
शनैश्चरेण सौदासो नरमांसे नियोजितः ।
राहुणा पीडितो राजा नलो भ्रान्तो महीतले ।।३।।
अङ्गारकविरोधेन रामो राष्ट्राद्विवासितः ।
अष्टमेन शशाङ्केन हिरण्यकशिपुर्हतः ।।४।।
रविणा सप्तमस्थेन हतो राजा सुयोधनः ।
पाण्डवा बुधपीडायां विकर्मणि नियोजिताः ।।५।।
षष्ठेनोशनसा युद्धे हिरण्याक्षो निपातितः ।
एते चान्ये च बहवो ग्रहदोषैः सुपीडिताः ।।६।।

प्रयोगः- कर्ता पूर्वदिने हविष्याशनादिनियमान् कृत्वा प्रथमं गृहादीशानदिग्भागे भूमिं मार्जनादिसंस्कारैः संशोध्य गन्धाद्युपचारान्संपाद्य मण्डपनिर्माणनिर्विघ्नतायै गणेशं संपूज्य भूमिकूर्मानन्तान् पूजयेत् ।

भूमिपूजा

ध्यानम्-

चतुर्भुजां शुक्लवर्णां कूर्मपृष्ठोपरि स्थिताम् ।
पद्मशङ्खचक्रशूलधरां स्मितवराननाम् ।।

इति भूमिं ध्यायेत् ।

bal Sanskrit University, Balmeeki Campus, Kathmar

0. In Public Domain. Digitization by eGangotri.Funding: M

आवाहनम् - आगच्छ सर्वकल्याणि वसुधे लोकधारिणि ! ।
पृथिवि ब्रह्मदत्तासि कश्यपेनाभिवन्दिता ।।

पूजनम्- ॐ भूरसि इति वैदिकमन्त्रेण ॐ भूम्यै नमः इति नाममन्त्रेण वा गन्धाद्युपचारैर्भूमिमर्चयेत् ।

पूजानिवेदनम्- उपचारानिमाँस्तुभ्यं ददामि परमेश्वरि ।
भक्त्या गृहाण देवेशि त्वामहं शरणं गतः ।।

प्रार्थना- पूजिते परमाचार्यैर्गन्धमाल्यैरलङ्कृते ।
भवभूतिकरी देवि ! गृहे भार्गवि रम्यताम् ।। इति ।

एवम् **ॐ कूर्माय नमः** इत्यनेन कूर्मपूजां विधाय **ॐ अनन्ताय नमः** इत्यनेन अनन्तं पूजयेत्। ततो मार्जनादिप्रकारैर्भूमिं संशोद्ध्य **आपोहिष्ठा०** इत्यादिमन्त्रैः पञ्चगव्येनाभ्युक्षेत् । एवं शोधितायां भूमौ मण्डपादिकं कुर्यात्। तत्र मण्डपमध्ये हस्तखातविस्तारं समचतुरस्रं योन्यादियुतं कुण्डं कुर्यात्। तदशक्तौ तावन्मात्रं चतुरङ्गुलोच्छ्रितं स्थण्डिलं निर्माय तदीशानभागे नवग्रहस्थापनाय हस्तविस्तृतां वितस्त्युच्छ्रितां वप्रद्वयावृतां समचतुरस्रामुदक्प्रवणां ग्रहवेदीं कुर्यात् । तस्या प्रथमो वप्रो द्व्यङ्गुलोच्छ्रायो द्वितीयस्त्र्यङ्गुलोच्छ्रायो द्वावपि द्व्यङ्गुलविस्तारौ कर्तव्यौ । तत्र वेदीमध्येऽष्टदलकमलं निर्माय तत्तद्वर्णचूर्णेन पूरयित्वा कर्णिकायां पत्रेषु च यथोक्तमण्डलेषु प्रतिमासु वा दध्यक्षतपुञ्जेषु वा ग्रहाणामावाहनं कुर्यात् ।

तत्र कर्ता कर्मदिवसे प्रातरुत्थाय स्नानसन्ध्यादि नित्यकर्म समाप्य सर्वां नवग्रहपूजासामग्रीं संपाद्य दीपं प्रज्ज्वलय्य प्राङ्मुख उपविश्याचम्य स्वस्तिवाचनं कृत्वा गणेशादिपञ्चायतनदेवान् गुरुञ्च प्रणम्य तेषु पुष्पाञ्जलिं समर्प्य सूर्यायार्घ्यं दत्त्वा भूतोत्सादनं कुर्यात् ।

भूतोत्सादनम्- ॐ अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिताः ।
ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ।।

इति मन्त्रेण मण्डपं परितः सर्षपाक्षतान् विकिरेत् । ततः कर्मपात्रं निर्मायार्घ्यं संस्थाप्य प्राणायामं कृत्वा प्रधानसङ्कल्पं कुर्यात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

n Public Domain. Digitization by eGangotri.Funding

सङ्कल्पः- यवतिलकुशजलान्यादाय- ॐ अद्येहेत्यादिदेशकालकीर्तनान्ते अमुकगोत्रोऽमुकप्रवरोऽमुकराशिरमुकशर्माहम् अमुकराशेरमुकशर्मणोऽस्य कुमारस्य बीजगर्भसमुद्भवैनोनिबर्हणद्वारा आयुर्वर्चोमेधाभिवृद्धये श्रीपरमेश्वरप्रीतये च अद्य श्वो वा चौलसंस्कारं करिष्ये ।

चौलोपनयनयोः सहकरणपक्षे- तथास्य द्विजत्वसिद्ध्या वेदाध्ययनाद्यधिकारसिद्धये श्रीपरमेश्वरप्रीतये च उपनयनं करिष्ये । इति ।

चौलोपनयनवेदारम्भाणां सहकरणपक्षे- तथास्य श्रौतस्मार्तकर्मानुष्ठानाधिकारसिद्धये श्रीपरमेश्वरप्रीतये च वेदारम्भं करिष्ये । इति ।

तद्दिने वा चतुर्थके इति वचनमाश्रित्य **चौलोपनयनवेदारम्भ समावर्तनानां सहकरणपक्षे**- तथास्य गृहस्थाश्रमार्हतासिद्धिद्वारा श्रीपरमेश्वरप्रीतये समावर्तनाख्यं कर्म करिष्ये । इति ।

कन्याविवाहे- ममास्याः कन्याया बीजगर्भसमुद्भवदुरितनिबर्हणपूर्वकं भर्त्रा सह धर्मप्रजोत्पादनद्रव्यपरिग्रहेष्वधिकारसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं विवाहसंस्कारं करिष्ये । इति ।

पुत्रविवाहे- ममास्य पुत्रस्य देवर्षिपित्रर्णापाकरणहेतुधर्मप्रजोत्पादनसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं विवाहसंस्कारं करिष्ये । इति ।

एतेष्वन्यतमसंकल्पं कृत्वा तत्कर्माङ्गत्वेन तत्तत्कर्मनिमित्तककरिष्यमाणग्रहयागकर्मणश्च पूर्वाङ्गत्वेन सकलमङ्गलाभिवृद्धये च गणेशपूजनं पुण्याहवाचनं मातृकापूजनमाभ्युदयिकश्राद्धञ्च सकृत्करिष्ये । इति संकल्प्य तानि विधाय ग्रहयागसङ्कल्पं कुर्यात् ।

ग्रहयागसङ्कल्पो ब्राह्मणवरणसङ्कल्पश्च- ॐ अद्येहेत्यादि देशकालकीर्तनान्ते अमुकगोत्रोऽमुकप्रवरोऽमुकराशिरमुकशर्माहम् मम तथास्य कुमारस्य दशावि-दशान्तर्दशास्थितादित्यादिग्रहसूचितदुष्टफलोपशान्तिपूर्वकशुभफलप्राप्तये, करिष्यमाणकर्मणि सर्वोपद्रवशान्तिपूर्वकं दीर्घायुरारोग्यहर्षविजय-

bal Sanskrit University, Balmeeki Campus, Kathman

0. In Public Domain. Digitization by eGangotri.Funding: M

प्राप्तये, श्रीपरमेश्वरप्रीत्यर्थं च अमुककर्मनिमित्तकं ग्रहयागं करिष्ये, तत्पूर्वाङ्गत्वेन आचार्यादीनां वरणञ्च करिष्ये । इति संकल्पं कुर्यात् ।

ब्राह्मणवरणम्- आचार्यमुदङ्मुखमुपवेश्य चन्दनाक्षतपुष्पमालावस्त्रादिभिः संपूज्य- ॐ अद्येहामुकगोत्रममुकवेदाध्यायिनममुकशर्माणं ब्राह्मणमेभिश्चन्दन-पुष्पाक्षतवस्त्रादिभिर्नवग्रहमखे आचार्यत्वेन **त्वामहं वृणे,** इति वरणसामग्री-माचार्यहस्ते दद्यात् । **ॐ वृतोस्मीति** प्रतिवचनम् ।

एवं होतारमुपवेश्य चन्दनवस्त्रादिभिः संपूज्य- ॐ अद्येहामुकगोत्र-ममुकवेदाध्यायिनममुकशर्माणं ब्राह्मणमेभिश्चन्दनपुष्पाक्षतवस्त्रादिभिर्नवग्रहमखे होमं कर्तुं होतृत्वेन **त्वामहं वृणे,** इति वरणसामग्रीं होत्रे दद्यात् । एवं ब्रह्माणमुपवेश्य पुष्पचन्दनपुष्पाक्षतवस्त्रादिभिर्नवग्रहमखे होमकर्मणि कृताकृता-वेक्षणरूपब्रह्मकर्म कर्तुं **ब्रह्मत्वेन त्वामहं वृणे** इति वरणसामग्रीं ब्रह्मणे दद्यात् । **ॐ वृतोस्मीति** प्रतिवचनम् ।

एवं सूक्तजपार्थं ब्राह्मणमुपवेश्य चन्दनपुष्पवस्त्रादिभिः संपूज्य- ॐ अद्येहामुकगोत्रममुकवेदाध्यायिनममुकशर्माणं ब्राह्मणमेभिश्चन्दनपुष्पाक्षत-वस्त्रादिभिर्नवग्रहमखे सूक्तजपं कर्तुं जापकत्वेन **त्वामहं वृणे** इति वरणसामग्रीं जापकब्राह्मणहस्ते दद्यात् । **ॐ वृतोस्मि** इति प्रतिवचनम् । एवं वेदपाठक-मन्त्रजापकद्वारपालादीनां वरणं कुर्यात् - **ॐ यथाविहितं कर्म कुरुत** इति सर्वान् प्रति यजमानो ब्रूयात् **ॐ करवाम** इति प्रतिवचनम् ।

अत्रावसरे चत्वार ऋत्विज एको ब्रह्माऽपरो होता इत्येवं स्वगृह्योक्त-विधिनाग्निस्थापनं कुर्युः ।

परिसमूहनम्- तच्चैवं याजुर्वेदिकेन विधिना- **ॐ यद्देवादेवहेडनन्देवा-सश्चकृमावयम् । अग्निर्म्मातस्मादेनसोविश्श्वान्मुञ्चत्त्वꣳहसः ।।१।। ॐ यदिदिवायदिनक्तमेनाꣳसिचकृमावयम् । वायुर्म्मातस्मादेनसोवि-श्श्वान्मुञ्चत्त्वꣳहसः ।।२।। ॐ यदिजाग्ग्रद्यदिस्वप्नऽएनाꣳसिच-**

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

n Public Domain. Digitization by eGangotri.Funding

कृमाव्वयम् । सूर्य्योमातस्मादेनसोव्विश्श्वान्मुञ्चत्त्वꣳहसः ॥३॥ इति मन्त्रेण कुशैर्वेदीं समां कुर्यात् ।

गोमयोदकेनोपलेपनम्- ॐ **मानस्तोकेतनयेमानऽआयुषिमानोगोषु-मानोऽअश्श्वेषुरीरिषः । मानोव्वीरान्नुद्रभामिनोव्वधीर्हविष्मन्तःसदमित्त्वा-हवामहे ॥४॥** ॐ **त्वां वृत्रेष्विन्द्रे**त्युल्लिख्य, ॐ **व्व्रतङ्कृणुत॰ व्व्रजङ्गच्छे**त्युद्धृत्य, ॐ **देवस्यत्वे**त्यभ्युक्ष्य, ॐ **अग्निर्म्मूर्द्धे**त्यग्निमुप-समाधाय, ॐ **समिधाग्निन्दुवस्यते**ति समिधमादध्यात् ।

ॐ **मयिगृह्णामी**त्यग्नेरभ्युक्षणं कृत्वा ॐ **हिरण्यगर्ब्भः** इति दक्षिणतो ब्रह्मासनम्, ॐ **आपोहिष्ठे**त्युतरतः प्रणीता, ॐ **कयानश्चित्र** इति परिस्त-रणम्, ॐ **पवित्रेस्त्थोव्वैष्णव्या**विति पवित्रे द्वे, ॐ **इषेत्त्वे**त्याज्यनिरूपणम्, ॐ **त्रातारमिन्द्र**मिति स्रुवं प्रतप्य, ॐ **अनिशितोसी**ति स्रुवसंमार्जनम्, ॐ **प्रत्युष्टꣳरक्षः** इति पुनः प्रतपनम्, ॐ **सवितुर्वः प्प्रसवऽउत्पुनामी**त्युत्प-वनम्, ॐ **तदेवाग्निरि**त्युद्दीङ्गनम्, ॐ **समिधाग्नि**मिति समिदाधानम्, ॐ **भूरसी**ति पर्युक्षणम् ।

ततः प्रणीतापात्रे पवित्रे निधाय पातितदक्षिणजानुः कुशेन ब्रह्मणान्वा-रब्धः समिद्धतमेंऽग्नौ स्रुवेणाज्याहुतीर्जुहोति । आहुत्यनन्तरं स्रुवावस्थितहुत-शेषघृतस्य प्रोक्षणीपात्रे प्रक्षेपः । ॐ **प्रजापतये स्वाहा, इदं प्रजापतये** इति मनसा । ॐ **सोमाय स्वाहा, इदं सोमाय** । ॐ **इन्द्राय स्वाहा, इदमिन्द्राय** । ॐ **अग्नये स्वाहा, इदमग्नये** । ॐ **सोमाय स्वाहा, इदं सोमाय** । ॐ **अन्तरिक्षाय स्वाहा, इदमन्तरिक्षाय** ।

अग्न्याधानम्- ॐ महाव्याहृतीनां प्रजापतिर्ऋषिरग्निवायुसूर्या देवता गायत्र्यु-ष्णिगनुष्टुभश्छन्दांसि अग्न्याधाने विनियोगः । ॐ **भूःस्वाहा, इदमग्नये** प्रोक्षणीपात्रेऽपि प्रक्षिपेत् । ॐ **भुवः स्वाहा, इदं वायवे** प्रो॰। ॐ **स्वः स्वाहा, इदं सूर्याय** प्रो॰। इति मूलहोमाहुतयः । एवं च वैदिकोऽग्निः संस्कृतो भवति ।

bal Sanskrit University, Balmeeki Campus, Kathman

0. In Public Domain. Digitization by eGangotri.Funding: M

ग्रहपूजा

कलशस्थापना- एवमग्नौ प्रणीते ग्रहवेद्या ईशानभागे पूर्वोक्तविधिना कलशं स्थापयेत् ।

मुरा मांसी वचा कुष्ठं शैलेयं रजनीद्वयम् ।
शाटीचम्पकमुस्ताश्च सर्वौषध्यो दश स्मृताः ।।

(**मुरा** = मयूरशिखा, **मांसी** = जटामांसी, **शैलेयम्** = शूल इति प्रसिद्धम् **रजनीद्वयम्**= हरिद्रा, **दारुहरिद्रा**= दार्वी/शाटी 'कचूर' इति प्रसिद्धम्, **चम्पकः** = प्रसिद्धः, **मुस्ता** = मोथा । एताः कलशजले स्थापनीयाः ।)

पूर्वोक्तप्रकारेण वारुणकलशस्थापनं विधाय गन्धपुष्पाक्षत-धूपदीपनैवेद्यवस्त्रादिभिः संपूज्य सूर्यादीनां स्थापनपूर्वकं पूजा कार्या ।

सङ्कल्पः- तत्र गुरुसहितो यजमानो यथोक्ताष्टदलयुतनवग्रहवेद्याः समीपे गत्वा आचम्य प्राणानायम्य कुशादीन्यादाय- ॐ अद्येहेत्यादिदेशकालौ स्मृत्वाऽमुकगोत्रोऽमुकप्रवरोऽमुकशर्माहं ग्रहयागकर्मणो यथोक्तफलावाप्तये यथोक्तप्रतिमासु अक्षतपुञ्जेषु वा सूर्यादिनवग्रहाणां दध्यक्षतपुञ्जेषु अधिदेवता-प्रत्यधिदेवतादीनां स्थापनं पूजनञ्चाहं करिष्ये इति संकल्प्य सूर्यादीन् स्थापयेत् पूजयेच्च ।

सूर्यपूजा- ॐ प्रणवस्य ब्रह्मा ऋषिः परमात्मा देवता गायत्रीच्छन्दो व्याहृतीनां क्रमेण विश्वामित्रजमदग्निभरद्वाजा ऋषयः अग्निवायुसूर्या देवता दैवी गायत्रीदैव्युष्णिग्दैवीबृहत्यश्छन्दांसि सूर्याद्यावाहने विनियोगः । केचित्त-त्तन्मन्त्रानप्यावाहने आहुः । तत्राष्टदलमध्ये कर्णिकायां वर्तुले द्वादशाङ्गुले रक्तमण्डले किरीटिनं पद्मारूढं हस्तद्वयधृतपद्मद्वयं लोहितवर्णं रक्ताम्बरधरं सप्ताश्वरथस्थं सप्तार्चिषं प्राङ्मुखं सूर्यं रक्तपुष्पाक्षतैरर्चयेत् ।

आवाहनम्- ॐ अग्निन्दूतम्पुरोदधेहव्यवाहमुपब्ब्रुवे । देवाँ।।ऽआसा-दयादिह ।। ॐ भूर्भुवः स्वः कलिङ्गदेशोद्भव काश्यपगोत्र सूर्य इहागच्छ इत्यावाह्य इह तिष्ठेति स्थापयेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

n Public Domain. Digitization by eGangotri.Funding

पूजनम्- एतानि पाद्यार्घ्याचमनीयपुनराचमीयस्नानीयानि समर्पयामि, ॐ श्रीसूर्याय नमः । ॐ आकृष्णेनरजसावर्त्तमानोनिवेशयन्नमृतम्मर्त्त्यञ्च। हिरण्ययेनसवितारथेनदेवोयातिभुवनानिपश्यन् ।। ॐ सूर्याय नमः। इदं रक्तचन्दनम्, एते रक्ताक्षताः, एतानि रक्तपुष्पाणि, ॐ सूर्याय नमः, एष धूपः, ॐ सूर्याय नमः, एष दीपः, इदं नैवेद्यम्, उपायनम्, ॐ सूर्याय नमः रक्तवस्त्रं बृहस्पतिदैवतम् ॐ सूर्याय नमः ।

सोमपूजा- तत आग्नेयदले चतुरस्रे चतुरङ्गुले श्वेतमण्डले किरीटिनं द्विभुजं वरगदाहस्तं श्वेतवर्णं श्वेताश्वरथस्थं सोममादित्याभिमुखं श्वेतपुष्पाक्षतैर्चयेत् ।

आवाहनम्- ॐ अप्स्वग्ग्नेसधिष्ट्वसौषधीरनुरुद्ध्यसे । गर्ब्भेसञ्जायसे पुनः ।। ॐ भूर्भुवः स्वः यमुनातीरोद्भव आत्रेयगोत्र सोम इहागच्छ इत्यावाह्य इह तिष्ठेति स्थापयेत् ।

पूजनम्- पाद्याद्युपचारैः - ॐ इमन्देवाऽअसपत्नꣳसुवद्ध्वम्महतेक्षत्राय महतेज्ज्यैष्ठ्यायमहतेजानराज्ज्यायेन्द्रस्येन्द्रियाय । इमममुष्ष्यपुत्रममुष्ष्यैपुत्रमस्यैविशऽएषवोमीराजासोमोस्म्माकम्ब्राह्मणानाꣳराजा ।। ॐ सोमाय नमः, इति सोमं पूजयेत् ।

भौमपूजा- ततो दक्षिणदले त्रिकोणे त्र्यङ्गुले रक्तमण्डले किरीटिनं रक्तवर्णं रक्तमाल्याम्बरधरं चतुर्भुजं वरशक्तिशूलगदाधरं मेषस्थमादित्याभिमुखं कुजं रक्तपुष्पाक्षतैरर्चयेत् ।

आवाहनम्- ॐ स्योनापृथिविनोभवानृक्षरानिवेशनी । यच्छानःशर्म्मसप्रथाः ।। ॐ भूर्भुवः स्वः अवन्तिदेशोद्भव भारद्वाजगोत्र भौम इहागच्छ इत्यावाह्य इह तिष्ठेति स्थापयेत् ।

पूजनम्- ॐ अग्ग्निर्म्मूर्द्धादिवःककुत्पतिःपृथिव्व्याऽअयम् । अपाꣳरेताꣳसिजिन्वति ।। ॐ भौमाय नमः, इति पाद्याद्युपचारैर्भौमं पूजयेत्।

bal Sanskrit University, Balmeeki Campus, Kathman

0. In Public Domain. Digitization by eGangotri.Funding: M

बुधपूजा- तत ईशानदले बाणाकारे चतुरङ्गुले पीतमण्डले किरीटिनं पीतवस्त्रं पीतमाल्यानुलेपनं पीतवर्णं चतुर्भुजं वरखड्गचर्मगदाहस्तं सिंहस्थमादित्याभिमुखं बुधं पीतपुष्पाक्षतैरर्चयेत् ।

आवाहनम्- ॐ इदंविष्णुर्विचक्रमेत्रेधानिदधेपदम् । समूढमस्यपाꣳसुरेस्वाहा ।। ॐ भूर्भुवः स्वः मगधदेशोद्भव आत्रेयगोत्र बुध इहागच्छ इत्यावाह्य इह तिष्ठ इति स्थापयेत् ।

पूजनम्- ॐ उद्बुद्ध्यस्वाग्नेप्रतिजागृहित्त्वामिष्टापूर्त्तेसꣳसृजेथामयञ्च । अस्मिन्त्सधस्त्थेऽअद्ध्युत्तरस्मिन्विश्श्वेदेवायजमानश्श्चसीदत ।। ॐ बुधाय नमः, इति पाद्याद्युपचारैर्बुधं पूजयेत् ।

बृहस्पतिपूजा- तत उत्तरदले दीर्घचतुरस्त्रे षडङ्गुले पीतमण्डले किरीटिनं पीतवर्णं पीतमाल्याम्बरधरं चतुर्भुजं वराक्षसूत्रदण्डकमण्डलुधरमादित्याभिमुखं बृहस्पतिं पीतपुष्पाक्षतैरर्चयेत् ।

आवाहनम्- ॐ इन्द्रऽआसान्नेताबृहस्प्पतिर्द्दक्षिणायज्ञःपुरऽएतुसोमः। देवसेनानामभिभञ्जतीनाञ्जयन्तीनाम्मरुतोयन्त्वग्ग्रम् ।। ॐ भूर्भुवः स्वः सिन्धुदेशोद्भव आङ्गिरसगोत्र बृहस्पते इहागच्छ इत्यावाह्य इह तिष्ठ इति स्थापयेत् ।

पूजनम्- ॐ बृहस्प्पतेऽअतियदर्य्योऽअर्हाद्द्युमद्विभातिक्क्रतुमज्जनेषु। यद्दीदयच्छवसऽऋतप्प्रजाततदस्म्मासुद्द्रविणन्धेहिचित्रम् ।(उपयामगृहीतोसिबृहस्प्पतयेत्त्वैषतेयोनिर्बृहस्प्पतयेत्त्वा) ।। ॐ बृहस्पतये नमः, इति पाद्याद्युपचारैर्बृहस्पतिं पूजयेत् ।

शुक्रपूजा- ततः पूर्वदले पञ्चकोणे नवाङ्गुले श्वेतमण्डले किरीटिनं श्वेतवर्णं श्वेतमाल्याम्बरधरं चतुर्भुजं वराक्षसूत्रदण्डकमण्डलुधरमादित्याभिमुखं शुक्रं श्वेतपुष्पाक्षतैरर्चयेत् ।

आवाहनम्- ॐ अदित्त्यैरास्न्नासीन्द्राण्याऽउष्णीषःपूषासिघर्म्मायदीष्व।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

n Public Domain. Digitization by eGangotri.Funding

ॐ भूर्भुवः स्वः भोजकटदेशोद्भव भार्गवगोत्र शुक्र इहागच्छ इत्यावाह्य इह तिष्ठ इति स्थापयेत् ।

पूजनम्- **ॐ अन्नात्त्परिस्त्रुतोरसंब्रह्मणाव्यपिबत्क्षत्रम्पयःसोमम्प्रजापतिः। ऋतेनसत्त्यमिन्द्रियंविपानंशुक्क्रमन्धसऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु।। ॐ शुक्राय नमः**, इति पाद्याद्युपचारैः शुक्रं पूजयेत् ।

शनिपूजा- ततः पश्चिमदले धनुराकारे द्व्यङ्गुले कृष्णमण्डले किरीटिनं कृष्णवर्णं कृष्णमाल्याम्बरधरं चतुर्भुजं वरत्रिशूलधनुर्बाणधरं गृध्रवाहनमादित्याभिमुखं शनिं कृष्णपुष्पाक्षतैरर्चयेत् ।

आवाहनम्- **ॐ प्रजापतेनत्त्वदेतान्यन्न्योविश्श्वारूपाणिपरिताबभूव। यत्त्कामास्तेजुहुमस्तन्नोऽअस्तुवयᳬस्यामपतयोरयीणाम्।। ॐ भूर्भुवः स्वः सौराष्ट्रदेशोद्भव काश्यपगोत्र शनैश्चर इहागच्छ इत्यावाह्य इह** तिष्ठ इति स्थापयेत् ।

पूजनम्- **ॐ शन्नोदेवीरभिष्टयऽआपोभवन्तुपीतये । शंय्योरभिस्त्रवन्तुनः ।। ॐ शनैश्चराय नमः**, इति पाद्याद्युपचारैः शनिं पूजयेत् ।

राहुपूजा- ततो नैर्ऋत्यदले शूर्पाकारे द्वादशाङ्गुले कृष्णमण्डले किरीटिनं कृष्णवर्णं कृष्णमाल्याम्बरधरं करालवदनं चतुर्भुजं वरखड्गचर्मधनुर्धरं सिंहस्थमादित्याभिमुखं राहुं कृष्णपुष्पाक्षतैरर्चयेत् ।

आवाहनम्- **ॐ आयङ्गौःपृश्निरक्क्रमीदसदन्मातरम्पुरः। पितरञ्चप्रयन्त्स्वः।। ॐ भूर्भुवः स्वः वैराटिनपुरोद्भव पैठिनसिगोत्र राहो इहागच्छ इत्यावाह्य इह तिष्ठ** इति स्थापयेत् ।

पूजनम्- **ॐ कयानश्चित्रऽआभुवदूतीसदावृधःसखा। कयाशचिष्ठायावृता ।। ॐ राहवे नमः**, इति पाद्याद्युपचारै राहुं पूजयेत् ।

केतुपूजा- ततो वायव्यदले ध्वजाकारे धूम्रमण्डले षडङ्गुले किरीटिनो धूम्रान् द्विभुजान् गदाहस्तान् विकृतमुखान् गृध्रवाहनानादित्याभिमुखान् केतून् धूम्रपुष्पाक्षतैरर्चयेत् ।

pal Sanskrit University, Balmeeki Campus, Kathmar

0. In Public Domain. Digitization by eGangotri.Funding: M

आवाहनम्- ॐ ब्रह्मजज्ञानम्प्रथमम्पुरस्ताद्विसीमतःसुरुचोवेनऽआवः। सबुध्न्याऽउपमाऽअस्यविष्ठाःसतश्श्चयोनिमसतश्श्चविवः ।। ॐ भूर्भुवः स्वः, अन्तर्वेदिसमुद्भवा जैमिनिगोत्राः केतव इहागच्छत इत्यावाह्य इह तिष्ठत इति स्थापयेत् ।

पूजनम्- ॐ केतुङ्कृण्वन्नकेतवेपेशोमर्य्याऽअपेशसे । समुषद्भिरजा-यथाः ।। **ॐ केतुभ्यो नमः** इति पाद्याद्युपचारैः पूजयेत् ।

अधिदेवपूजा

ईश्वरपूजनम्- सूर्यस्य दक्षिणपार्श्वे (सूर्याधिदेवस्य ईश्वरस्य पूजा) -

आवाहनं पूजनञ्च- ॐ **त्र्यम्बकमिति** मन्त्रस्य वसिष्ठऋषी रुद्रो देवता अनुष्टुप्छन्द ईश्वरस्यावाहनपूजनयोर्विनियोगः । शुक्लपुष्पाक्षतैः- **ॐ त्र्यम्ब-कंय्यजामहेसुगन्धिम्पुष्टिवर्द्धनम्। उर्वारुकमिवबन्धनान्मृत्त्योर्मुक्षीयमा-मृतात् ।। ॐ भूर्भुवः स्वः, ईश्वर इहागच्छ इत्यावाह्य इह तिष्ठ** इति स्थापयित्वा **ॐ ईश्वराय नमः** इति पूजयेत् ।

उमापूजनम्- सोमस्य दक्षिणपार्श्वे (सोमाधिदेवताया उमायाः पूजा) - **ॐ श्रीश्श्चतेलक्ष्मीश्श्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्श्विनौव्या-त्तम् । इष्णन्निषाणामुम्मऽइषाणसर्वलोकम्मऽइषाण ।। ॐ भूर्भुवः स्वः, उमे इहागच्छ इह तिष्ठ** इति स्थापयित्वा **ॐ उमायै नमः** इति पूजयेत् ।

स्कन्दपूजनम्- भौमस्य दक्षिणपार्श्वे (भौमाधिदेवस्य स्कन्दस्य पूजा) - **ॐ यदक्रन्दःप्प्रथमञ्जायमानऽउद्यन्त्समुद्राद्उतवापुरीषात् । श्येनस्य-पक्षाहरिणस्यबाहूऽउपस्तुत्त्यम्महिजातन्तेऽअर्वन् ।। ॐ भूर्भुवः स्वः स्कन्द इहागच्छ इत्यावाह्य इह तिष्ठ** इति स्थापयित्वा **ॐ स्कन्दाय नमः** इति पूजयेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

n Public Domain. Digitization by eGangotri.Funding

विष्णुपूजनम् - बुधस्य दक्षिणपार्श्वे (बुधाधिदेवस्य विष्णोः पूजा) - ॐ विष्णोरराटमसिविष्णोःश्नप्त्रेस्थोविष्णोःस्यूरसिविष्णोर्द्ध्रुवोसि। वैष्णवमसिविष्णवेत्त्वा।। ॐ भूर्भुवः स्वः, विष्णो इहागच्छ इत्यावाह्य इह तिष्ठ इति स्थापयित्वा ॐ विष्णवे नमः इति पूजयेत् ।

ब्रह्मपूजनम् - गुरोर्दक्षिणपार्श्वे (बृहस्पत्यधिदेवस्य ब्रह्मणः पूजा) - ॐ आब्रह्मन्ब्राह्मणोब्रह्मवर्च्चसीजायतामाराष्ट्रेराजन्यःशूरऽइषब्योतिव्याधीमहारथो जायतान्दोग्ध्रीर्धेनुर्वोढानड्वानाशुःसप्तिःपुरन्धिर्य्योषा-जिष्णूरथेष्ठाः । सभेयोयुवास्ययजमानस्यवीरोजायतान्निकामेनिकामेनः-पर्ज्जन्न्योवर्षतुफलवत्त्योनऽओषधयःपच्च्यन्तांय्योगक्षेमोनःकल्प्यताम्।। ॐ भूर्भुवः स्वः, ब्रह्मन् इहागच्छ इत्यावाह्य इह तिष्ठ इति स्थापयित्वा ॐ ब्रह्मणे नमः इति पूजयेत् ।

इन्द्रपूजनम् - शुक्रस्य दक्षिणपार्श्वे (शुक्राधिदेवस्य इन्द्रस्य पूजा) - ॐ सजोषाऽइन्द्रसगणोमरुद्भिःसोमम्पिबवृत्रहाशूरविद्वान् । जहि-शत्रूँ१।।रपमृधोनुदस्वाथाभयङ्कृणुहिविश्श्वतोनः।। ॐ भूर्भुवः स्वः, इन्द्र इहागच्छ इत्यावाह्य इह तिष्ठ इति स्थापयित्वा ॐ इन्द्राय नमः इति पूजयेत् ।

यमपूजनम् - शनेर्दक्षिणपार्श्वे (शनेरधिदेवस्य यमस्य पूजा) - ॐ यमायत्त्वामखायत्त्वासूर्य्यस्यत्त्वातपसे । देवस्त्वासवितामद्ध्वा-नक्तुपृथिव्याःसꣳस्पृशस्प्पाहि । अर्च्चिरसिशोचिरसितपोसि ।। ॐ भूर्भुवः स्वः, यम इहागच्छ इत्यावाह्य इह तिष्ठ इति स्थापयित्वा ॐ यमाय नमः इति पूजयेत् ।

कालपूजनम्- राहोर्दक्षिणपार्श्वे (राहोरधिदेवस्य कालस्य पूजा) - ॐ कार्षिरसिसमुद्रस्यत्त्वाक्षित्त्याऽउन्नयामि । समापोऽअद्भिरग्ग्मतस-मोषधीभिरोषधीः ।। ॐ भूर्भुवः स्वः काल इहागच्छ इत्यावाह्य

pal Sanskrit University, Balmeeki Campus, Kathman

0. In Public Domain. Digitization by eGangotri.Funding: M

इह तिष्ठ इति स्थापयित्वा ॐ कालाय नमः इति पूजयेत् ।

चित्रगुप्तपूजनम्- केतूनां दक्षिणपार्श्वे (केत्वधिदेवस्य चित्रगुप्तस्य पूजा)-
ॐ चित्रावसोस्वस्तितेपारमशीय।। ॐ भूर्भुवः स्वः चित्रगुप्त इहागच्छ इत्यावाह्य इह तिष्ठ इति स्थापयित्वा **ॐ चित्रगुप्ताय नमः** इति पूजयेत्।

प्रत्यधिदेवपूजा

ततः शुक्लपुष्पतण्डुलैः सर्वा प्रत्यधिदेवताः आवाह्य स्थापयित्वा पूजयेत् ।

अग्निपूजनम्- सूर्यस्य वामपार्श्वे (सूर्यप्रत्यधिदेवस्य अग्नेः पूजा)-
ॐ अग्निन्दूतम्पुरोदधेहव्यवाहमुपब्बुवे । देवाँ२।।ऽआसादयादिह ।। ॐ भूर्भुवः स्वः, अग्ने इहागच्छ इत्यावाह्य इह तिष्ठ इति स्थापयित्वा **ॐ अग्नये नमः** इति पूजयेत् ।

अपां पूजनम् - सोमस्य वामपार्श्वे (सोमप्रत्यधिदेवतानामपां पूजा) -
ॐ अप्स्वन्तरमृतमप्सुभेषजमपामुतप्रशस्तिष्ववश्वाभवतवाजिनः । देवीरापोयोवऽऊर्म्मिःप्प्रतूर्त्तिःककुन्मान्वाजसास्तेनायंवाजक्ष्सेत् ।। ॐ भूर्भुवः स्वः, आपः इहागच्छत इत्यावाह्य इह तिष्ठत इति स्थापयित्वा **ॐ अद्भ्यो नमः** इति पूजयेत् ।

पृथिवीपूजनम्- भौमस्य वामपार्श्वे (भौमप्रत्यधिदेवतायाः पृथिव्याः पूजा)-
ॐ स्योनापृथिविनोभवानृक्षरानिवेशनी । यच्छानःशर्म्मसप्प्रथाः ।। ॐ भूर्भुवः स्वः, भूमे इहागच्छ इत्यावाह्य इह तिष्ठ इति स्थापयित्वा **ॐ भूम्यै नमः** इति पूजयेत् ।

विष्णुपूजनम् - बुधस्य वामपार्श्वे (बुधप्रत्यधिदेवस्य विष्णोः पूजा)- **ॐ इदंविष्णुर्विचक्रमेत्रेधानिदधेपदम्। समूढमस्यपाठंसुरेस्वाहा।। ॐ**

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

n Public Domain. Digitization by eGangotri.Funding

भूर्भुवः स्वः, विष्णो इहागच्छ इत्यावाह्य इह तिष्ठ इति स्थापयित्वा **ॐ विष्णवे नमः** इति पूजयेत् ।

इन्द्रपूजनम्- गुरोर्वामपार्श्वे (गुरुप्रत्यधिदेवस्य इन्द्रस्य पूजा)-
ॐ त्रातारमिन्द्रमवितारमिन्द्रꣳहवेहवेसुहवꣳशूरमिन्द्रम् । ह्वयामिशक्र-म्पुरुहूतमिन्द्रꣳस्वस्तिनोमघवाधात्विन्द्रः ।। ॐ भूर्भुवः स्वः, इन्द्र इहागच्छ इत्यावाह्य इह तिष्ठ इति स्थापयित्वा **ॐ इन्द्राय नमः** इति पूजयेत् ।

इन्द्राणीपूजनम्- शुक्रस्य वामपार्श्वे (शुक्रप्रत्यधिदेवताया इन्द्राण्याः पूजा)-
ॐ अदित्यैरास्नासीन्द्राण्याऽउष्णीषःपूषासिघर्मायवीष्व।। ॐ भूर्भुवः स्वः, इन्द्राणि इहागच्छ इत्यावाह्य इह तिष्ठ इति स्थापयित्वा **ॐ इन्द्राण्यै नमः** इति पूजयेत् ।

प्रजापतिपूजनम्- शनेर्वामपार्श्वे (शनिप्रत्यधिदेवस्य प्रजापतेः पूजा)-
ॐ प्रजापतेनत्त्वदेतान्यन्योविश्वारूपाणिपरिताबभूव । यत्कामास्तेजु-हुमस्तन्नोऽअस्तुवयꣳस्यामपतयोरयीणाम् ।। ॐ भूर्भुवः स्वः प्रजापते इहागच्छ इत्यावाह्य इह तिष्ठ इति स्थापयित्वा **ॐ प्रजापतये नमः** इति पूजयेत् ।

सर्पपूजनम्- राहोर्वामपार्श्वे (राहुप्रत्यधिदेवतानां सर्पाणां पूजा)- **ॐ नमो-स्तुसर्प्पेब्भ्योयेकेचपृथिवीमनु । येऽअन्तरिक्षेयेदिवितेब्भ्यःसर्प्पेब्भ्यो-नमः ।। ॐ भूर्भुवः स्वः सर्पा इहागच्छत इत्यावाह्य इह तिष्ठत** इति स्थापयित्वा **ॐ सर्पेभ्यो नमः** इति पूजयेत् ।

ब्रह्मपूजनम् - केतूनां वामपार्श्वे (केतुप्रत्यधिदेवस्य ब्रह्मणः पूजा) -
ॐ ब्रह्मजज्ञानम्प्रथमम्पुरस्ताद्विसीमतःसुरुचोवेनऽआवः । सबु-ध्न्याऽउपमाऽअस्यविष्ठाःसतश्श्चयोनिमसतश्श्चविवः ।। ॐ भूर्भुवः स्वः, ब्रह्मन् इहागच्छ इत्यावाह्य इह तिष्ठ इति स्थापयित्वा **ॐ ब्रह्मणे नमः** इति पूजयेत् ।

pal Sanskrit University, Balmeeki Campus, Kathmar

0. In Public Domain. Digitization by eGangotri.Funding: M

लोकपालपूजा

शुक्लपुष्पतण्डुलैर्विनायकादीन् पञ्चलोकपालानावाह्य स्थापयित्वा पूजयेत् ।

विनायकपूजनम्- राहोरुत्तरभागे- **ॐ गणानान्त्वा०, ॐ भूर्भुवः स्वः, विनायक इहागच्छ इत्यावाह्य इह तिष्ठ** इति स्थापयित्वा **ॐ विनायकाय नमः** इति पूजयेत् ।

दुर्गापूजनम्- शनेरुत्तरभागे- **ॐ अम्बेऽअम्बिकेम्बालिकेनमानयतिकश्श्चन। ससस्त्यश्वकःसुभद्रिकाङ्काम्पीलवासिनीम् ।। ॐ भूर्भुवः स्वः, दुर्गे इहागच्छ इत्यावाह्य इह तिष्ठ** इति स्थापयित्वा **ॐ दुर्गायै नमः** इति पूजयेत् ।

वायुपूजनम्- सूर्यस्योत्तरभागे- **ॐ वातोवामनोवागन्धर्वाःसप्तविꣳशतिः। तेऽअग्ग्नेऽश्श्वमयुञ्जँस्तेऽअस्मिमञ्जवमादधुः ।। ॐ भूर्भुवः स्वः, वायो इहागच्छ इत्यावाह्य इह तिष्ठ** इति स्थापयित्वा **ॐ वायवे नमः** इति पूजयेत् ।

आकाशपूजनम्- राहोर्दक्षिणभागे- **ॐ ऊद्ध्वाऽअस्यसमिधोभवन्त्यू-र्द्ध्वाशुक्क्राशोचीꣳष्यग्ग्नेः। द्युमत्तमाःसुप्रतीकस्यसूनोः ।। ॐ भूर्भुवः स्वः, आकाश इहागच्छ इत्यावाह्य इह तिष्ठ** इति स्थापयित्वा **ॐ आकाशाय नमः** इति पूजयेत् ।

अश्विनिकुमारपूजनम्- केतूनां दक्षिणभागे- **ॐ यावाङ्कशामधुमत्त्यश्श्वि-नासूनृतावती । तयायज्ञम्मिमिक्षतम् ।। ॐ अश्विनौ इहागच्छतम् इत्यावाह्य इह तिष्ठतम्** इति स्थापयित्वा **ॐ अश्विभ्यां नमः** इति पूजयेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

n Public Domain. Digitization by eGangotri.Funding

दिक्पालपूजा

ततः पूर्वादिदिक्षु इन्द्रादिदिक्पालानावाह्य स्थापयित्वा पूजयेत् ।

इन्द्रपूजनम्- पूर्वे- ॐ त्रातारमिन्द्रम्०, ॐ भूर्भुवः स्वः, इन्द्र इहागच्छ इत्यावाह्य इह तिष्ठ इति स्थापयित्वा ॐ इन्द्राय नमः इति पूजयेत् ।

अग्निपूजनम्- आग्नेये- ॐ अग्निन्दूतम्०, ॐ भूर्भुवः स्वः, अग्ने इहागच्छ इत्यावाह्य इह तिष्ठ इति स्थापयित्वा ॐ अग्नये नमः इति पूजयेत् ।

यमपूजनम्- दक्षिणे- ॐ असियमोऽअस्यादित्त्योऽअर्वन्नसित्रितोगुह्येन-व्रतेन । असिसोमेनसमयाविपृक्तऽआहुस्तेत्रीणिदिविबन्धनानि ।। ॐ भूर्भुवः स्वः, यम इहागच्छ इत्यावाह्य इह तिष्ठ इति स्थापयित्वा ॐ यमाय नमः इति पूजयेत् ।

निर्ऋतिपूजनम्- नैर्ऋते- ॐ एषतेनिर्ऋतेभागस्तञ्जुषस्व ।। ॐ भूर्भुवः स्वः, निर्ऋते इहागच्छ इत्यावाह्य इह तिष्ठ इति स्थापयित्वा ॐ निर्ऋतये नमः इति पूजयेत् ।

वरुणपूजनम् - पश्चिमे - ॐ इमम्मेवरुणश्श्रुधीहवमद्याचमृडय । त्वामवस्युराचके ।। ॐ भूर्भुवः स्वः, वरुण इहागच्छ इत्यावाह्य इह तिष्ठ इति स्थापयित्वा ॐ वरुणाय नमः इति पूजयेत् ।

वायुपूजनम् - वायव्याम् - ॐ वातोवा०, ॐ भूर्भुवः स्वः, वायो इहागच्छ इत्यावाह्य इह तिष्ठ इति स्थापयित्वा ॐ वायवे नमः इति पूजयेत् ।

कुबेर(सोम) पूजनम् - उत्तरे - ॐ वयक्ष्सोमव्रतेतवमनस्तनूषुबिभ्रतः। प्रजावन्तःसचेमहि ।। ॐ भूर्भुवः स्वः कुबेर (सोम) इहागच्छ इत्यावाह्य इह तिष्ठ इति स्थापयित्वा ॐ कुबेराय (सोमाय) नमः इति पूजयेत् ।

pal Sanskrit University, Balmeeki Campus, Kathmar

0. In Public Domain. Digitization by eGangotri.Funding: M

ईशानपूजनम्- ईशाने- ॐ तमीशानञ्जगतस्तस्थुषस्पतिन्धियञ्जिन्वम-वसेहूमहेवयम् । पूषानोयथावेदसामसद्वृधेरक्षितापायुरदब्ध्यःस्वस्तये।। ॐ भूर्भुवः स्वः, ईशान इहागच्छ इत्यावाह्य इह तिष्ठ इति स्थापयित्वा ॐ ईशानाय नमः इतीशानं पूजयेत् ।

ब्रह्मपूजनम् - ऊर्ध्वे(पूर्वेशानयोर्मध्ये) - ॐ ब्रह्मजज्ञानम्०, ॐ भूर्भुवः स्वः, ब्रह्मन् इहागच्छ इत्यावाह्य इह तिष्ठ इति स्थापयित्वा ॐ ब्रह्मणे नमः इति ब्रह्माणं पूजयेत् ।

अनन्तपूजनम् - अधः (पश्चिमनैर्ऋत्यमध्ये) - ॐ नमोस्तुसर्प्पेभ्यः०, ॐ भूर्भुवः स्वः, अनन्त इहागच्छ इत्यावाह्य इह तिष्ठ इति स्थापयित्वा ॐ अनन्ताय नमः इत्यनन्तं पूजयेत् ।

अष्टवस्वादिपूजा

ध्रुवाद्यष्टवसुपूजनम् - इन्द्राग्निमध्ये - ॐ सुगावोदेवाःसदनाऽअकर्म्मयऽ-आजग्म्मेदक्सवनञ्जुषाणाः । भरमाणावहमानाहवीᳬंष्यस्म्मेधत्तवसवोव-सूनिस्वाहा ।। ॐ भूर्भुवः स्वः, ध्रुवाद्यष्टवसव इहागच्छत इत्यावाह्य इह तिष्ठत इति स्थापयेत् ।

ध्रुवोऽध्वरस्तथा सोम आपश्चैवानिलोऽनलः ।
प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्तिताः ।।

इति ध्रुवाद्यष्टवसवः। ॐ ध्रुवाद्यष्टवसुभ्यो नमः । इति पूजयेत् ।

द्वादशादित्यपूजा

द्वादशादित्यपरिचयः-

धातार्यमा च मित्रश्च वरुणोंऽशो भगस्तथा ।
इन्द्रो विवस्वान् पूषा च पर्जन्यो दशमः स्मृतः ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

n Public Domain. Digitization by eGangotri.Funding

ततस्त्वष्टा ततो विष्णुरजघन्यो जघन्यजः ।
इत्येते द्वादशादित्या नामभिः परिकीर्तिताः ।।

द्वादशादित्यपूजनम्- इन्द्रेशानमध्ये- ॐ यज्ञोदेवानाम्प्रत्त्येतिसुम्म्नमादित्यासोभवतामृडयन्तः । आवोर्वाचीसुमतिर्ब्ववृत्त्यादꣳहोश्चिद्याबरिवोवित्तरासदादित्त्येभ्यस्त्वा ।। ॐ भूर्भुवः स्वः, धात्रादिद्वादशादित्या इहागच्छत इत्यावाह्य इह तिष्ठत इति स्थापयित्वा ॐ धात्रादिद्वादशादित्येभ्यो नमः इति पूजयेत् ।

एकादशरुद्रपूजा

रुद्रपरिचयः- वीरभद्रश्च शम्भुश्च गिरिशश्च महायशाः ।
अजैकपादहिर्बुध्न्यः पिनाकी चापराजितः ।।
भुवनाधीश्वरश्चैव कपाली च विशाम्पतिः ।
स्थाणुर्भवश्च भगहा रुद्रा एकादश स्मृताः ।।

रुद्रपूजनम्- अग्नियममध्ये- ॐ यऽएतावन्तश्च्चभूयाꣳसश्च्चदिशोरुद्रावितस्थिरे। तेषाꣳसहस्रयोजनेवधन्वानितन्मसि।। ॐ भूर्भुवः स्वः, वीरभद्राद्येकादशरुद्रा इहागच्छत इत्यावाह्य इह तिष्ठत इति स्थापयित्वा ॐ वीरभद्राद्येकादशरुद्रेभ्यो नमः इति पूजयेत् ।

षोडशमातृपूजा

षोडशमातृपरिचयः-

गौरी पद्मा शची मेधा सावित्री विजया जया ।
देवसेना स्वधा स्वाहा मातरो लोकमातरः ।।
धृतिस्तुष्टिस्तथा पुष्टिरात्मनः कुलदेवताः ।

पूजनम्- यमनिर्ऋतिमध्ये- ॐ गौरीर्मिमायसलिलानितक्षत्त्येकपदीद्विपदीत्रिपदीसाचतुष्पदी । अष्टपदीनवपदीबभूवुषिसहस्राक्षरापरमेव्योमन्।।

pal Sanskrit University, Balmeeki Campus, Kathman

0. In Public Domain. Digitization by eGangotri.Funding: M

ॐ भूर्भुवः स्वः, गौर्यादिषोडशमातर इहागच्छत इत्यावाह्य इह तिष्ठत इति स्थापयेत् ॐ गौर्यादिषोडशमातृभ्यो नमः, इति पूजयेत् ।

गणेशपूजनम् - निर्ऋतिवरुणमध्ये - ॐ गणानान्त्वा०, ॐ भूर्भुवः स्वः, गणपते इहागच्छ इत्यावाह्य इह तिष्ठ इति स्थापयित्वा ॐ गणपतये नमः इति पूजयेत् ॥५॥

सप्तमरुत्पूजा

सप्तमरुतां परिचयः-

आवहः प्रवहश्चैव उद्वहः संवहस्तथा ।
परावहश्च विवहः तथा परिवहोऽनिलः ।।७।। इति ।

पूजनम् - वायुसोममध्ये - ॐ मरुतोयस्यहिक्षयेपाथादिवोविमहसः । ससुगोपातमोजनः ।। ॐ भूर्भुवः स्वः, आवहादिसप्तमरुत इहागच्छत इत्यावाह्य इह तिष्ठत इति स्थापयित्वा ॐ आवहादिसप्तमरुद्भ्यो नमः इति पूजयेत् ।

ब्रह्मविष्णुरुद्रार्कवनस्पतिपूजा

ततो वेद्यामेव यथावकाशं ब्रह्मादीन्पञ्चदेवानावाह्य स्थापयित्वा पूजयेत्।

ब्रह्मपूजनम्- ॐ ब्रह्मजज्ञानम्०, ॐ भूर्भुवः स्वः, ब्रह्मन् इहागच्छ इत्यावाह्य इह तिष्ठ इति स्थापयित्वा ॐ ब्रह्मणे नमः इति पूजयेत् ।

विष्णुपूजनम्- ॐ इदं विष्णुः०, ॐ भूर्भुवः स्वः, विष्णो इहागच्छ इत्यावाह्य इह तिष्ठ इति स्थापयित्वा ॐ विष्णवे नमः इति पूजयेत् ।

रुद्रपूजनम्- ॐ मानस्तोकेतनयेमानऽआयुषिमानोगोषुमानोऽअश्वेषु-रीरिषः । मानोवीरान्रुद्रभामिनोवधीर्हविष्मन्तःसदमित्त्वाहवामहे ।। ॐ भूर्भुवः स्वः, रुद्र इहागच्छ इत्यावाह्य इह तिष्ठ इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

n Public Domain. Digitization by eGangotri.Funding

स्थापयित्वा ॐ रुद्राय नमः इति पूजयेत् ।

अर्कपूजनम्- ॐ अग्निरस्मिमजन्मनाजातवेदाघृतम्मेचक्षुरमृतम्मऽआ-सन्। अर्कस्त्रिधातूरजसोविमानोजस्त्रोघर्म्मोहविरस्मिनाम ।। ॐ भूर्भुवः स्वः, अर्क इहागच्छ इत्यावाह्य इह तिष्ठ इति स्थापयित्वा ॐ अर्काय नमः इति पूजयेत् ।

वनस्पतिपूजनम् - ॐ वनस्पतेवीड्वङ्गोहिभूयाऽअस्मत्सखाप्प्रतरणः-सुवीरः। गोभिःसन्नाद्धोऽअसिवीडयस्वास्त्थातातेजयतुजेत्त्वानि ।। ॐ भूर्भुवः स्वः, वनस्पते इहागच्छ इत्यावाह्य इह तिष्ठ इति स्थापयित्वा ॐ वनस्पतये नमः इति पूजयेत् । एवं द्व्युत्तरशतं देवताः स्थापयित्वा पूजयेत् ।

ग्रहध्यानम्

सूर्यध्यानम्-

पद्मासनः पद्मकरो द्विबाहुः पद्मद्युतिः सप्ततुरङ्गवाहनः ।
दिवाकरो लोकगुरुः किरीटी मयि प्रसादं विदधातु देवः ।।१।।

चन्द्रध्यानम्-

श्वेताम्बरः श्वेतविभूषणश्च श्वेतद्युतिर्दण्डधरो द्विबाहुः ।
चन्द्रोऽमृतात्मा वरदः किरीटी श्रेयांसि मह्यं विदधातु देवः ।।२।।

भौमध्यानम् -

रक्ताम्बरो रक्तवपुः किरीटी चतुर्भुजो मेषगमो गदाभृत् ।
धरासुतः शक्तिधरश्च शूली सदा मम स्याद् वरदः प्रशान्तः ।।३।।

बुधध्यानम्-

पीताम्बरः पीतवपुः किरीटी चतुर्भुजो दण्डधरश्च हारी ।
चर्मासिभृत् सोमसुतः सदा मे सिंहाधिरूढो वरदो बुधोऽस्तु।।४।।

pal Sanskrit University, Balmeeki Campus, Kathman

0. In Public Domain. Digitization by eGangotri.Funding: M

बृहस्पतिध्यानम्-

पीताम्बरः पीतवपुः किरीटी चतुर्भुजो देवगुरुः प्रशान्तः ।
दधाति दण्डञ्च कमण्डलुञ्च तथाऽक्षसूत्रं वरदोऽस्तु मह्यम् ।।५।।

शुक्रध्यानम्-

श्वेताम्बरः श्वेतवपुः किरीटी चतुर्भुजो दैत्यगुरुः प्रशान्तः ।
तथाक्षसूत्रञ्च कमण्डलुञ्च दण्डञ्च बिभ्रद् वरदोऽस्तु मह्यम् ।।६।।

शनिध्यानम्-

नीलद्युतिः शूलधरः किरीटी गृध्रस्थितस्त्रासकरो धनुष्मान् ।
चतुर्भुजः सूर्यसुतः प्रशान्तः सदाऽस्तु मह्यं वरमन्दगामी ।।७।।

राहुध्यानम्-

नीलाम्बरो नीलवपुः किरीटी करालवक्त्रः करवालशूली ।
चतुर्भुजश्चर्मधरश्च राहुः सिंहाधिरूढो वरदोऽस्तु मह्यम् ।।८।।

केतुध्यानम्-

धूम्रो द्विबाहुर्वरदो गदाभृद् गृध्रासनस्थो विकृताननश्च ।
किरीटकेयूरविभूषिताङ्गः सदाऽस्तु मे केतुगणः प्रशान्तः ।।९।।

इति नवग्रहान् ध्यायेत् । "अन्ये किरीटिनः कार्या वरदाभयपाणयः" इति सामान्येनाधिदेवतादींश्च ध्यायेत् ।

इत्थं सूर्यादीनां तत्तद्वर्णपुष्पगन्धाक्षतादिभिः पूजा कार्या । वस्त्राणि च यथासंभवं ग्रहवर्णान्येव समर्पणीयानि । गुग्गुलुर्धूपः, दीपः सर्पिषा तिलतैलेन वा, नैवेद्यं पायसादिकं त्रिवृदन्नं वा, दक्षिणा माणिक्यादिरूपा माणिक्यमेव वा निष्क्रयद्रव्यमेव वा, अपूपादिकमपि नैवेद्यमिति कतिपये।

पुष्पाञ्जलिः

ब्रह्मा मुरारिस्त्रिपुरान्तकारी भानुःशशी भूमिसुतो बुधश्च ।
गुरुश्च शुक्रःशनिराहुकेतवः सर्वे ग्रहाः शान्तिकरा भवन्तु ।।
सूर्यः शौर्यमथेन्दुरुच्चपदवीं सन्मङ्गलं मङ्गलः ।
सद्बुद्धिञ्च बुधो गुरुश्च गुरुतां शुक्रः शुभं शं शनिः ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

n Public Domain. Digitization by eGangotri.Funding

राहुर्बाहुबलं करोतु सततं केतुः कुलस्योन्नतिम् ।
नित्यं प्रीतिकरा भवन्तु मम ते सर्वेऽनुकूला ग्रहाः ।।

इति पुष्पाञ्जलिं समर्पयेत् ।

प्रार्थना-

आयुश्च वित्तञ्च तथा सुखञ्च धर्मार्थलाभौ बहुपुत्रताञ्च ।
शत्रुक्षयं राजसु पूजिताञ्च तुष्टा ग्रहाः क्षेमकरा भवन्तु ।। इति ।

बलिसमर्पणम्

ततो वेदीसमीपे पश्चिमभागे भूमौ यथोक्तबलीन् तदभावे पायसबलीन् तदभावे दध्यक्षतबलीन् दद्यात् ।

सूर्यबलिः - ॐ आकृष्णेन० इति मन्त्रेण **ॐ सूर्याय** एष गुडौदनबलिः तदभावे पायसबलिः। तदभावे एष दध्यक्षतबलिर्नमः, **भोः सूर्य इमं बलिं गृहाण, यजमानस्य क्षेमकर्ता भव** इति बल्युपरि जलं दद्यात् । एवं सर्वत्र ॥१॥

सोमबलिः - ॐ इमन्देवाः०, ॐ सोमाय घृतपायसाभावे एष दध्यक्षतबलिर्नमः । **भोः सोम०** ॥२॥

भौमबलिः - ॐ अग्निर्म्मूर्द्धा० ॐ भौमाय मसूरान्नाभावे एष दध्यक्षतबलिर्नमः । **भोः भौम०** ॥३॥

बुधबलिः - ॐ उद्बुध्यस्व० ॐ बुधाय दुग्धौदनाभावे एष दध्यक्षतबलिर्नमः । **भोः बुध०** ॥४॥

बृहस्पतिबलिः - ॐ बृहस्पतेऽअति० ॐ बृहस्पतये दध्योदनाभावे एष दध्यक्षतबलिर्नमः । **भोः बृहस्पते०** ॥५॥

शुक्रबलिः- ॐ अन्नात्परिस्रुतः० ॐ शुक्राय घृतौदनाभावे एष दध्यक्षतबलिर्नमः । **भोः शुक्र०** ॥६॥

शनिबलिः- ॐ शन्नोदेवीः० ॐ शनैश्चराय कृसरान्नाभावे एष दध्यक्षतबलिर्नमः । **भोः शनैश्चर०** ॥७॥

pal Sanskrit University, Balmeeki Campus, Kathman

0. In Public Domain. Digitization by eGangotri.Funding: M

राहुबलिः - ॐ कयानः० ॐ राहवे छागमांसाभावे एष दध्यक्षतबलिर्नमः। **भोः राहो० ॥८॥**

केतुबलिः- ॐ केतुङ्कृण्वन्० ॐ केतुभ्यश्चित्रौदनाभावे एष दध्यक्षतबलिर्नमः । **भोः केतुगण० ॥९॥**

अधिदेवतानां बलिसमर्पणम्

ॐ त्र्यम्बकंय्यजामहे० ॐ ईश्वराय घृतपायसाभावे एष दध्यक्षतबलिर्नमः ॥१॥ **भोः ईश्वर** इत्यादि सर्वत्र पठेत् ।

ॐ श्रीश्श्चते० ॐ उमायै घृतपायसाभावे एष दध्यक्षतबलिर्नमः ॥२॥

ॐ यदक्रन्दः० ॐ स्कन्दाय घृतपायसाभावे एष दध्यक्षतबलिर्नमः॥३॥

ॐ व्विष्णोर० ॐ व्विष्णवे घृतपायसाभावे एष दध्यक्षतबलिर्नमः ॥४॥

ॐ आब्रह्मन्० ॐ ब्रह्मणे घृतपायसाभावे एष दध्यक्षतबलिर्नमः॥५॥

ॐ सजोषाऽइन्द्र० ॐ इन्द्राय घृतपायसाभावे एष दध्यक्षतबलिर्नमः॥६॥

ॐ असियमः० ॐ यमाय घृतपायसाभावे एष दध्यक्षतबलिर्नमः ॥७॥

ॐ कार्षिरसि० ॐ कालाय घृतपायसाभावे एष दध्यक्षतबलिर्नमः॥८॥

ॐ चित्रावसो० ॐ चित्रगुप्ताय घृतपायसाभावे एष दध्यक्षतबलिर्नमः॥९॥

प्रत्यधिदेवतानां बलिसमर्पणम्

ॐ अग्निन्दूतम्० ॐ अग्नये घृतपायसाभावे एष दध्यक्षतबलिर्नमः॥१॥

ॐ अप्स्वन्तः० ॐ अद्भ्यः घृतपायसाभावे एष दध्यक्षतबलिर्नमः॥२॥

ॐ स्योनापृथिवि० ॐ पृथिव्यै घृतपायसाभावे एष दध्यक्षतबलिर्नमः॥३॥

ॐ इदंविष्णुः० ॐ विष्णवे घृतपायसाभावे एष दध्यक्षतबलिर्नमः॥४॥

ॐ त्रातारमिन्द्रम्० ॐ इन्द्राय घृतपायसाभावे एष दध्यक्षतबलिर्नमः॥५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

n Public Domain. Digitization by eGangotri.Funding

ॐ अदित्त्यैरास्ना० ॐ शच्यै घृतपायसाभावे एष दध्यक्षतबलिर्नमः॥६॥

ॐ प्रजापतेन० ॐ प्रजापतये घृतपायसाभावे एष दध्यक्षतबलिर्नमः॥७॥

ॐ नमोस्तुसर्प्पे० ॐ सर्पेभ्यः घृतपायसाभावे एष दध्यक्षतबलिर्नमः॥८॥

ॐ ब्रह्मजज्ञानम्० ॐ ब्रह्मणे घृतपायसाभावे एष दध्यक्षतबलिर्नमः॥९॥

विनायकादिपञ्चलोकपालानां बलिसमर्पणम्

ॐ गणानान्त्वा० ॐ विनायकाय घृतपायसाभावे एष दध्यक्षतबलिर्नमः॥१॥

ॐ अम्बेऽअम्बिके० ॐ दुर्गायै घृतपायसाभावे एष दध्यक्षतबलिर्नमः॥२॥

ॐ वातोवा० ॐ वायवे घृतपायसाभावे एष दध्यक्षतबलिर्नमः ॥३॥

ॐ उद्धर्वाऽअ० ॐ आकाशाय घृतपायसाभावे एष दध्यक्षतबलिर्नमः॥४॥

ॐ यावाङ्कशा० ॐ अश्विभ्याम् घृतपायसाभावे एष दध्यक्षतबलिर्नमः॥५॥

दिक्पालेभ्यो बलिसमर्पणम्

इन्द्राय०- ॐ इन्द्रस्तु महसा दीप्तः सर्वदेवाधिपो महान् ।
वज्रहस्तो महासत्त्वस्तस्मै नित्यं नमो नमः ॥

ॐ इन्द्राय माषभक्ताभावे एष दध्यक्षतबलिर्नमः ॥१॥

अग्नये०- ॐ आग्नेयः पुरुषो रक्तः सर्वदेवमयोऽव्ययः ।
धूमकेतुरजोऽध्यक्षस्तस्मै नित्यं नमो नमः ॥

ॐ अग्नये माषभक्ताभावे एष दध्यक्षतबलिर्नमः ॥२॥

यमाय०- ॐ यमश्चोत्पलपत्राभः किरीटी दण्डधृक्सदा ।
धर्मसाक्षी विशुद्धात्मा तस्मै नित्यं नमो नमः ॥

ॐ यमाय माषभक्ताभावे एष दध्यक्षतबलिर्नमः ॥३॥

निर्ऋतये०- ॐ निर्ऋतिस्तु पुमान् कृष्णः सर्वरक्षोऽधिपो महान् ।
खड्गहस्तो महासत्त्वस्तस्मै नित्यं नमो नमः ॥

ॐ निर्ऋतये माषभक्ताभावे एष दध्यक्षतबलिर्नमः ॥४॥

pal Sanskrit University, Balmeeki Campus, Kathman

0. In Public Domain. Digitization by eGangotri.Funding: M

वरुणाय० - ॐ वरुणः सर्वगो विष्णुः पुरुषो निम्नगाधिपः ।
पाशहस्तो महासत्त्वस्तस्मै नित्यं नमो नमः ।।
ॐ वरुणाय माषभक्ताभावे एष दध्यक्षतबलिर्नमः ॥५॥

वायवे० - वायुस्तु सर्ववर्णोऽयं सर्वगन्धवहः शुचिः ।
पुरुषो ध्वजहस्तश्च तस्मै नित्यं नमो नमः ।।
ॐ वायवे माषभक्ताभावे एष दध्यक्षतबलिर्नमः ॥६॥

सोमाय० - ॐ गौरो यस्तु पुमान्सौम्यः सर्वौषधिसमन्वितः ।
नक्षत्राधिपतिः सोमस्तस्मै नित्यं नमो नमः ।।
ॐ सोमाय(कुबेराय) माषभक्ताभावे एष दध्यक्षतबलिर्नमः ॥७॥

ईशानाय० - ॐ ईशानःपुरुषः शुक्लः सर्वविद्याधिपो महान् ।
शूलहस्तो विरूपाक्षस्तस्मै नित्यं नमो नमः ।।
ॐ ईशानाय माषभक्ताभावे एष दध्यक्षतबलिर्नमः ॥८॥

ब्रह्मणे० - ॐ पद्मयोनिश्चतुर्मूर्त्तिर्वेदावासः पितामहः ।
यज्ञाध्यक्षश्चतुर्वक्त्रस्तस्मै नित्यं नमो नमः ।।
ॐ ब्रह्मणे माषभक्ताभावे एष दध्यक्षतबलिर्नमः ॥९॥

अनन्ताय० - योसावनन्तरूपेण ब्रह्माण्डं सचराचरम् ।
पुष्पवद्धारयेन्मूर्ध्नि तस्मै नित्यं नमो नमः ।।
ॐ अनन्ताय माषभक्ताभावे एष दध्यक्षतबलिर्नम ॥१०॥

अष्टवस्वादिबलिसमर्पणम्

ॐ सुगावो० ॐ ध्रुवाद्यष्टवसुभ्यः माषभक्ताभावे एष दध्यक्षतबलिर्नमः॥१॥
ॐ यज्ञोदेवानाम्० ॐ धात्रादिद्वादशादित्येभ्यः माषभक्ता० एष द०॥२॥
ॐ यऽएतावन्तः० ॐ वीरभद्राद्येकादशरुद्रेभ्यः माषभक्ता० द० ॥३॥
ॐ गौरीर्मिमाय० ॐ गौर्यादिषोडशमातृभ्यः माषभक्ता० एष द०॥४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

n Public Domain. Digitization by eGangotri.Funding

ॐ गणानान्त्वा० ॐ गणपतये माषभक्ता० एष द० ॥५॥

ॐ मरुतोयस्य० ॐ आवहादिसप्तमरुद्भ्यः माषभक्ता० एष द०॥६॥

ब्रह्मविष्णुरुद्रार्कवनस्पतीनां बलिसमर्पणम्

ॐ ब्रह्मजज्ञानम्० ॐ ब्रह्मणे माषभक्ता० एष द० ॥१॥

ॐ इदंविष्णुः० ॐ विष्णवे माषभक्ता० एष द०॥२॥

ॐ मानस्तोके० ॐ रुद्राय माषभक्ता० एष द० ॥३॥

ॐ अग्निरस्मि० ॐ अर्काय माषभक्ता० एष द० ॥४॥

ॐ वनस्पते वीड्वङ्गः० ॐ वनस्पतये माषभक्ता० एष द० ॥५॥

एवं फलादिभूरिभक्ष्याणि सूर्यादिद्व्युत्तरशतदेवताभ्यो नमः । इति वेद्युपरि हस्तमात्रं फलपुष्पशोभितं वितानकं बृहस्पतिदैवतं **ॐ सूर्यादिद्व्युत्तरशतदेवताभ्यो नमः** इति संकल्प्य समर्पणं कुर्यात् ।

होमसङ्कल्पः- एवं पूजां निर्वर्त्य अग्नेर्दक्षिणत उत्तराभिमुख उपविश्य कुशयवजलान्यादाय- ॐ अद्येहेत्यादिदेशकालौ स्मृत्वा ग्रहशान्तिकर्मणि इदमाज्यादिहवनीयद्रव्यं पूर्वमाघारावाज्यभागौ प्रजापतीन्द्राग्निसोमदेवताभ्यः, प्रधानभूतेभ्यः, सूर्यसोमभौमबुधबृहस्पतिशुक्रशनिराहुकेत्वाख्यग्रहेभ्यः, ईश्वरोमास्कन्दविष्णुब्रह्मेन्द्रयमकालचित्रगुप्ताख्याधिदेवताभ्यः, अग्न्यब्भूमिविष्णिवन्द्रेन्द्राणीप्रजापतिसर्पब्रह्माख्यप्रत्यधिदेवताभ्यः, विनायकदुर्गावाय्वाकाशाख्यलोकपालेभ्यः, इन्द्राग्नियमनिर्ऋतिवरुणवायुसोमेशानब्रह्मानन्ताख्यदिक्पालेभ्यः, ध्रुवाद्यष्टवसुभ्यः, धात्रादिद्वादशादित्येभ्यः, वीरभद्राद्येकदशरुद्रेभ्यः, गौर्यादिषोडशमातृभ्यः, आवहादिसप्तमरुद्भ्यः, ब्रह्मविष्णुरुद्रार्कवनस्पतिदेवेभ्यः, उत्तराङ्गभूर्भुवस्वरग्निवरुणसवितृविष्णुविश्वदेवमरुत्स्वर्कप्रजापतिस्विष्टकृद्देवेभ्यो मया त्यक्तं यथादैवतमस्तु न मम इति सर्वदेवतोद्देशेन युगपद्द्रव्यत्यागं कुर्यात्। प्रत्याहुतित्यागस्य कर्तुमशक्यत्वात् ।

होमविधिः- होमश्च प्रणवादिस्वाहान्तैस्तत्तद्दैवतमन्त्रैः ऋषिदेवताच्छन्दोनुकीर्तनपूर्वकम्- नवग्रहाधिदेवताप्रत्यधिदेवतापञ्चलोकपालदशदिक्पालाष्ट-

pal Sanskrit University, Balmeeki Campus, Kathman

0. In Public Domain. Digitization by eGangotri.Funding: M

वसुद्वादशादित्यैकादशरुद्रषोडशमातृसप्तमरुद्ब्रह्मविष्णुरुद्रार्कवनस्पतीनां प्रधानदेवतानां प्रत्येकम् अष्टोत्तरशतम्, अष्टविंशतिः, द्वादश, अष्टौ वा आहुतयः, इत्येवं कार्यः। वस्वादित्यरुद्रमातृमरुतां मन्त्रानुरोधेन समुदितानामेव होमः प्रत्येकं मन्त्राभावात्।

ततः समुदितपक्षे एकपञ्चाशद्देवताः[१]। तत्राष्टोत्तरशताहुतिषु, पञ्चसहस्राणि पञ्चशतान्यष्टौ चाहुतयः ५५०८। अष्टविंशत्याहुतिषु, चतुर्दशशतान्यष्टाविंशतिश्चाहुतयः १४२८। द्वादशाहुतिषु, षट्शतानि द्वादशचाहुतयः ६१२। अष्टाहुतिषु, चतुःशतान्यष्टौ चाहुतयः ४०८, भवन्तीति।

अथ होमः

जापकः सूक्तानि मन्त्राँश्च जपेत्। गुरुः सर्वाध्यक्षस्तिष्ठेत्।

आज्यहोमः- ततो वरदनामाग्निं प्रतिष्ठाप्य **तदेवाग्निः०, चत्वारिशृङ्गा०** इति ध्यात्वा **वैश्वानरोन०** इत्यावाह्य **अग्नेनय०** इति पूजयेत्। तिस्रो रेखाः सप्तजिह्वाश्च संपूज्याः। ततः समिद्धतमे निर्धूमे हुताशने दक्षिणजानु पातयित्वा होता कुशेन ब्रह्मणान्वारब्ध आज्यपूर्णस्रुवेण प्रथमं मनसा- **ॐ प्रजापतय** इति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः प्रजापतिर्देवता नवग्रहमखे आज्यहोमे विनियोगः। **ॐ प्रजापतये स्वाहा, इदं प्रजापतये** इति मनसा प्राजापत्यमाघारं जुहुयात्। स्रुवावस्थितहुतशेषं प्रोक्षणीपात्रे निदध्यात्।

ॐ इन्द्रायेति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्द इन्द्रो देवता नवग्रहमखे आज्यहोमे विनियोगः। **ॐ इन्द्राय स्वाहा, इदमिन्द्राय** प्रोक्षणीपात्रेऽपि, इति द्वितीयमाघारमग्नेर्दक्षिणभागे जुहुयात्।

ॐ अग्नय इति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दोग्निर्देवता नवग्रहमखे आज्य-

१. मातृणां पूजनमेव न होम इति पक्षमाश्रित्य, एकपञ्चाशद्देवतानां होमसंख्या सङ्कलिता भवेत्। तासामपि **होमपक्षस्वीकारे** तु अधिका संख्या भवति देवतानां द्विपञ्चाशत्संख्यत्वादिति बोध्यम्। गणपतेरपि होमो न स्वीकृतः। अन्यथा त्रिपञ्चाशत्संख्या-देवताः स्युः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

n Public Domain. Digitization by eGangotri.Funding

होमे विनियोगः । **ॐ अग्नये स्वाहा, इदमग्नये** प्रोक्षणीपात्रेऽपि, इत्याग्नेयमाज्यभागं जुहुयात् ।

ॐ सोमायेति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः सोमो देवता नवग्रहमखे आज्यहोमे विनियोगः । **ॐ सोमाय स्वाहा, इदꣳसोमाय** प्रोक्षणीपात्रेऽपि, इति द्वितीयमाज्यभागमग्नेरुत्तरभागे जुहुयात् ।

प्रधानदेवताहोमः- ब्रह्मणानन्वारब्धो जुहुयात् । यथोक्तघृताक्तसमिदादिहोमं मृगीमुद्रया कुर्यात् । यथोक्तसमिदभावे पालाश्य एव ग्राह्याः तदभावे घृताक्तैस्तिलैर्होमं कुर्यात् ।

नवग्रहहोमः

सूर्यहोममन्त्रः- ॐ आकृष्णेनेति हिरण्यस्तूपऋषिः सविता देवता त्रिष्टुप्छन्दः सूर्यप्रीतये कपिलाग्नौ आज्यहोमेऽर्कसमिद्धोमे च विनियोगः । **ॐ आकृष्णेनरजसावर्त्तमानोनिवेशयन्नमृतम्मर्त्त्यञ्च । हिरण्ययेनसवितारथेनदेवोयातिभुवनानिपश्यन् ।।** स्वाहा **इदꣳसूर्याय** इति त्यागो यजमानस्य स्वयं होमकर्तृत्वे, अन्येषां होमकर्तृत्वे तु पूर्वमेव युगपत्त्याग उक्तः ॥१॥

सोमहोममन्त्रः- ॐ इमन्देवा इति वरुणऋषिः सोमो देवता यजुः(अत्यष्टिश्छन्दः) सोमप्रीतये पिङ्गलाग्नौ आज्यहोमे पलाशसमिद्धोमे च विनियोगः। **ॐ इमन्देवाऽअसपत्नꣳसुवद्ध्वम्महतेक्षत्रायमहतेज्ज्यैष्ठ्यायमहतेजानराज्ज्यायेन्द्रस्येन्द्रियायइमममुष्य्पुत्रममुष्य्यैपुत्रमस्यैविशऽएषवोमीराजासोमोस्म्माकम्ब्राह्मणानाꣳराजास्वाहा ।। इदꣳसोमाय** ॥२॥

भौमहोममन्त्रः - ॐ अग्निर्मूर्द्धेति विरूपाक्षऋषिरङ्गारको देवता गायत्रीच्छन्दः कुजप्रीतये धूम्रकेत्वग्नौ आज्यहोमे खदिरसमिद्धोमे च विनियोगः। ॐ **अग्निर्म्मूर्द्धादिवःककुत्पतिःपृथिव्याऽअयम् । अपाꣳरेताꣳसि**जिन्वति ।। स्वाहा इदं कुजाय ॥३॥

bal Sanskrit University, Balmeeki Campus, Kathman

0. In Public Domain. Digitization by eGangotri.Funding: M

बुधहोममन्त्रः- ॐ उद्बुध्यस्वेति परमेष्ठीऋषिर्बुधो देवता त्रिष्टुप्छन्दो बुधप्रीतये जाठराग्नौ आज्यहोमेऽपामार्गसमिद्धोमे च विनियोगः। **ॐ उद्बुध्यस्वाग्ग्नेप्प्रतिजागृहित्त्वमिष्टापूर्त्तेसꣳसृजेथामयञ्च । अस्मिन्त्सधस्त्थेऽअद्ध्युत्तरस्मिन्विश्वेदेवायजमानश्श्चसीदत।।** स्वाहा इदं बुधाय।।४।।

बृहस्पतिहोममन्त्रः- ॐ बृहस्पतेऽअतीति गृत्समदऋषिर्बृहस्पतिर्देवता त्रिष्टुप्छन्दो बृहस्पतिप्रीतये शिखिनामाग्नौ आज्यहोमेऽश्वत्थसमिद्धोमे च विनियोगः । **ॐ बृहस्पतेऽअतियदर्य्योऽअर्हाद्युमद्विभातिक्क्रतुमज्जनेषु। यद्दीदयच्छवसऽऋतप्प्रजाततदस्म्मासुद्रविणंधेहिचित्रम् ।।** स्वाहा इदं बृहस्पतये ।।५।।

शुक्रहोममन्त्रः- ॐ अन्नात्परिस्रुत इति प्रजापत्यश्विसरस्वतीन्द्रा ऋषयः शुक्रो देवता जगतीच्छन्दः शुक्रप्रीतये हाटकाग्नौ आज्यहोमे उदुम्बरसमिद्धोमे च विनियोगः । **ॐ अन्नात्परिस्स्रुतोरसम्ब्रह्मणाव्यपिबत्क्षत्रम्पयःसोमम्प्रजापतिः । ऋतेनसत्त्यमिन्द्रियंविपानꣳशुक्क्रमन्धसऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु ।।** स्वाहा इदं शुक्राय ।।६।।

शनिहोममन्त्रः- ॐ शन्नोदेवीरिति दध्यङ्ङाथर्वणऋषिः शनैश्चरो देवता गायत्रीछन्दः शनैश्चरप्रीतये महातेजोऽग्नौ आज्यहोमे शमीसमिद्धोमे च विनियोगः । **ॐ शन्नोदेवीरभिष्टयऽआपोभवन्तुपीतये । शँय्योरभिस्रवन्तुनः ।।** स्वाहा इदं शनैश्चराय ।।७।।

राहुहोममन्त्रः- ॐ कयानश्चित्र इति वामदेवऋषी राहुर्देवता गायत्रीछन्दो राहुप्रीतये हुताशनाग्नौ आज्यहोमे दूर्वासमिद्धोमे च विनियोगः। **ॐ कयानश्श्चित्रऽआभुवदूतीसदावृधःसखा । कयाशचिष्ठयावृता ।।** स्वाहा इदं राहवे ।।८।।

केतुहोममन्त्रः - ॐ केतुङ्कृण्वन्निति मधुच्छन्दा ऋषिः केतवो देवता गायत्रीछन्दः केतुप्रीतये रोहिताग्नौ आज्यहोमे कुशसमिद्धोमे च विनियोगः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

n Public Domain. Digitization by eGangotri.Funding

ॐ केतुङ्कृण्वन्नकेतवेपेशोमर्य्याऽअपेशसे । समुषद्भिरजायथाः ।।
स्वाहा इदं केतुभ्यः ।।९।।

अधिदेवताहोमः

अधिदेवताहोमे पलाशसमिद्भिस्तदभावे घृताक्तैस्तिलैर्होमः कार्यः ।

ईश्वरस्य होमः- ॐ त्र्यम्बकमिति वसिष्ठऋषिः रुद्रो देवताऽनुष्टुप्छन्दः ईश्वरप्रीतये आज्यहोमे पलाशसमिद्धोमे चरुहोमे च विनियोगः। **ॐ त्र्यम्बकँ-य्यजामहेसुगन्धिम्पुष्टिवर्द्धनम् । उर्व्वारुकमिवबन्धनान्मृत्त्योर्म्मुक्षीयमा-मृतात्** ।। स्वाहा इदमीश्वराय । अत्र प्रणीतोदकस्पर्शः ।।१।।

उमायाः० - ॐ श्रीश्चते इत्युत्तरनारायणऋषिरुमादेवता त्रिष्टुप्छन्द उमाप्रीतये आज्यहोमे प०स०हो० चरुहोमे च विनियोगः । **ॐ श्रीश्चतेलक्ष्मीश्च-पत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्विनौव्यात्तम् । इष्ण्णन्निषाणामु-म्मऽइषाणसर्वलोकम्मऽइषाण** ।। स्वाहा इदमुमायै ।।२।।

स्कन्दस्य० - ॐ यदक्रन्द इति भार्गवजमदग्निदीर्घतमसऋषयः स्कन्दो देवता त्रिष्टुप्छन्दः स्कन्दप्रीतयेः आज्यहोमे प०स०हो० चरुहोमे च विनियोगः। **ॐ यदक्रन्दःप्प्रथमञ्जायमानऽउद्यन्त्समुद्राद्युतवापुरीषात् । श्येनस्यप-क्षाहरिणस्यबाहूऽउपस्तुत्त्यम्महिजातन्तेऽअर्वन्**।। स्वाहा इदं स्कन्दाय।।३।।

विष्णोः० - ॐ विष्णोरराटमिति प्रजापतिर्ऋषिर्विष्णुर्देवता यजुर्विष्णुप्रीतये आज्यहोमे पलाशसमिद्धोमे चरुहोमे च विनियोगः । **ॐ विष्णोरराटमसिविष्णोःश्नप्त्रेस्त्थोविष्णोःस्यूरसिविष्णोर्द्ध्रुवोसिवैष्णवमसिविष्णवेत्त्वा** ।।
स्वाहा इदं विष्णवे ।।४।।

ब्रह्मणः० - ॐ आब्रह्मन्निति प्रजापतिर्ऋषिः, उत्कृतिश्छन्दो ब्रह्मा देवता ब्रह्मप्रीतये आज्यहोमे पलाशसमिद्धोमे चरुहोमे च विनियोगः। **ॐ आब्ब्रह्मन्न्ब्राह्मणोब्ब्रह्मवर्च्चसीजायतामाराष्ट्रेराजन्न्यःशूरऽइषव्व्योतिव्व्याधीम-हारथोजायतान्दोग्ग्ध्रीधेनुर्व्वोढानड्वानाशुःसप्तिःपुरन्धिर्य्योषाजिष्णू-रथेष्ठाःसभेयोयुवास्ययजमानस्यवीरोजायतान्निकामेनिकामेनःपर्ज्जन्न्यो-**

bal Sanskrit University, Balmeeki Campus, Kathman

0. In Public Domain. Digitization by eGangotri.Funding: M

वर्षतुफलवत्त्योनऽओषधयःपच्च्यन्त्तांय्योगक्षेमोनःकल्प्यताम् ।। स्वाहा इदं ब्रह्मणे ॥५॥

इन्द्रस्य० - ॐ सजोषाऽइन्द्र इति विश्वामित्रऋषिस्त्रिष्टुप्छन्द इन्द्रो देवता इन्द्रप्रीतये आज्यहोमे प०स०हो० चरुहोमे च विनियोगः । **ॐ सजोषाऽइन्द्र-सगणोमरुद्भिःसोमम्पिबवृत्रहाशूरविद्द्वान् । जहिशत्रूँ१।।रपमृधोनुद-स्वाथाभयङ्कृणुहिविश्श्वतोनः** ।। स्वाहा इदमिन्द्राय ॥६॥

यमस्य० - ॐ असियम इति भार्गवजमदग्निदीर्घतमस ऋषयो यमो देवता त्रिष्टुप्छन्दः यमप्रीतये आज्यहोमे प०स०हो० चरुहोमे च विनियोगः। **ॐ असियमोऽअस्यादित्त्योऽअर्वन्नसित्रितोगुह्येनव्व्रतेन । असिसोमेन-समयाविपृक्क्तऽआहुस्त्तेत्रीणिदिविबन्धनानि** ।। स्वाहा इदं यमाय ॥७॥ अत्र प्रणीतोदकस्पर्शः ।

कालस्य० - ॐ कार्षिरसि इति प्रजापतिऋषिः (दध्यङ्ङाथर्वणः) कालो देवता अनुष्टुप्छन्दः कालप्रीतये आज्यहोमे प०स०हो० चरुहोमे च विनियोगः। **ॐ कार्षिरसिसमुद्रस्यत्त्वाक्षित्त्याऽउन्नयामि। समापोऽअद्भिरग्मतसमोष-धीभिरोषधीः** । स्वाहा इदं कालाय ॥८॥ अत्र प्रणीतोदकस्पर्शः ।

चित्रगुप्तस्य० - ॐ चित्रावसो इति ऋषय ऋषयश्चित्रगुप्तो देवता जगतीछन्दः चित्रगुप्तप्रीतये आज्यहोमे प०स०हो० चरुहोमे च विनियोगः। **ॐ चित्रावसोस्वस्त्तितेपारमशीय** ।। स्वाहा इदं चित्रगुप्ताय ॥९॥ अत्र प्रणीतोदकस्पर्शः ।

प्रत्यधिदेवताहोमः

अग्नेर्होमः - ॐ अग्निन्दूतमिति विरूपाक्षऋषिरग्निर्देवता गायत्रीछन्दः, अग्निप्रीतये आज्यहोमे प०स०हो० चरुहोमे च विनियोगः। **ॐ अग्ग्निन्दूतम्पु-रोदधेहव्व्यवाहमुपब्ब्रुवे। देवाँ२।।ऽआसादयादिह** ।। स्वाहा इदमग्नये॥१॥

अपाम्० - ॐ अप्प्स्वन्तरिति बृहस्पतिर्ऋषिरापो देवता उष्णिक्छन्दः,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

n Public Domain. Digitization by eGangotri.Funding

अपां प्रीतये आज्यहोमे प०स०हो० चरुहोमे च विनियोगः। **ॐ अप्स्वन्तरमृतमप्सुभेषजमपामुतप्रशस्तिष्ष्वश्श्वाभवतवाजिनः । देवीरापोयोवऽऊर्म्मिःप्प्रतूर्त्तिःककुन्मान्वाजसास्तेनायंवाजꣳसेत्।** स्वाहा इदमद्भ्यः॥२॥

पृथिव्याः- ॐ स्योनापृथिवीति मेधातिथिर्ऋषिः पृथिवी देवता गायत्रीछन्दः पृथिवीप्रीतये आज्यहोमे प०स०हो० चरुहोमे च विनियोगः। **ॐ स्योनापृथिवीनोभवानृक्षरानिवेशनी । यच्छानःशर्म्मसप्प्रथाः ।।** स्वाहा इदं पृथिव्यै ॥३॥

विष्णोः- ॐ इदं विष्णुरिति मेधातिथिर्ऋषिर्विष्णुर्देवता गायत्रीछन्दो विष्णुप्रीतये आज्यहोमे प०स०हो० चरुहोमे च विनियोगः । **ॐ इदंविष्णुर्व्विचक्क्रमेत्रेधानिदधेपदम् । समूढमस्यपाꣳसुरेस्वाहा ।।** इदं विष्णवे॥४॥

इन्द्रस्य- ॐ त्रातारमिन्द्रमिति गर्गऋषिरिन्द्रो देवता त्रिष्टुप्छन्द इन्द्रप्रीतये आज्यहोमे प०स०हो० चरुहोमे च विनियोगः । **ॐ त्रातारमिन्द्रमवितारमिन्द्रꣳहवेहवेसुहवꣳशूरमिन्द्रम् । ह्वयामिशक्क्रम्पुरुहूतमिन्द्रꣳस्वस्तिनोमघवाधात्त्विन्द्रः ।।** स्वाहा इदमिन्द्राय ॥५॥

शच्याः - ॐ अदित्यैरास्नासीति दध्यङ्ङाथर्वणऋषिरिन्द्राणी देवता यजुः शचीप्रीतये आज्यहोमे प० स० हो० चरुहोमे च विनियोगः । **ॐ अदित्त्यैरास्नासीन्द्राण्याऽउष्णीषःपूषासिधर्म्मायदीष्ष्व ।।** स्वाहा इदं शच्यै ॥६॥

प्रजापतेः- ॐ प्रजापते इति हिरण्यगर्भऋषिः प्रजापतिर्देवता त्रिष्टुप्छन्दः प्रजापतिप्रीतये आज्यहोमे प०स०हो० चरुहोमे च विनियोगः । **ॐ प्रजापतेनत्त्वदेतान्यन्न्योव्विश्श्वारूपाणिपरिताबभूव । यत्त्कामास्तेजुहुमस्तन्नोऽअस्तुवयꣳस्यामपतयोरयीणाम् ।।** स्वाहा इदं प्रजापतये ॥७॥

सर्पाणाम्- ॐ नमोस्तुसर्पेभ्य इति प्रजापतिर्ऋषिः सर्पा देवता अनुष्टुप्छन्दः सर्पाणां प्रीतये आज्यहोमे प०स०हो० चरुहोमे च विनियोगः ।

pal Sanskrit University, Balmeeki Campus, Kathmar

0. In Public Domain. Digitization by eGangotri.Funding: M

ॐ नमोस्तुसर्प्पेब्भ्योयेकेचपृथिवीमनु । येऽअन्तरिक्षेयेदिवितेब्भ्यःस-
र्प्पेब्भ्योनमः ।। स्वाहा इदं सर्पेभ्यः ॥८॥

ब्रह्मणः- **ॐ ब्रह्मजज्ञानमिति** प्रजापतिर्ऋषिर्ब्रह्मा देवता त्रिष्टुप्छन्दो ब्रह्म-
प्रीतये आज्यहोमे प०स०हो० चरुहोमे च विनियोगः । **ॐ ब्रह्मजज्ञान-
म्पुरस्त्ताद्विसीमतःसुरुचोव्वेनऽआवः । सबुध्न्याऽउपमाऽअस्यविष्ठाः-
सतश्श्चयोनिमसतश्श्चविवः ।।** स्वाहा इदं ब्रह्मणे ॥९॥

विनायकादिपञ्चलोकपालहोमः

विनायकस्य होमः- ॐ गणानान्त्वेति प्रजापतिर्ऋषिर्गणपतिर्देवता
यजुर्विनायकप्रीतये आज्यहोमे प० स० हो० चरुहोमे च विनियोगः ।
**ॐ गणानान्त्वागणपतिꣳहवामहेप्प्रियाणान्त्वाप्प्रियपतिꣳहवामहेनिधी-
नान्त्वानिधिपतिꣳहवामहेव्वसोमम । आहमजानिगर्ब्भधमात्त्वमजासि-
गर्ब्भधम् ।।** स्वाहा इदं विनायकाय ॥१॥

दुर्गायाः- ॐ अम्बेऽअम्बिके इति प्रजापतिर्ऋषिर्दुर्गा देवता अनुष्टुप्छन्दो
दुर्गाप्रीतये आज्यहोमे प०स०हो० चरुहोमे च विनियोगः । **ॐ अम्बेऽ-
अम्बिकेम्बालिकेनमानयतिकश्श्चन । ससस्त्यश्श्वकःसुभद्रिकाङ्काम्पी-
लवासिनीम् ।।** स्वाहा इदं दुर्गायै ॥२॥

वायोः-ॐ व्वातोवेति बृहस्पतिर्ऋषिर्वातो देवता उष्णिक् छन्दो वायुप्रीतये
आज्यहोमे प०स०हो० चरुहोमे च विनियोगः । **ॐ व्वातोवामनोवागन्धर्वाः-
सप्तविꣳशतिः । तेऽअग्ग्रेऽश्श्वमयुञ्जँस्तेऽअस्मिञ्जवमादधुः ।।** स्वाहा
इदं वायवे ॥३॥

आकाशस्य- ॐ ऊर्द्ध्वाऽअस्येति प्रजापतिर्ऋषिराकाशो देवता उष्णि-
क्छन्द आकाशप्रीतये आज्यहोमे प०स०हो० चरुहोमे च विनियोगः ।
**ॐ उर्द्ध्वाऽअस्यसमिधोभवन्त्यूर्द्ध्वाशुक्क्राशोचीꣳष्यग्नेः । द्द्युमत्त-
मासुप्प्रतीकस्यसूनोः ।।** स्वाहा इदमाकाशाय ॥४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

n Public Domain. Digitization by eGangotri.Funding

अश्विनोः- ॐ **यावाङ्कशेति** मेधातिथिर्ऋषिरश्विनौ देवते गायत्री छन्दः अश्विनोः प्रीतये आज्यहोमे प०स०हो० चरुहोमे च विनियोगः। ॐ **यावाङ्कशामधुमत्त्यश्विनासूनृतावती । तयायज्ञम्मिमिक्षतम् ।।** स्वाहा इदमश्विभ्याम् ।।५।।

दिक्पालहोमः

इन्द्रस्य होमः- ॐ **त्रातारमिन्द्रमिति** गर्गऋषिरिन्द्रो देवता त्रिष्टुप्छन्द इन्द्रप्रीतये आज्यहोमे प०स०हो० चरुहोमे च विनियोगः । ॐ **त्रातारमिन्द्रमवितारमिन्द्रꣳहवेहवेसुहवꣳशूरमिन्द्रम् । ह्वयामिशक्क्रम्पुरुहूतमिन्द्रꣳस्वस्त्तिनोमघवाधात्त्विन्द्रः ।।** स्वाहा इदमिन्द्राय ।।१।।

अग्नेः- ॐ **अग्निन्दूतमिति** विरुपाक्षऋषिरग्निर्देवता गायत्रीछन्दोऽग्निप्रीतये आज्यहोमे प०स०हो० चरुहोमे च विनियोगः । ॐ **अग्ग्निन्दूतम्पुरोदधेहव्यवाहमुपब्ब्रुवे । देवाँ२।।ऽआसादयादिह ।।** स्वाहा इदमग्नये ।।२।।

यमस्य- ॐ **असियम** इति भार्गवजमदग्निदीर्घतमस ऋषयो यमो देवता त्रिष्टुप्छन्दो यमप्रीतये आज्यहोमे प०स०हो० चरुहोमे च विनियोगः। ॐ **असियमोऽअस्यादित्त्योऽअर्वन्नसित्त्रितोगुह्येनव्व्रतेन । असिसोमेनसमयाविपृक्तऽआहुस्त्तेत्रीणिदिविबन्धनानि।।** स्वाहा इदं यमाय ।।३।। अत्र प्रणीतोदकस्पर्शः ।

निर्ऋतेः- ॐ **एषतेनिर्ऋत** इति वरुणऋषिर्निर्ऋतिर्देवता यजुर्निर्ऋतिप्रीतये आज्यहोमे प०स०हो० चरुहोमे च विनियोगः । ॐ **एषतेनिर्ऋतेभागस्त्तञ्जुषस्वस्वाहा ।।** इदं निर्ऋतये ।।४।। अत्र प्रणीतोदकस्पर्शः ।

वरुणस्य- ॐ **इमम्मेवरुण** इति शुनःशेपऋषिर्वरुणो देवता गायत्रीछन्दो वरुणप्रीतये आज्यहोमे प०स०हो० चरुहोमे च विनियोगः । ॐ **इमम्मेवरुणश्श्रुधीहवमद्याचमृडय । त्वामवस्युराचके ।।** स्वाहा इदं वरुणाय।।५।।

pal Sanskrit University, Balmeeki Campus, Kathman

0. In Public Domain. Digitization by eGangotri.Funding: M

वायोः- ॐ वातोवेति बृहस्पतिर्ऋषिर्वातो देवता उष्णिक् छन्दो वायुप्रीतये आज्यहोमे प०स०हो० चरुहोमे च विनियोगः । **ॐ वातोवामनोवागन्धर्वाः-सप्तविंशतिः। तेऽअग्ग्रेऽश्श्वमयुञ्जँस्तेऽअस्मिञ्जवमादधुः।।** स्वाहा इदं वायवे ॥६॥

सोमस्य(कुबेरस्य)- ॐ वयंसोमेति बन्धुर्ऋषिः सोमो देवता (कुबेरः) गायत्रीछन्दः सोम (कुबेर) प्रीतये आज्यहोमे प०स०हो० चरुहोमे च विनियोगः । **ॐ वयंसोमव्व्रतेतवमनस्तनूषुबिब्भ्रतःप्रजावन्तःसचेमहि।।** स्वाहा इदं सोमाय (कुबेराय) ॥७॥

ईशानस्य- ॐ तमीशानमिति गौतमऋषिरीशानो देवता जगतीछन्दः ईशानप्रीतये आज्यहोमे प०स०हो० चरुहोमे च विनियोगः । **ॐ तमीशान-ञ्जगतस्तस्स्थुषस्प्पतिन्धियञ्जिन्वमवसेहूमहेवयम् । पूषानोयथावेदसाम-सद्वृधेरक्षितापायुरदब्ब्धःस्वस्तये ।।** स्वाहा इदमीशानाय ॥८॥ अत्र प्रणीतोदकस्पर्शः ।

ब्रह्मणः- ॐ ब्रह्मजज्ञानमिति प्रजापतिर्ऋषिर्ब्रह्मादेवता त्रिष्टुप्छन्दो ब्रह्मप्रीतये आज्यहोमे प०स०हो० चरुहोमे च विनियोगः । **ॐ ब्रह्मजज्ञा-नम्पुरस्ताद्विसीमतःसुरुचोवेनऽआवः । सबुध्न्याऽउपमाऽअस्यविष्ठाः-सतश्श्चयोनिमसतश्श्चविवः ।।** स्वाहा इदं ब्रह्मणे ॥१०॥

अनन्तस्य- ॐ नमोस्तु सर्पेभ्यः इति प्रजापतिर्ऋषिरनन्तो देवता अनुष्टुप्छन्दः अनन्तप्रीतये आज्यहोमे प०स०हो० चरुहोमे च विनियोगः। **ॐ नमोस्तुसर्प्पेब्भ्योयेकेचपृथिवीमनु । येऽअन्तरिक्षेयेदिवितेब्भ्यःस-र्प्पेब्भ्यो नमः ।।** स्वाहा इदमनन्ताय ॥१०॥

वस्वादिहोमः

वसूनाम्०- सुगावोदेवा इति प्रजापतिर्ऋषिः वसवो देवतास्त्रिष्टुप्छन्दो ध्रुवाद्यष्टवसूनां प्रीतये आज्यहोमे प०स०हो० चरुहोमे च विनियोगः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

n Public Domain. Digitization by eGangotri.Funding

ॐ सुगावोदेवासदनाऽअकर्म्मयऽआजग्मेदꣳसवनञ्जुषाणाः। भरमाणा-वहमानाहवीꣳष्ष्यस्म्मेधत्तवसवोवसूनि ।। स्वाहा इदं वसुभ्यः ॥१॥

द्वादशादित्यानाम्०- ॐ यज्ञोदेवानामिति कुत्सऋषिरादित्या देवताः त्रिष्टुप्छन्दो धात्रादिद्वादशादित्यानां प्रीतये आज्यहोमे प०स०हो० चरुहोमे च विनियोगः । **ॐ यज्ञोदेवानाम्प्रत्त्येतिसुम्न्नमादित्त्यासोभवतामृडयन्तः। आवोर्वाचीसुमतिर्व्ववृत्त्यादꣳहोश्चिद्यावरिवोवित्तरासदादित्त्येभ्भ्यस्त्त्वा।।** स्वाहा इदमादित्येभ्यः ॥२॥

रुद्राणाम्- ॐ यऽएतावन्तश्चेति परमेष्ठी ऋषिः (प्रजापतिर्वा देवा वा ऋषयः) बहुरुद्रा देवता अनुष्टुप्छन्दो वीरभद्राद्येकादशरुद्राणां प्रीतये आज्यहोमे प०स०हो० चरुहोमे च विनियोगः। **ॐ यऽएतावन्तश्श्चभूयाꣳसश्श्चदि-शोरुद्रावितस्स्थिरे । तेषाꣳसहस्त्रयोजनेबधन्न्वानितन्न्मसि ।।** स्वाहा इदꣳरुद्रेभ्यः ॥३॥ अत्र प्रणीतोदकस्पर्शः ।

मरुताम्- ॐ मरुतोयस्येति गौतमऋषिर्मरुतो देवता गायत्रीछन्दो मरुतां प्रीतये आज्यहोमे प०स०हो० चरुहोमे च विनियोगः । **ॐ मरुतोयस्य-हिक्षयेपाथादिवोविमहसः। ससुगोपातमोजनः।।** स्वाहा इदं मरुद्भ्यः॥४॥

विनायकादिपञ्चकहोमः

ब्रह्मणः- ॐ आब्रह्मन्निति प्रजापतिर्ऋषिः, उत्कृतिश्छन्दो ब्रह्मा देवता ब्रह्मप्रीतये आज्यहोमे पलाशसमिद्धोमे चरुहोमे च विनियोगः। **ॐ आब्ब्र-ह्मन्न्ब्राह्मणोब्ब्रह्मवर्च्चसीजायतामाराष्ट्रेराजन्न्यःशूरऽइषव्व्योतिव्याधी-महारथोजायतान्दोग्ग्ध्रीधेनुर्व्वोढानड्वानाशुःसप्प्तिःपुरन्धिर्य्योषाजिष्णू-रथेष्ठाःसभेयोयुवास्ययजमानस्यवीरोजायतान्निकामेनिकामेनःपर्ज्जन्न्यो-वर्षतुफलवत्त्योनऽओषधयःपच्च्यन्तांय्योगक्षेमोनःकल्प्पताम् ।।** स्वाहा इदं ब्रह्मणे ॥५॥

विष्णोः- ॐ इदं विष्णुरिति मेधातिथिर्ऋषिर्विष्णुर्देवता गायत्रीछन्दो

pal Sanskrit University, Balmeeki Campus, Kathmar

0. In Public Domain. Digitization by eGangotri.Funding: M

विष्णुप्रीतये आज्यहोमे प०स०हो० चरुहोमे च विनियोगः। ॐ इदंविष्णुर्व्वि-चक्क्रमेत्रेधानिदधेपदम्। समूढमस्यपाᳬसुरेस्वाहा।। इदं विष्णवे ॥६॥

रुद्रस्य- ॐ मानस्तोके इत्यस्य परमेष्ठी ऋषिः (प्रजापतिर्वा देवा वा ऋषयः) कुत्सश्च ऋषि एकरुद्रो देवता जगतीछन्दो रुद्रप्रीतये आज्यहोमे प०स०हो० चरुहोमे च विनियोगः । **ॐ मानस्तोकेतनयेमानऽआयुषि-मानोगोषुमानोऽअश्श्वेषुरीरिषः। मानोवीरान्नुद्रभामिनोवधीर्हविष्मन्तः-सदमित्त्वाहवामहे** ।। स्वाहा इदं रुद्राय ॥ अत्र प्रणीतोदकस्पर्शः ॥७॥

अर्कस्य०- ॐ चित्रन्देवानामिति कुत्स आङ्गिरसऋषिः सूर्यो देवता त्रिष्टु-प्छन्दोऽर्कप्रीतये आज्यहोमे प०स०हो० चरुहोमे च विनियोगः। **ॐ चित्र-न्देवानामुदगादनीकञ्चक्षुर्म्मित्रस्यवरुणस्याग्नेः । आप्प्राद्यावापृथिवीऽ-अन्तरिक्षᳬसूर्य्यऽआत्क्माजगतस्तस्थुषश्श्च** ।। स्वाहा इदमर्काय ॥८॥

वनस्पतेः- ॐ वनस्प्पते इति प्रजापतिर्ऋषिर्वनस्पतिर्देवता त्रिष्टुप्छन्दो वनस्पतिप्रीतये आज्यहोमे प०स०हो० चरुहोमे च विनियोगः। **ॐ वनस्प्पते-वीड्ड्वङ्गोहिभूयाऽअस्म्मत्त्सखाप्प्रतरणःसुवीरः । गोभिःसन्नद्धोऽअसिवी-डयस्वास्त्थातातेजयतुजेत्त्वानि** ।। स्वाहा इदं वनस्पतये ॥९॥

इति प्रधानदेवताहोममन्त्राः

प्रधानदेवतानां जप्यसूक्तानि

सूर्यसूक्तम्- ॐ विब्भ्राडित्यादिकस्य सप्तदशर्चानुवाकात्मकस्य सूर्यसूक्तस्य आद्याया विभ्राट्, अनन्तराणां तिसृणां प्रस्कण्व ऋषिः, पञ्चम्या अवत्सारः काश्यपऋषिः षष्ठ्या वेनऋषिः, सप्तम्याः कुत्सऋषिः, अष्टम्या अगस्त्यऋषिः, नवम्याः श्रुतकक्षसुकक्षावृषी, दशम्याः प्रस्कण्वः, ततो द्वयोः कुत्सः, ततो द्वयोर्जमदग्निः, पञ्चदश्या नृमेधः, षोडश्याः कुत्सः, अन्त्याया हिरण्यस्तूप आङ्गिरसः, इति ऋषयः । सर्वासां सूर्यो देवता । आद्यायाः पञ्चम्याश्च जगती, द्वितीयादितिसृणां नवम्या दशम्याश्च गायत्री,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

n Public Domain. Digitization by eGangotri.Funding

त्रयोदशीपञ्चदश्योर्बृहती, चतुर्दश्याः सतोबृहती, शिष्टानां सप्तानां त्रिष्टुप् इति छन्दांसि सूर्यप्रीतये विनियोगः ।

ॐ विभ्राड्बृहत्पिबतुसोम्म्यम्मद्वायुर्द्दधद्यज्ञपतावविह्रुतम् । व्वातजूतोय्योऽअभिरक्षतित्त्मनाप्प्रजाःपुपोषपुरुधाविराजति।।१।। ॐ उदुत्त्यञ्जातवेदसन्देवंव्वहन्तिकेतवः । दृशेविश्श्वायसूर्य्यम् ।।२।। ॐ येनापावकचक्षसाभुरण्यन्तञ्जनाँ२।।ऽअनु। त्वंव्वरुणपश्यसि।।३।। ॐ दैव्व्यावद्ध्वर्य्यूऽआगतꣳरथेनसूर्य्यत्त्वचा। मद्ध्वायज्ञꣳसमञ्जाथे।।४।। ॐ तम्प्रत्नथायंवेनश्चित्रंदेवानांतम्प्रत्नथापूर्व्वथाविश्श्वथेमथाज्ज्येष्ठतातिम्बर्हिषदꣳस्वर्विदम्। प्रतीचीनंव्वृजनन्दोहसेधुनिमाशुञ्जयन्तमनुयासुवर्द्धसे।।५।। ॐ अयंव्वेनश्श्चोदयत्पृश्श्निगर्भाज्ज्योतिर्ज्जरायूरजसोविमाने। इममपाꣳसङ्गमेसूर्य्यस्यशिशुन्नविप्प्रामतिभीरिहन्ति ।।६।। ॐ चित्रन्देवानामुदगादनीकञ्चक्षुर्म्मित्रस्यव्वरुणस्याग्ग्नेः । आप्प्राद्यावापृथिवीऽअन्तरिक्षꣳसूर्य्यऽआत्त्माजगतस्तस्त्थुषश्श्च।।७।। ॐ आनऽइडाभिर्व्विदथेसुशस्तिविश्श्वानरःसवितादेवऽएतु । अपियथायुवानोमत्त्सथानोविश्श्वञ्जगदभिपित्त्वेमनीषा।।८।। ॐ यदद्यकच्चव्वृत्रहन्नुदगाऽअभिसूर्य्य । सर्व्वन्तदिन्द्रतेवशे ।।९।। ॐ तरणिर्व्विश्श्वदर्शतोज्ज्योतिष्कृदसिसूर्य्य । विश्श्वमाभासिरोचनम्।।१०।। ॐ तत्सूर्य्यस्यदेवत्त्वन्तन्महित्त्वम्मद्ध्याकर्त्तोर्व्विततꣳसञ्जभार। यदेदयुक्तहरितःसधस्त्थादाद्रात्रीवासस्तनुतेसिमस्म्मै ।।११।। ॐ तन्मित्रस्यव्वरुणस्याभिचक्षेसूर्य्योरूपङ्कृणुतेद्यौरुपस्त्थे । अनन्तमन्न्यद्रुशदस्यपाजःकृष्णमन्न्यद्धरितःसम्भरन्ति ।।१२।। ॐ बण्महाँ२।।ऽअसिसूर्य्यबडादित्त्यमहाँ२।।ऽअसि । महस्तेसतोमहिमापनस्यतेद्धादेवमहाँ२।।ऽअसि ।।१३।। ॐ बट्सूर्य्यश्श्रवसामहाँ२।।ऽअसिसत्रादेवमहाँ२।।ऽअसि । मह्नादेवानामसुर्य्यःपुरोहितोविभुज्ज्योतिरदाब्भ्यम् ।।१४।। ॐ श्रायन्तऽइवसूर्य्यंविश्श्वेदिन्द्रस्यभक्षत। वसूनिजातेजनमानऽओजसाप्प्रतिभागन्नदीधिम ।।१५।। ॐ अद्यादेवाऽउदितासूर्य्यस्यनिरꣳहसःपिपृतानिरवद्यात् । तन्नोमित्रोव्वरुणोमामह-

pal Sanskrit University, Balmeeki Campus, Kathman

0. In Public Domain. Digitization by eGangotri.Funding: M

न्तामदितिःसिन्धुःपृथिवीऽउतद्यौः ।।१६।। ॐ आकृष्णेनरजसावर्त्तमानोनिवेशयन्नमृतम्मर्त्त्यञ्च । हिरण्ययेनसवितारथेनादेवोयातिभुवनानिपश्यन् ।।१७।।

सोमसूक्तम्- ॐ अषाढंयुत्सु इत्यादिकस्य ऋक्चतुष्टयात्मकसोमसूक्तस्य गौतमऋषिः सोमो देवता त्रिष्टुप्छन्दः सोमप्रीतये जपे विनियोगः । (यजुः संहिता अ. ३३ मं. ३०-४३) ।

ॐ अषाढंय्युत्सुपृतनासुपप्प्रिꣳस्वर्षामप्सांवृजनस्यगोपाम् । भरेषुजाꣳसुक्षितिꣳसुश्श्रवसञ्जयन्तन्त्वामनुमदेमसोम ।।१।। ॐ सोमोधेनुꣳसोमोऽअर्वन्तमाशुꣳसोमोवीरङ्कर्म्मण्यन्ददाति । सादन्यंविदत्थ्यꣳसभेयम्पितृश्श्रावणंय्योददाशदस्मै ।।२।। ॐ त्वमिमाऽओषधीःसोमविश्श्वास्त्वमपोऽअजनयस्त्वङ्गाः । त्वमाततन्थोर्वन्तरिक्षन्त्वञ्ज्योतिषावितमोववर्त्थ ।।३।। ॐ देवेननोमनसादेवसोमरायोभागꣳसहसावन्नभियुद्ध्य । मात्त्वातनदीशिषेवीर्य्यस्योभयेब्भ्यःप्प्रचिकित्त्सागविष्टौ ।।४।। (य.सं.अ.३४-मं. २१-२४) ।

भौमसूक्तम्- ॐ अग्निर्मूर्द्धेति विरूपाक्षऋषिर्भौमो देवता गायत्रीछन्दो भौमप्रीतये जपे विनियोगः । ॐ अग्ग्निर्म्मूर्द्धादिवःककुत्पतिःपृथिव्याऽअयम् । अपाꣳरेताꣳसिजिन्वति ।।१।।

बुधसूक्तम्- ॐ उद्बुद्ध्यस्वेति परमेष्ठी ऋषिर्बुधो देवता त्रिष्टुप्छन्दो बुधप्रीतये जपे विनियोगः । ॐ उद्बुद्ध्यस्वाग्ग्नेप्प्रतिजागृहित्त्वमिष्टापूर्त्तेसꣳसृजेथामयञ्च । अस्मिन्त्सधस्त्थेऽअध्युत्तरस्मिन्विश्श्वेदेवायजमानश्श्चसीदत ।।१।।

बृहस्पतिसूक्तम्- ॐ बृहस्पतेऽअतीति गृत्समदऋषिर्बृहस्पतिर्देवता त्रिष्टुप्छन्दो बृहस्पतिप्रीतये जपे विनियोगः । ॐ बृहस्पतेऽअतियदर्य्योऽअर्हाद्द्युमद्विभातिक्क्रतुमज्जनेषु । यद्दीदयच्छवसऽऋतप्प्रजाततदस्मा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

n Public Domain. Digitization by eGangotri.Funding

सुद्रविणंधेहिचित्रम् ।।१।।

शुक्रसूक्तम्- ॐ अन्नात्परिस्रुत इति प्रजापत्यश्विसरस्वतीन्द्रा ऋषयः शुक्रो देवता जगतीछन्दः शुक्रप्रीतये जपे विनियोगः । ॐ अन्नात्परिस्रुतोरस-म्ब्रह्मणाव्यपिबत्क्षत्रम्पयःसोमम्प्रजापतिः । ऋतेनसत्त्यमिन्द्रियंविपानꣳ-शुक्क्रमन्धसऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु ।।१।।

शनिसूक्तम् - ॐ शन्नोदेवीरिति दध्यङ्ङाथर्वणऋषिः शनैश्चरो देवता गायत्रीछन्दः शनैश्चरप्रीतये जपे विनियोगः । ॐ शन्नोदेवीरभिष्टयऽआपो-भवन्तुपीतये । शँय्योरभिस्रवन्तुनः ।।१।।

राहुसूक्तम्- ॐ कयानइत्यादितृचस्य राहुसूक्तस्य वामदेवऋषी राहुर्देवता गायत्रीछन्दो राहुप्रीतये जपे विनियोगः । ॐ कयानश्चित्रऽआभुवदूतीसदा-वृधःसखा । कयाशचिष्ठयावृता ।।१।। ॐ कस्त्वासत्त्योमदानाम्मꣳहि-ष्ठोमत्त्सदन्धसः । दृढाचिदारुजेवसु ।।२।। अभीषुणः सखीनामविता-जरितृणाम् । शतम्भवास्यूतये ।।३।। (य.सं.अ. २७ मं. ३९-४१)।

केतुसूक्तम् - ॐ केतुङ्कृण्वन्निति मधुच्छन्दा ऋषिः केतवो देवता गायत्रीछन्दः केतूनां प्रीतये जपे विनियोगः । ॐ केतुङ्कृण्वन्नकेतवेपेशो-मर्य्याऽअपेशसे । समुषद्भिरजायथाः ।।१।।

अधिदेवतासूक्तानि

रुद्रसूक्तम्- ॐ नमस्ते इति षट्षष्टिमन्त्रात्मकस्य रुद्रसूक्तस्य परमेष्ठी प्रजापतिर्वा ऋषिराद्यानां षोडशानामेकरुद्रो देवता **नमस्ते०** इति गायत्री, ततस्तिस्रोऽनुष्टुभः, ततस्तिस्रः पङ्क्तयः, ततः सप्तानुष्टुभः, ततो द्वे जगत्यौ **नमोहिरण्यबाहवे०** इत्यादीनि पञ्चचत्वारिंशद्यजूंषि तेषां बहुरुद्रा देवताः, ततः सप्तानामेकरुद्रो देवता, **द्रापेऽअन्धसस्पते०** इत्युपरिष्टाद्बृहती, **इमा-रुद्राय०** इति जगती, **यातेरुद्र०** इत्यनुष्टुप्, **परिनोरुद्र०** **मीढुष्टम०**

pal Sanskrit University, Balmeeki Campus, Kathman

0. In Public Domain. Digitization by eGangotri.Funding: M

इत्येते त्रिष्टुभौ, विकिरिद्र० इत्यादि द्वे अनुष्टुभौ, असंख्यातासहस्राणि० इत्यादिदशानां बहुरुद्रा देवता दशाप्यनुष्टुभः, नमोऽस्तु० इति त्रयाणां बहुरुद्रा देवता त्रीण्यपि यजूंषि सर्वेषां रुद्रप्रीतये जपे विनियोगः । ॐ नमस्ते० इत्यादि जम्भेदध्मः० इत्यन्तम् ६६ मन्त्राणि जपेत् । हवामहे० इत्यन्ताः षोडशैव वा सूक्तमिति रूपनारायणीये ।

उमासूक्तम्- ॐ **श्रीश्श्चते** इत्युत्तरनारायणऋषिरुमा देवता त्रिष्टुप्छन्द उमाप्रीतये जपे विनियोगः । **श्रीश्श्चतेलक्ष्मीश्श्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्विनौव्यात्तम् । इष्ष्णन्निषाणामुम्मऽइषाणसर्वलोकम्मऽइषाण ।।**

स्कन्दसूक्तम्- यदक्रन्द० इति भार्गवजमदग्निदीर्घतमस ऋषयः स्कन्दो देवता त्रिष्टुप्छन्दः स्कन्दप्रीतये जपे विनियोगः । ॐ **यदक्रन्दःप्प्रथमञ्जायमानऽउद्यन्त्समुद्द्रादुतवापुरीषात् । श्येनस्यपक्षाहरिणस्यबाहूऽउपस्तुत्त्यम्महिजातन्तेऽअर्व्वन् ।।**

पुरुषसूक्तम्- ॐ **सहस्रशीर्षे**त्यादिषोडशर्चात्मकविष्णुसूक्तस्य नारायणपुरुषो देवता अन्त्यायास्त्रिष्टुप्छन्दः शिष्टानामनुष्टप्छन्दो विष्णुप्रीतये जपे विनियोगः। ॐ **सहस्रशीर्षापुरुषः०** इत्यादि **सन्तिदेवाः** इत्यन्तम् (१६) पुरुषसूक्तं प्रसिद्धम् ।।

ब्रह्मसूक्तम्- ॐ **आब्रह्मन्निति** प्रजापतिर्ऋषिर्ब्रह्मा देवता उत्कृतिश्छन्दो ब्रह्मप्रीतये जपे विनियोगः। ॐ **आब्ब्रह्मन्ब्राह्मणोब्ब्रह्मवर्च्चसीजायतामाराष्ट्रेराजन्न्यः शूरऽइषव्व्योतिव्व्याधीमहारथोजायतान्दोग्ध्रीधेनुर्वोढानड्वानाशुःसप्प्तिःपुरन्धिर्य्योषाजिष्णूरथेष्ठाःसभेयोयुवास्ययजमानस्यवीरोजायतान्निकामेनिकामेनःपर्ज्जन्न्योवर्षतुफलवत्त्योनऽओषधयःपच्च्यन्तांय्योगक्षेमोनःकल्प्पताम् ।।**

इन्द्रसूक्तम्- ॐ **आशुःशिशान** इति द्वादशर्चात्मकस्येन्द्रसूक्तस्याप्रतिरथऋषिरिन्द्रो देवता त्रिष्टुप्छन्द इन्द्रप्रीतये जपे विनियोगः । ॐ **आशुः**

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

n Public Domain. Digitization by eGangotri.Funding

शिशानः० इत्यादि **सचन्ताम्** इत्यन्तं द्वादशमन्त्रात्मकमिन्द्रसूक्तम् । (य. सं. अ. १७ मं. ३३-४४)।

यमसूक्तम्- ॐ असियम इति भार्गवजमदग्निर्दीर्घतमस ऋषयो यमो देवता त्रिष्टुप्छन्दो यमप्रीतये जपे विनियोगः । **ॐ असियमोऽअस्यादित्त्योऽअर्वन्नसित्त्रितोगुह्येनव्व्रतेन । असिसोमेनसमयाविपृक्तऽआहुस्तेत्रीणिदिविबन्धनानि ।।** अत्रोदकस्पर्शः ।

कालसूक्तम्- ॐ कार्षिरसीति प्रजापतिर्ऋषिः (अथवा) कालो देवता अनुष्टुप्छन्दः कालप्रीतये जपे विनियोगः । **ॐ कार्षिरसिसमुद्रस्यत्त्वाक्षित्त्याऽउन्नयामि । समापोऽअद्भिरग्ग्मतसमोषधीभिरोषधीः ।।** अत्र उदकस्पर्शः ।

चित्रगुप्तसूक्तम्- ॐ चित्रावसो० इति ऋषय ऋषयश्चित्रगुप्तो देवता जगतीछन्दश्चित्रगुप्तप्रीतये जपे विनियोगः । **ॐ चित्रावसोस्वस्तितेपारमशीय ।।** अत्रोदकस्पर्शः ।

प्रत्यधिदेवतासूक्तानि

अग्निसूक्तम्- (सूर्यप्रत्यधिदेवताया अग्नेः) **ॐ अस्याजरासः** इत्यादिसप्तदशर्चस्याग्निसूक्तस्याद्याया वत्सप्रीतिर्ऋषिस्त्रिष्टुप्छन्दः, द्वितीयाया विरूपऋषिर्गायत्रीछन्दः, तृतीयाया गौतमऋषिर्गायत्रीछन्दः, चतुर्थ्या विरूपऋषिर्गायत्री छन्दः, पञ्चम्याः कुत्सऋषिस्त्रिष्टुप्छन्दः, षष्ठ्या वामदेव- ऋषिरेकोनाजगतीछन्दः, सप्तम्या विश्वामित्रऋषिस्त्रिष्टुप्छन्दः, अष्टम्या भरद्वाजऋषिस्त्रिष्टुप्छन्दः, नवम्या भरद्वाजऋषिर्गायत्रीछन्दः, दशम्या मेधातिथिर्ऋषिर्गायत्रीछन्दः, एकादश्याः शाक्त्यःपराशरऋषिस्त्रिष्टुप्छन्दः, द्वादश्या अत्रिदुहिता विश्ववारा ऋषिस्त्रिष्टुप्छन्दः, त्रयोदश्या भरद्वाजऋषिस्त्रिष्टुप्छन्दः, चतुर्दश्या वसिष्ठऋषिर्बृहतीछन्दः, पञ्चदश्याः प्रस्कण्वऋषिर्बृहतीछन्दः, षोडश्या वामदेवऋषिस्त्रिष्टुप्छन्दः, सप्तदश्या लुशोधानाकऋषिस्त्रिष्टुप्छन्दः, सर्वासामग्निर्देवता अग्निप्रीतये जपे विनियोगः।

bal Sanskrit University, Balmeeki Campus, Kathmar

0. In Public Domain. Digitization by eGangotri.Funding: M

ॐ अस्याजरासोदमामरित्राऽअर्च्चद्धूमासोऽअग्ग्रयःपावकाः। श्वितीचयःश्वात्रासोभुरण्यवोव्वनर्षदोव्वायवोनसोमाः ।।१।। ॐ हरयोधूमकेतवोव्वातजूताऽउपद्यवि। यतन्तेव्वृथगग्ग्रयः ।।२।। ॐ यजानोमित्रावरुणायजादेवाँ२।।ऽऋतम्बृहत् । अग्ग्रेयक्षिस्वन्दमम् ।।३।। ॐ युक्ष्वाहिदेवहूतमाँ२।।ऽअश्वाँ२।।ऽअग्ग्रेरथीरिव । निहोतापूर्व्यःसदः ।।४।। ॐ द्वेव्विरूपेचरतःस्वर्त्थेऽअन्न्यान्न्याव्वत्समुपधापयेते। हरिरन्न्यस्याम्भवतिस्वधावाञ्छुक्क्रोऽअन्न्यस्यान्ददृशेसुवर्च्चाः।।५।। ॐ अयमिहप्प्रथमोधायिधातृभिर्होतायजिष्ठोऽअद्ध्वरेष्वीड्यः । यमप्नवानोभृगवोव्विरुरुचुर्व्वनेषुचित्रंव्विभ्वंव्विशेव्विशे ।।६।। ॐ त्रीणिशतात्त्रीसहस्राण्यग्ग्निन्त्रिꣳशच्चदेवानवचासपर्य्यन् । औक्षन्घृतैरस्तृणन्बर्हिरस्म्माऽआदिद्धोतारन्न्यसादयन्त ।।७।। ॐ मूर्द्धानन्दिवोऽअरतिम्पृथिव्यावैश्वानरमृतऽआजातमग्ग्निम् । कविꣳसम्म्राजमतिथिञ्जनानामासन्नापात्रञ्जनयन्तदेवाः ।।८।। ॐ अग्ग्निर्व्वृत्राणिजङ्घनद्द्रविणस्युर्व्विपन्न्यया । समिद्धःशुक्क्रऽआहुतः ।।९।। ॐ व्विश्श्वेभिःसोम्म्यम्मद्ध्वग्ग्रऽइन्द्रेणवायुना। पिबामित्रस्यधामभिः ।।१०।। ॐ आयदिषेनृपतिन्तेजऽआददशुचरेतोनिषिक्तन्द्यौरभीके । अग्ग्निःशर्द्धमनवद्यंय्युवानꣳस्वाद्ध्यञ्जनत्सूदयच्च ।।११।। ॐ अग्ग्रेशर्द्धमहतेसौभगायतवद्युम्म्नान्न्युत्तमानिसन्तु। सञ्जास्पत्त्यꣳसुयममाकृणुष्ष्वशत्रूयतामभितिष्ठामहाꣳसि ।।१२।। ॐ त्वाꣳहिमन्दूतममर्क्कशोकैर्व्ववृमहेमहिनःश्रोष्ष्यग्ग्रेः । इन्द्रन्नत्त्वाशवसादेवतावायुम्पृणन्तिराधसानृतमाः ।।१३।। ॐ त्वेऽअग्ग्रेस्वाहुतप्प्रियासःसन्तुसूरयः । यन्तारोयेमघवानोजनानामूर्व्वान्दयन्तगोनाम् ।।१४।। ॐ श्रुधिश्श्रुत्त्कर्णवह्निभिर्द्देवैरग्ग्नेसयावभिः । आसीदन्तुबर्हिषिमित्रोऽअर्य्यमाप्प्रातर्य्यावाणोऽअद्धरम् ।।१५।। ॐ व्विश्श्वेषामदितिर्य्यज्ञियानांव्विश्श्वेषामतिथिर्म्मानुषाणाम् । अग्ग्निर्द्देवानामवऽआवृणानःसुमृडीकोभवतुजातवेदाः ।।१६।। ॐ महोऽअग्ग्रेःसमिधानस्यशर्म्मण्यनागामित्रेव्वरुणेस्वस्त्तये । श्रेष्ठेस्यामसवितुःसवीमनितद्देवानामवोऽअद्याव्वृणी-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

n Public Domain. Digitization by eGangotri.Funding

महे ।।१७।। (य.सं.अ. ३३ मं. १-१७)।

अपां सूक्तम्- ॐ आपोहिष्ठेत्यादिकस्य तृचस्याप्सूक्तस्य सिन्धुद्वीपऋषिरापो देवता गायत्रीछन्दोऽपां प्रीतये जपे विनियोगः । **ॐ आपोहिष्ठामयोभुवस्तानऽऊर्ज्जेदधातन । महेरणायचक्षसे ।।१।। ॐ योवःशिवतमोरसस्तस्यभाजयतेहनः । उशतीरिवमातरः ।।२।। ॐ तस्माऽअरङ्गमामवोयस्यक्षयायजिन्वथ । आपोजनयथाचनः ।।३।।** (य.सं.अ. ११ मं. ५०-५२)।

पृथिवीसूक्तम्- ॐ स्योनापृथिवीति मेधातिथिर्ऋषिः पृथिवी देवता गायत्रीछन्दः पृथिवीप्रीतये जपे विनियोगः । **ॐ स्योनापृथिविनोभवानृक्षरानिवेशनी । यच्छानःशर्म्मसप्प्रथाः ।।**

विष्णुसूक्तम्- सहस्रशीर्षेत्यादिसूक्तं प्राग्वत् (१६ मन्त्राः) ।

इन्द्रसूक्तम् - ॐ आशुःशिशान इत्यादि द्वादशर्चमैन्द्रं सूक्तं प्राग्वत् (१२ मन्त्राः)।

इन्द्राणीसूक्तम्- ॐ अदित्यैरास्नासीति दध्यङ्ङाथर्वणऋषिरिन्द्राणी देवता यजुरिन्द्राणीप्रीतये जपे विनियोगः । **ॐ अदित्त्यैरास्नासीन्द्राण्याऽउष्णीषःपूषासिघर्मायवीष्व ।।१।।**

प्रजापतिसूक्तम्- ॐ हिरण्यगर्ब्भ इत्यादिकस्य मन्त्रचतुष्टयात्मकस्य प्रजापतिसूक्तस्य हिरण्यगर्भऋषिः प्रजापतिर्देवता आद्यतृतीये त्रिष्टुभौ, द्वितीयचतुर्थे यजुषी, प्रजापतिप्रीतये जपे विनियोगः । **ॐ हिरण्यगर्ब्भःसमवर्त्ततागग्रेभूतस्यजातःपतिरेकऽआसीत् । सदाधारपृथिवीन्द्यामुतेमाङ्कस्मैदेवायहविषाविधेम ।।१।। ॐ उपयामगृहीतोसिप्प्रजापतयेत्त्वाजुष्टङ्गृह्णाम्म्येषतेयोनिःसूर्य्यस्त्तेमहिमा । यस्त्तेहन्त्संवत्त्सरेमहिमासम्बभूवयस्त्तेवायावन्तरिक्षेमहिमासम्बभूवयस्त्तेदिविसूर्य्येमहिमासम्बभूवतस्म्मैतेमहिम्न्नेप्प्रजापतयेस्वाहादेवेब्भ्यः ।।२।। ॐ यःप्प्राणतोनिमिषतो-**

bal Sanskrit University, Balmeeki Campus, Kathman

0. In Public Domain. Digitization by eGangotri.Funding: M

महित्त्वैकऽइद्राजाजगतोबभूव । यऽईशेऽअस्यद्द्विपदश्श्चतुष्पदःकस्मै-देवायहविषाविधेम ।।३।। ॐ उपयामगृहीतोसिप्रजापतयेत्त्वाजुष्ट-ङ्गृह्णाम्म्येषतेयोनिश्श्चन्द्रमास्तेमहिमायस्तेरात्रौसंवत्त्सरेमहिमासम्बभूव। यस्तेपृथिव्यामग्नौमहिमासम्बभूवयस्तेनक्षत्रेषुचन्द्रमसिमहिमासम्बभूव-तस्मैतेमहिम्नेप्रजापतयेदेवेब्भ्यःस्वाहा ।।४।। (य. सं. अ. २३ मं. १-४) ॥

सर्पसूक्तम्- ॐ नमोऽस्तु इत्यादितृचसूक्तस्य प्रजापतिर्ऋषिः सर्पा देवताः अनुष्टुप्छन्दः सर्पाणां प्रीतये जपे विनियोगः । ॐ नमोस्तुसर्प्पेब्भ्योयेकेच-पृथिवीमनु। येऽअन्तरिक्षेयेदिवितेब्भ्यःसर्प्पेब्भ्योनमः ।।१।। ॐ याऽ-इषवोयातुधानानांय्येवावनस्पतीँ१।।रनु । येवावटेषुशेरतेतेब्भ्यःसर्प्पे-ब्भ्योनमः ।।२।। ॐ येवामीरोचनेदिवोयेवासूर्य्यस्यरश्मिषु । येषाम-प्सुसदस्कृतन्तेब्भ्यःसर्प्पेब्भ्योनमः ।।३।। (य.सं.अ.१३ मं. ६-८)

ब्रह्मसूक्तम्- ॐ ब्रह्मजज्ञानमिति प्रजापतिर्ऋषिर्ब्रह्मा देवता त्रिष्टुप्छन्दो ब्रह्म-प्रीतये जपे विनियोगः । ॐ ब्रह्मजज्ञानम्पुरस्ताद्विसीमतःसुरुचोवेनऽ-आवः। सबुध्न्याऽउपमाऽअस्यविष्ठाःसतश्श्चयोनिमसतश्श्चविवः ।।१।।

विनायकादिपञ्चलोकपालसूक्तानि

गणेशसूक्तम्- ॐ गणानान्त्वेति प्रजापतिर्ऋषिर्गणपतिर्देवता यजुर्विनायकप्रीतये जपे विनियोगः । ॐ गणानान्त्वागणपतिꣳहवामहेप्रि-याणान्त्वाप्प्रियपतिꣳहवामहेनिधीनान्त्वानिधिपतिꣳहवामहेवसोमम। आहमजानिगर्ब्भधमात्त्वमजासिगर्ब्भधम् ।।१।।

दुर्गासूक्तम्- ॐ अम्बेऽअम्बिके इति प्रजापतिर्ऋषिर्दुर्गा देवताऽअनुष्टुप्छन्दो दुर्गाप्रीतये जपे विनियोगः। ॐ अम्बेऽअम्बिकेम्बालिकेनमानयतिकश्श्चन। ससस्त्यश्श्वकःसुभद्रिकाङ्काम्पीलवासिनीम् ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

n Public Domain. Digitization by eGangotri.Funding

वायुसूक्तम्- ॐ नियुत्त्वान्वायो इत्यादिषड्चस्य वायुसूक्तस्याद्याया गृत्समद ऋषिः, द्वितीयायाः पुरुमीढाजमीढौ, ततस्तिसृणां प्रजापतिः, षष्ठ्या व्यश्वआङ्गिरस इति ऋषयः। सर्वासां वायुर्देवता। द्वितीयाया अनुष्टुप्छन्दः, पञ्चम्यास्त्रिष्टुप्, शिष्टानां गायत्री इति छन्दांसि, वायुप्रीतये जपे विनियोगः। ॐ नियुत्त्वान्वायवागह्ययꣳशुक्क्रोऽअयामिते । गन्तासिसुन्वतो- गृहम् ।।१।। ॐ व्वायोशुक्क्रोऽयामितेमद्ध्वोऽअग्ग्रन्दिविष्टिषु । आया- हिसोमपीतयेस्प्पार्हेदिवोनियुत्त्वता ।।२।। ॐ व्वायुरग्ग्रेगायज्ञप्प्रीःसा- कङ्गन्मनसायज्ञम् । शिवोनियुद्भिःशिवाभिः ।।३।। ॐ व्वायोयेतेसह- स्त्रिणोरथासस्तेभिरागहि । नियुत्त्वान्त्सोमपीतये ।।४।। ॐ एकयाचद- शभिश्श्चस्वभूतेद्व्वाभ्यामिष्ट्येविꣳशतीच । तिसृभिश्श्चवहसेत्रिꣳशताच- नियुद्भिर्वायविहताविमुञ्च ।।५।। ॐ तवव्वायवृतस्प्पतेत्त्वष्टुर्ज्जामात- रद्भुत । अवाꣳस्यावृणीमहे ।।६।। (य.सं.अ. २७ मं. २९-३४)।

आकाशसूक्तम्- ॐ ऊद्ध्वर्वाऽअस्येति द्वादशर्चस्य प्रजापतिर्ऋषिरग्निर्देवता उष्णिक्छन्दः आकाशप्रीतये जपे विनियोगः। ॐ ऊद्ध्वर्वाऽअस्यसमिधो- भवन्त्यूद्ध्वर्वाशुक्क्राशोचीꣳष्यग्ग्ने । द्युमत्तमासुप्प्रतीकस्यसूनोः ।।१।। ॐ तनूनपादसुरोव्विश्श्ववेदादेवोदेवेषुदेवः । पथोऽअनक्तुमद्ध्वाघृ- तेन ।।२।। ॐ मद्ध्वायज्ञन्नक्षसेप्प्रीणानोनराशꣳसोऽअग्ग्ने । सुकृद्देवः- सविताव्विश्श्ववारः ।।३।। ॐ अच्छायमेतिशवसाघृतेनेडानोवह्निर्न्नमसा। अग्ग्निꣳस्त्रुचोऽअद्ध्वरेषुप्प्रयत्सु ।।४।। ॐ सयक्षदस्यमहिमानमग्ग्रेः- सऽईम्मन्द्रासुप्प्रयसः । वसुश्श्चेतिष्ठोवसुधातमश्श्च ।।५।। ॐ द्वारोदे- वीरन्वस्यव्विश्श्वेव्व्रताददन्तेऽअग्ग्रेः । उरुव्यचसोधाम्म्रापत्त्यमानाः ।।६।। ॐ तेऽअस्ययोषणेदिव्व्येनयोनाऽउषासानक्क्ता । इमंय्यज्ञमवतामद्ध्व- रन्नः ।।७।। ॐ दैव्व्याहोताराऽऊद्ध्वर्वमद्ध्वरन्नोग्ग्रेर्ज्जिह्वामभिगृणीतम्। कृणुतन्तःस्विष्टिम् ।।८।। ॐ तिस्त्रोदेवीर्ब्बर्हिरिदꣳसदन्त्विडासरस्वती- भारती। महीगृणाना ।।९।। ॐ तन्नस्तुरीयमद्भुतम्पुरुक्षुत्त्वष्टासुवीर्य्यम्। रायस्प्पोषंव्विष्ष्यतुनाभिमस्म्मे ।।१०।। ॐ व्वनस्प्पतेवसृजाररराणस्त्मना-

pal Sanskrit University, Balmeeki Campus, Kathman

0. In Public Domain. Digitization by eGangotri.Funding: M

देवेषु । अग्निर्हव्यꣳशमितासूदयाति ।।११।। ॐ अग्नेस्वाहाकृणुहि-जातवेदऽइन्द्रायहव्यम् । विश्श्वेदेवाहविरिदञ्जुषन्ताम् ।।१२।। (य.सं.अ. २७ मं. ११-२२) ।

अश्विसूक्तम्- ॐ **यावाङ्कशेति** मेधातिथिर्ऋषिरश्विनौ देवते गायत्री छन्दोऽश्विनोः प्रीतये जपे विनियोगः । ॐ यावाङ्कशामधुमत्त्यश्श्विनासू-नृतावती । तयायज्ञम्मिमिक्षतम् ।।

दिक्पालसूक्तम्

इन्द्रसूक्तम्- ॐ **आशुःशिशान** इति द्वादशर्चमैन्द्रं सूक्तं प्रागवत् ।
ॐ **अस्याजरास** इति सप्तदशर्चमाग्नेयं सूक्तं प्रागवत् ।

यमसूक्तम्- ॐ **यमायत्त्वेतिदध्यङ्ङाथर्वणऋषिर्यमो देवता यजुर्यमप्रीतये जपे विनियोगः । ॐ यमायत्त्वाङ्गिरस्वतेपितृमतेस्वाहा । स्वाहाघर्म्माय-स्वाहाघर्मःपित्रे । यमायत्त्वामखायत्त्वासूर्य्यस्यत्त्वातपसे । देवस्त्वा-सवितामद्ध्वानक्क्तु । पृथिव्याःसꣳस्पृशस्प्पाहि । अर्च्चिरसिशोचि-रसितपोसि ।। उदकस्पर्शः ।

निर्ऋतिसूक्तम्- ॐ असुन्वन्तमित्यादिकस्य तृचस्य निर्ऋतिसूक्तस्य प्रजापतिर्ऋषिर्निर्ऋतिर्देवता त्रिष्टुप्छन्दो निर्ऋतिप्रीतये जपे विनियोगः । ॐ असुन्वन्तमयजमानमिच्छस्तेनस्येत्त्यामन्विहितस्करस्य । अन्न्यम-स्म्मदिच्छसातऽइत्यानमोदेविनिर्ऋतेतुब्भ्यमस्तु ।।१।। ॐ नमः-सुतेनिर्ऋतेतिग्मतेजोयस्म्मयंविचृताबन्धमेतम् । यमेनत्त्वंय्यम्यासंवि-दानोत्तमेनाकेऽअधिरोहयैनम् ।।२।। ॐ यस्यास्तेघोरऽआसञ्जुहोम्येषां-बन्धानामबसर्ज्जनाय । यान्त्वाजनोभूमिरितिप्रमन्दतेनिर्ऋतिन्त्वा-हम्परिवेदविश्श्वतः ।।३।। (य.सं.अ. १२ मं. ६२-६४)। उदकस्पर्शः।

वरुणसूक्तम्- **इमंमेवरुण० तत्वायामि०** इति द्वयोः शुनःशेप ऋषिर्वरुणो देवता गायत्रीत्रिष्टुभौ छन्दसी वरुणप्रीतये जपे विनियोगः । ॐ इमम्मे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

n Public Domain. Digitization by eGangotri.Funding

वरुणश्श्रुधीहवमद्याचमृडय। त्वामवस्युराचके ।।१।। ॐ तत्त्वायामि-ब्ब्रह्मणावन्दमानस्तदाशास्तेयजमानोहविर्ब्भिः। अहेडमानोवरुणेहबो-द्ध्युरुशꣳसमानऽआयुःप्प्रमोषीः ।।२।। (य.सं.अ. २१ मं. १-२)।

वायुसूक्तम्- ॐ नियुत्त्वानित्यादिषडृचं वायव्यं प्राग्वत् ।

सोम(कुबेर)सूक्तम्- ॐ अषाढंय्युत्त्सु इत्यादि चतुर्ऋचं सौम्यं सूक्तं प्राग्वत् ।

ईशानसूक्तम्- ॐ रुद्राध्यायस्य षट्षष्टिमन्त्रात्मकमैशानं प्राग्वत् ॥ उदकस्पर्शः ।

ब्रह्मसूक्तम्- ॐ ब्रह्मजज्ञानमिति ब्रह्मणः प्राग्वत् ।

अनन्तस्य- ॐ नमोस्तुसर्प्पेब्भ्य इति तृचं सूक्तं प्राग्वत् ।

वस्वादीनाम्

वसुसूक्तम्- ॐ सुगावोदेवा इति प्रजापतिर्ऋषिर्वसवो देवतास्त्रिष्टुप्छन्दो वसूनां प्रीतये जपे विनियोगः । ॐ सुगावोदेवाःसदनाऽअकर्म्मयऽआज-ग्मेदꣳसवनञ्जुषाणाः । भरमाणावहमानाहवीꣳष्यस्म्मेधत्तवसवोव-सूनि।। (य.सं.अ. ८ मं. १८)।

आदित्यसूक्तम्- ॐ इमागिर इति गृत्समदऋषिरादित्यो देवता त्रिष्टुप्छन्द आदित्यप्रीतये जपे विनियोगः । ॐ इमागिरऽआदित्त्येब्भ्योघृतस्नूःसना-द्राजब्भ्योजुव्हाजुहोमि । शृणोतुमित्त्रोऽअर्य्यमाभगोनस्तुविजातोव-रुणोदक्षोऽअꣳशः ।। (य.सं.अ. ३४ मं. ५४)।

रुद्रसूक्तम्- रुद्रस्य रुद्राध्यायः प्राग्वत् ॥

मरुत्सूक्तम्- ॐ शुक्क्रज्ज्योतिश्श्चेत्यादि षडृचस्य मरुत्सूक्तस्य सप्तऋषय ऋषयो मरुतो देवता आद्यायाश्चतुर्थ्याश्चोष्णिक् छन्दः, द्वितीयायास्तृतीयायाश्च गायत्रीछन्दः, पञ्चम्या जगती छन्दः, षष्ठ्या गायत्र्युष्णिग्वा छन्दः मरुतां

pal Sanskrit University, Balmeeki Campus, Kathman

0. In Public Domain. Digitization by eGangotri.Funding: M

प्रीतये जपे विनियोगः । ॐ शुक्रज्ज्योतिश्श्चचित्रज्ज्योतिश्श्चसत्त्यज्ज्योतिश्श्चज्ज्योतिष्म्माँश्च । शुक्रश्श्चऽऋतपाश्श्चात्त्यꣳहाः ।।१।। ॐ ईदृङ्ङ्चान्न्यादृङ्ङ्चसदृङ्ङ्चप्प्रतिसदृङ्ङ्च । मितश्श्चसम्मितश्श्चसभराः ।।२।। ॐ ऋतश्श्चसत्त्यश्श्चद्ध्रुवश्श्चधरुणश्श्च । धर्त्ताचविधर्त्ताचविधारयः ।।३।। ॐ ऋतजिच्चसत्त्यजिच्चसेनजिच्चसुषेणश्श्च । अन्तिमित्रश्श्चदूरेऽअमित्रश्श्चगणः ।।४।। ॐ ईदृक्षासऽएतादृक्षासऽऊषुणःसदृक्षासःप्प्रतिसदृक्षासऽएतन । मितासश्श्चसम्मितासोनोऽअद्यसभरसोमरुतोयज्ञेऽअस्मिन् ।।५।। ॐ स्वतवाँश्चप्प्रघासीचसान्तपनश्श्च गृहमेधीचक्रीडीचशाकीचोज्जेषी ।।६।।(य.सं.अ. १७ मं. ८०-८५)।

ब्रह्मसूक्तम्- ब्रह्मणः ॐ आब्ब्रह्मन्ब्राह्मणोब्ब्रह्मवर्च्चसीजायतामाराष्ट्रेराजन्न्यः शूरऽइषव्व्योतिव्व्याधीमहारथोजायतान्दोग्ग्ध्रीधेनुर्व्वोढानड्डुवानाशुःसप्प्तिःपुरन्धिर्य्योषाजिष्णूरथेष्ठाःसभेयोयुवास्ययजमानस्यवीरोजायतान्निकामेनिकामेनःपर्ज्जन्न्योव्वर्षतुफलवत्त्योनऽओषधयःपच्च्यन्तांय्योगक्षेमोनःकल्प्पताम् ।।

विष्णुसूक्तम्- ॐ सहस्त्रशीर्षादि वैष्णवं प्राग्वत् ।

रुद्रसूक्तम्- रुद्राध्यायो रौद्रः प्राग्वत् ।

वनस्पतिसूक्तम्- ॐ व्वनस्प्पतेवीड्डुवङ्ग इति प्रजापतिर्ऋषिर्वनस्पतिर्देवता त्रिष्टुप्छन्दो वनस्पतिप्रीतये जपे विनियोगः । ॐ व्वनस्प्पतेवीड्डुवङ्गोहिभूयाऽअस्म्मत्त्सखाप्प्रतरणःसुवीरः । गोभिःसन्नद्धोऽअसिव्वीडयस्वास्त्थातातेजयतुजेत्त्वानि ।। (य.सं.अ. २९ मं. ५२)। इति जप्यसूक्तानि मन्त्राश्च।

उत्तराङ्गव्याहृत्यादिहोमः

व्याहृतिहोमः - तत उत्तराङ्गव्याहृतिहोमादिबर्हिर्होमान्तं पूर्णाहुतिप्राग्भाविकर्म कुर्यात् । तच्चैवम् ॐ भूर्भुवः स्वः इति महाव्याहृतीनां प्रजापतिर्ऋषि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

n Public Domain. Digitization by eGangotri.Funding

रग्निवायुसूर्या देवताः गायत्र्युष्णिगनुष्टुभश्छन्दांसि प्रायश्चित्तहोमे विनियोगः। ब्रह्मणान्वारब्धो जुहोति- **ॐ भूः स्वाहाः, इदमग्नये। ॐ भुवः स्वाहा, इदं वायवे। ॐ स्वः स्वाहा, इदं सूर्याय।**

पञ्चवारुणीहोमः- ॐ त्वन्नोऽअग्न इति वामदेवऋषिरग्नीवरुणौ देवते त्रिष्टुप्छन्दः सर्वप्रायश्चित्तहोमे विनियोगः। **ॐ त्वन्नोऽअग्नेवरुणस्यविद्वान्देवस्यहेडोऽअवयासिसीष्ठाः। यजिष्ठोवह्नितमःशोशुचानोविश्वाद्द्वेषाꣳसिप्रमुमुग्ध्यस्मत्॥** स्वाहा इदमग्नीवरुणाभ्याम्।

ॐ सत्त्वन्नोऽअग्न इति वामदेवऋषिरग्नीवरुणौ देवते त्रिष्टुप्छन्दः सर्वप्रायश्चित्तहोमे विनियोगः। **ॐ सत्त्वन्नोऽअग्नेवमोभवोतीनेदिष्ठोऽअस्याऽउषसोव्युष्टौ। अवयक्ष्वनोवरुणꣳरराणोवीहिमृडीकꣳसुहवोनऽएधि॥** स्वाहा इदमग्नीवरुणाभ्याम्।

ॐ अयाश्चाग्ने इति वामदेवऋषिरग्निर्देवता त्रिष्टुप्छन्दः(विराट्छन्दः) सर्वप्रायश्चित्तहोमे विनियोगः। **ॐ अयाश्चाग्नेस्यनभिशस्तिपाश्चसत्यमित्त्वमयाऽअसि। अयानोयज्ञंवहास्ययानोधेहिभेषजꣳस्वाहा॥** इदमग्नये।

ॐ येतेशतमिति वामदेवऋषिर्वरुणः सविता विष्णुर्विश्वेदेवा मरुतः स्वर्काश्च देवतास्त्रिष्टुप्छन्दः सर्वप्रायश्चित्तहोमे विनियोगः। **ॐ येतेशतंवरुणयेसहस्रंय्यज्ञियाःपाशाविततामहान्तः। तेभिर्नोऽअद्यसवितोतविष्णुर्विश्वेमुञ्चन्तुमरुतःस्वर्काःस्वाहा॥** इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च।

ॐ उदुत्तममिति शुनःशेपऋषिर्वरुणो देवता त्रिष्टुप्छन्दः सर्वप्रायश्चित्तहोमे विनियोगः। **ॐ उदुत्तमंवरुणपाशमस्मदवाधमंविमध्यमꣳश्रथाय। अथावयमादित्त्यव्रतेतवानागसोऽअदितयेस्याम॥** स्वाहा इदं वरुणाय।

ॐ प्रजापतये इति प्रजापतिर्ऋषिः प्रजापतिर्देवता त्रिष्टुप्छन्दः प्रायश्चित्तहोमे विनियोगः। **ॐ प्रजापतये स्वाहा, इदं प्रजापतये** इति मनसा॥

स्विष्टकृद्धोमःसंस्रवप्राशनञ्च- ॐ अग्नये स्विष्टकृते स्वाहा, इदमग्नये

pal Sanskrit University, Balmeeki Campus, Kathmar

0. In Public Domain. Digitization by eGangotri.Funding: M

स्विष्टकृते । ततः संस्रवप्राशनं कृत्वा (द्विः) आचम्य (स्वाहेति अग्नौ पवित्रप्रतिपत्तिं कुर्यात्) ।

पूर्णपात्रदानम्- ॐ अद्येहेत्यादिदेशकालौ स्मृत्वा कृतैतन्नवग्रहशान्तिकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्मप्रतिष्ठार्थमिदं पूर्णपात्रं प्रजापतिदैवतं ब्रह्मणे तुभ्यमहं सम्प्रददे । इति पूर्णपात्रं ब्रह्मणे दद्यात् ।

प्रणीताविमोकः- सपवित्रप्रणीताजलेन- **ॐ सुमित्रियानऽआपऽओषधयः- सन्तु** ।। इति यजमानस्य शिरोऽभिषिञ्चेत् **ॐ दुर्म्मित्रियास्तस्मैसन्तुयो- स्म्मान्द्वेष्टियञ्च वयन्द्विष्म्मः** । इति सपवित्रप्रणीतापात्रमैशान्यां न्युब्जीकुर्यात्।

बर्हिर्होमः - ततस्तरणक्रमेण बर्हिरुत्थाप्याज्येनाभिघार्य - **ॐ देवागातु** इत्यस्य मनसस्पतिर्ऋषिर्विराट् छन्दो वातो देवता बर्हिर्होमे विनियोगः । **ॐ देवागातुविदोगातुंवित्त्वागातुमित । मनसस्प्पतऽइमन्देवयज्ञꣳस्वाहा- व्वातेधाः** ।। स्वाहा इति बर्हींषि हस्तेन जुहुयात् ।

क्षेत्रपालमहाबलिः- महाबलिं कुङ्कुमादियुतं सरक्तवस्त्रदीपं सदक्षिणं क्षेत्रपालाय दद्यात् । तत्र वाक्यम्- ॐ क्षेत्रपालाय भूतप्रेतपिशाचराक्षसशा- किनीडाकिनीवेतालादिपरिवारयुताय इमं बलिं समर्पयामि, भो भो क्षेत्रपाल इमं बलिं गृहाण मम यजमानस्य आयुष्कर्ता क्षेमकर्ता शान्तिदस्तुष्टिदो भव । इति तं बलिं शूद्रेण दुर्ब्राह्मणेन वा चतुष्पथे क्षिपेत् । तत आचार्यः प्रक्षालितपाणिपाद आचामेत् ।

मङ्गलाभिषेकः- आचार्यादयो ब्राह्मणाः प्राङ्मुखा उदङ्मुखा वा ग्रहवेद्या ईशाने स्थापितशान्तिकलशजलेन (यजमानस्य) मङ्गलाभिषेकं कुर्युः । तत्र पौराणिका मन्त्राः -

ॐ सुरास्त्वामभिषिञ्चन्तु ब्रह्मविष्णुमहेश्वराः ।
वासुदेवो जगन्नाथस्तथा सङ्कर्षणो विभुः ।।१।।
प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयाय ते ।
आखण्डलोऽग्निर्भगवान् यमो वै निर्ऋतिस्तथा ।।२।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

n Public Domain. Digitization by eGangotri.Funding

वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः ।
ब्रह्मणा सहितः शेषो दिक्पालाः पान्तु ते सदा ।।३।।
कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः ।
बुद्धिर्लज्जा वपुः शान्तिस्तुष्टिः कान्तिश्च मातरः ।।४।।
एतास्त्वामभिषिञ्चन्तु देवपत्न्यः समागताः ।
आदित्यश्चन्द्रमा भौमो बुधजीवसितार्कजाः ।।५।।
ग्रहास्त्वामभिषिञ्चन्तु राहुः केतुश्च तर्पिताः ।
देवदानवगन्धर्वा यक्षराक्षसपन्नगाः ।।६।।
ऋषयो मनवो गावो देवमातर एव च ।
देवपत्न्यो द्रुमा नागा दैत्याश्चाप्सरसां गणाः ।।७।।
अस्त्राणि सर्वशस्त्राणि राजानो वाहनानि च ।
औषधानि च रत्नानि कालस्यावयवाश्च ये ।।८।।
सरितः सागराः शैलास्तीर्थानि जलदा नदाः ।
एते त्वामभिषिञ्चन्तु सर्वकामार्थसिद्धये ।।९।।

वैदिकमन्त्राः - ॐ देवस्यत्त्वासवितुःप्प्रसवेश्श्विनोर्ब्बाहुब्भ्याम्पूष्णोहस्ताब्भ्याम् । सरस्वत्त्यैवाचोयन्तुर्य्यन्त्रेणाग्ग्रेःसाम्म्राज्ज्येनाभिषिञ्चामि ।।१।। देवस्यत्त्वासवितुःप्प्रसवेश्श्विनोर्ब्बाहुब्भ्याम्पूष्णोहस्ताब्भ्याम्। सरस्वत्त्यैभैषज्ज्येनव्वीर्य्यायान्नाद्यायाभिषिञ्चामि।।२।। देवस्यत्त्वासवितुःप्प्रसवेश्श्विनोर्ब्बाहुब्भ्याम्पूष्णोहस्ताब्भ्याम् । अश्श्विनोर्ब्भैषज्ज्येनतेजसेब्ब्रह्मवर्च्चसायाभिषिञ्चामिसरस्वत्त्यैभैषज्ज्येनव्वीर्य्यायान्नाद्यायाभिषिञ्चामीन्द्रस्येन्द्रियेणबलायश्श्रियैयशसेभिषिञ्चामि ।।३।। कोसिकतमोसिकस्म्मैत्त्वाकायत्त्वा। सुश्श्लोकसुमङ्गलसत्त्यराजन् ।।४।। शिरोमेश्श्रीर्य्यशोमुखन्त्विषिःकेशाश्श्चश्मश्श्रूणि । राजामेप्प्राणोऽअमृतꣳसम्म्राट्चक्षुर्व्विराट्श्रोत्रम् ।।५।। जिह्वामेभद्द्रंवाङ्महोमनोमन्न्युःस्वराड्भामः । मोदाःप्प्रमोदाऽअङ्गुलीरङ्गानिमित्त्रम्मेसहः ।।६।। बाहूमेबलमिन्द्रियꣳहस्त्तौमेकर्म्मवीर्य्यम् । आत्त्माक्षत्रमुरोमम ।।७।। पृष्ठीर्म्मेराष्ट्रमुदरमꣳसौग्ग्रीवाश्श्चश्श्रोणी । ऊरूऽअरत्त्नीजानुनीविशो-

bal Sanskrit University, Balmeeki Campus, Kathmar

0. In Public Domain. Digitization by eGangotri.Funding: M

मेङ्गानिसर्वतः ।।८।। नाभिर्म्मेचित्तंविज्ञानम्पायुर्म्मेपचितिर्ब्भसत् । आनन्दनन्दावाण्डौमेभगःसौभाग्ग्यम्पसः । जङ्ङ्घाब्भ्याम्पद्भ्यान्धर्म्मोस्मिविशिराजाप्प्रतिष्ठितः ।।९।। प्रतिक्षत्त्रेप्प्रतितिष्ठामिराष्ट्रेप्प्रत्त्यश्श्वेषुप्प्रतितिष्ठामिगोषु । प्रत्यङ्गेषुप्रतितिष्ठाम्म्यात्म्मन्प्रतिप्प्राणेषुप्प्रतितिष्ठामिपुष्टेप्प्रतिद्यावापृथिव्व्योःप्रतितिष्ठामियज्ञे ।।१०।। त्रयादेवाऽएकादशत्रयस्त्रिꣳशासुराधसः । बृहस्प्पतिपुरोहितादेवस्यसवितुःसवे । देवादेवैरवन्तुमा ।।११।। प्रथमाद्द्वितीयैर्द्द्वितीयास्तृतीयैस्तृतीयाःसत्त्येनसत्त्यंय्यज्ञेनयज्ञोयजुब्र्भिर्य्यजूꣳषिसामभिःसामान्यृग्भिर्ऋचःपुरोनुवाक्याभिःपुरोनुवाक्क्यायाज्ज्याभिर्य्याज्ज्यावषट्कारैर्व्वषट्काराऽआहुतिभिराहुतयोमेकामान्त्समर्द्धयन्तुभूःस्वाहा ।।१२।। द्यौः शान्तिरन्तरिक्षꣳशान्तिःपृथिवीशान्तिरापःशान्तिरोषधयःशान्तिः । वनस्प्पतयःशान्तिर्व्विश्श्वेदेवाःशान्तिर्ब्ब्रह्मशान्तिःसर्व्वꣳशान्तिःशान्तिरेवशान्तिःसामाशान्तिरेधि ।।१३।। तच्चक्षुर्द्देवहितम्पुरस्ताच्छुक्क्रमुच्चरत् । पश्येमशरदःशतञ्जीवेमशरदःशतꣳशृणुयामशरदःशतम्प्रब्ब्रवामशरदःशतमदीनाःस्यामशरदःशतम्भूयश्श्चशरदःशतात् ।।१४।। स्वस्तिनऽइन्द्रोवृद्धश्श्रवाःस्वस्तिनःपूषाविश्श्ववेदाः। स्वस्तिनस्ताक्क्ष्योऽअरिष्टनेमिःस्वस्तिनोबृहस्प्पतिर्द्दधातु ।।१५।। विश्श्वानिदेवसवितर्द्दुरितानिपरासुव । यद्भद्रन्तन्नऽआसुव ।।१६।।

शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके ।
घण्टास्वनेन नः पाहि चापज्यानिःस्वनेन च ।।१।।
प्राच्यां रक्ष प्रतीच्यां च चण्डिके रक्ष दक्षिणे ।
भ्रामणेनात्मशूलस्य उत्तरस्यां तथेश्वरि ।।२।।
सौम्यानि यानि रूपाणि त्रैलोक्ये विचरन्ति ते ।
यानि चात्यन्तघोराणि तैरक्षास्माँस्तथा भुवम् ।।३।।
खड्गशूलगदादीनि यानि चास्त्राणि चाम्बिके ।
करपल्लवसङ्गीनि तैरस्मान् रक्ष सर्वतः ।।४।।
ॐ शान्तिः शान्तिः शान्तिः सुशान्तिर्भवतु । इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

n Public Domain. Digitization by eGangotri.Funding

नवग्रहदक्षिणा

एवमाचार्यादिभिरभिषिक्तो यजमानः प्राङ्मुख उपविष्ट उदङ्मुखेभ्य आचार्यर्त्त्विग्भ्यो दक्षिणां दद्यात् ।

सूर्यदक्षिणा- तत्र प्रथमं सूर्यप्रीतये कपिलां गां दद्यात् । देयब्राह्मणं त्रिःसंपूज्य देयं कुशजलेन प्रोक्ष्य कुशयवतिलजलान्यादाय- ॐ अद्येहेत्यादि-देशकालौ स्मृत्वा कृतैतन्नवग्रहयज्ञप्रतिष्ठार्थमिमां कपिलां (धेनुं) गां रुद्रदैवतां सूर्यप्रीतयेऽमुकगोत्रायामुकशर्मणे ब्राह्मणाय दक्षिणां तुभ्यमहं संप्रददे ।

ॐ कपिले सर्वदेवानां पूजनीयासि रोहिणि ।
तीर्थदेवमयी यस्मादतः शान्तिं प्रयच्छ मे ।।

इत्युक्त्वा ब्राह्मणहस्ते जलं दद्यात् । ब्राह्मणश्च **ॐ स्वस्ति** इत्युक्त्वा स्वशाखोक्तां कामस्तुतिं पठेत् ।

सोमदक्षिणा- ततोऽनेनैव प्रकारेण देवताभिधानपुरःसरं सोमाय समुद्रदैवतं शङ्खं दद्यात् ।

प्रार्थना- **ॐ पुण्यस्त्वं शङ्ख पुण्यानां मङ्गलानां च मङ्गलम् ।**
विष्णुना विधृतो नित्यमतः शान्तिं प्रयच्छ मे ।।२।।

भौमदक्षिणा- भौमाय पूर्ववत् सङ्कल्पं कृत्वा रुद्रदैवतं वृषभं दद्यात् ।

प्रार्थना- **ॐ धर्मस्त्वं वृषरूपेण जगदानन्दकारकः ।**
अष्टमूर्तेरधिष्ठानमतः शान्तिं प्रयच्छ मे ।।३।।

बुधदक्षिणा- पूर्ववत् सङ्कल्पं कृत्वा बुधायाग्निदैवतं हिरण्यं दद्यात् ।

प्रार्थना- **ॐ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ।**
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ।।४।।

बृहस्पतिदक्षिणा- बृहस्पतये बृहस्पतिदैवतं पीतवस्त्रयुग्मं दद्यात् ।

प्रार्थना- **ॐ पीतवस्त्रयुगं यस्माद्वासुदेवस्य वल्लभम् ।**
प्रदानात् तस्य मे विष्णुरतः शान्तिं प्रयच्छतु ।।

pal Sanskrit University, Balmeeki Campus, Kathman

0. In Public Domain. Digitization by eGangotri.Funding: M

शुक्रदक्षिणा - शुक्राय यमदैवतं श्वेताश्वन्दद्यात् ।

प्रार्थना- **विष्णुस्त्वमश्वरूपेण यस्मादमृतसंभवः ।**
चन्द्रार्कवाहनो नित्यमतः शान्तिं प्रयच्छ मे ।।६।।

शनिदक्षिणा- शनैश्चराय रुद्रदैवतां कृष्णां गां दद्यात् ।

प्रार्थना- **ॐ यस्मात्त्वं पृथिवी सर्वा धेनो केशवसंभवा ।**
सर्वपापहरा नित्यमतः शान्तिं प्रयच्छ मे ।।७।।

राहुदक्षिणा- राहवे भैरवदैवतं लोहं दद्यात् ।

यस्मादायसकर्माणि त्वदधीनानि सर्वदा ।
लाङ्गलच्छुरिकादीनि अतः शान्तिं प्रयच्छ मे ।।८।।

केतुदक्षिणा- केतुभ्योऽग्निदैवतं छागं दद्यात् ।

प्रार्थना- **ॐ यस्मात्त्वं छाग यज्ञानामङ्गत्वेन व्यवस्थितः ।**
यानं विभावसोर्नित्यमतः शान्तिं प्रयच्छ मे ।।९।।

इति नवग्रहाणां दक्षिणाः ।

दक्षिणाविमर्शः

सर्वाश्च दक्षिणाः सूर्यदक्षिणासमाना ज्ञातव्याः । तेन सोमाय शङ्खं दत्त्वा शङ्खमूल्यन्यूनं कपिलागवीमूल्यं तदानीमेव दद्यात् । एवं न्यूनस्थले सर्वत्र सूर्यदक्षिणासमा दक्षिणा कार्या । यथोक्तदक्षिणाऽलाभे आदित्यादिभ्यः सर्वेभ्यो ग्रहेभ्यः स्वर्णभूषितामेकैकां गां वा समानं सुवर्णमेव वा दक्षिणां दद्यात् । तत्र प्रमाणवचनानि -

सूर्यस्यैव समा कार्या यजमानेन दक्षिणा ।
सर्वेषामेव वा गावो दातव्या हेमभूषिताः ।।१।।
सुवर्णमथवा दद्याद् गुरुर्वा येन तुष्यति ।
स्वस्वमन्त्रैः प्रदातव्याः सर्वाः सर्वत्र दक्षिणाः ॥२॥ इति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

n Public Domain. Digitization by eGangotri.Funding

भूयसी दक्षिणा- ॐ अद्येत्यादि अमुककर्माङ्गभूतग्रहमखकर्मणः प्रतिष्ठार्थमादित्यादिनवग्रहाणां प्रीतये इमां भूयसीं दक्षिणां नानावेदाध्यायिभ्यो नानागोत्रेभ्यो नानाशर्मभ्यो ब्राह्मणेभ्यो दीनानाथेभ्यश्च यथायोग्यभागं विभज्य दातुमहमुत्सृजे इति भूयसीं दक्षिणां दद्यात् ।

ब्राह्मणभोजनम्- ततः पूर्वोक्तहोमसङ्ख्यया यथाशक्ति वा ब्राह्मणभोजनं सङ्कल्पयेत् । तत्र वाक्यम्- अद्येहेत्यादि आदित्यादि नवग्रहाणां प्रीत्यर्थ नानावेदाध्यायिनो नानागोत्रान् नानाशर्मणो ब्राह्मणान् यथोपपन्नेनान्नेन यथाकालं भोजयिष्ये, आमान्नपक्षे यथोपपन्नेनामान्नेन तोषयिष्ये ।। इति ।

पूर्णाहूतिः- होता- ॐ अद्येहेत्यादि कृतस्य नवग्रहशान्तिहोमकर्मणः परिपूर्णतासिद्ध्यर्थं पूर्णाहुतिहोमं करिष्ये, इति संकल्प्य घृतपूर्णस्रुवे नारिकेलादिफलचन्दनपुष्पयुतं वस्त्रं निधाय यजमानान्वारब्धः पूर्णाहुतिं जुहुयात् । तत्र मन्त्राः- ॐ समुद्रादूर्म्मिर्म्मधुमाँ२।।ऽउदारदुपाꣳशुनासममृतत्त्वमानट्। घृतस्यनामगुह्यंय्यदस्तिजिह्वादेवानाममृतस्यनाभिः।।१।। ॐ व्वयन्नामप्रब्ब्रवामाघृतस्यास्मिन्यज्ञेधारयामानमोभिः । उपब्ब्रह्माशृणवच्छस्यमानञ्चतुःशृङ्गोवमीद्गौरऽएतत् ।।२।। ॐ चत्त्वारिशृङ्गात्रयोऽअस्यपादाद्द्वेशीर्षेसप्प्तहस्तासोऽअस्य । त्रिधाबद्धोवृषभोरोरवीतिमहोदेवोमर्त्त्याँ२।।ऽआविवेश ।।३।। ॐ मूर्द्धानन्दिवोऽअरतिम्पृथिव्यावैश्श्वानरमृतऽआजातमग्ग्निम् । कविꣳसम्म्राजमतिथिञ्जनानामासन्नापात्रञ्जनयन्तदेवाः ।।४।। ॐ पुनस्त्त्वादित्त्यारुद्द्रावसवःसमिन्धताम्पुनर्ब्ब्रह्माणोवसुनीथयज्ञैः । घृतेनत्त्वन्तन्न्वंवर्द्धयस्वसत्त्याःसन्तुयजमानस्यकामाः ।।५।। ॐ पूर्णादर्व्विपरापतसुपूर्णापुनरापत । व्वस्नेवविक्क्रीणावहाऽइषमूर्ज्जꣳशतक्क्रतो ।।६।। ॐ सप्प्ततेऽअग्ग्नेसमिधःसप्प्तजिह्वाःसप्प्तऽऋषयःसप्प्तधामप्प्रियाणि । सप्प्तहोत्राःसप्प्तधात्त्वायजन्तिसप्प्तयोनीरापृणस्वघृतेनस्वाहा ।।७।। ॐ धामन्तेविश्श्वम्भुवनमधिश्श्रितमन्तःसमुद्द्रेहृद्यन्तरायुषि । अपामनीकेसमिथेयऽआभृतस्त्तमश्यामममधुमन्तन्तऽऊर्म्मिम् ।।८।। इति सर्वमन्त्रपाठान्ते स्वाहा-

bal Sanskrit University, Balmeeki Campus, Kathman

0. In Public Domain. Digitization by eGangotri.Funding: M

कारेणाग्नौ प्रक्षिपेत् । पूर्णाहुतिमुत्तमां जुहोति इति ब्राह्मणा ब्रूयुः ।

त्र्यायुषकरणम्- होता वह्निं पुष्पचन्दनादिभिः संपूज्य स्रुवेण किञ्चिद्भस्म गृहीत्वा **ॐ त्र्यायुषञ्जमदग्नेः०** इति मन्त्रेण यजमानस्य ललाटे तिलकं कुर्यात् । **ॐ कश्यपस्य त्र्यायुषम्०** इति ग्रीवायाम्, **ॐ यद्देवेषु त्र्यायुषम्०** इति दक्षिणबाहुमूले, **ॐ तत्तेऽअस्तु त्र्यायुषम्०** इति हृदि तिलकं कुर्यात्।

देवताविसर्जनम्- यजमानः पुनः पुण्याहवाचनं कृत्वा गन्धपुष्पादिभिरुपचारै-रावाहितदेवताः प्रत्येकं युगपद्वा पूजयित्वा प्रणमेत्। ततो यजमानो गुरुर्वा-
ॐ उत्तिष्ठब्ब्रह्मणस्प्पतेदेवयन्तस्त्वेमहे । उपप्प्रयन्तुमरुतःसुदानवऽ-इन्द्रप्प्राशूर्ब्भवासचा ।।

ॐ यान्तु देवगणाः सर्वे पूजामादाय पार्थिवीम् ।
इष्टकामप्रसिद्ध्यर्थं पुनरागमनाय च ।।

इति च पठित्वा अक्षतप्रक्षेपेण पीठदेवता विसर्जयेत् ।

घृतच्छाया- यजमानो रौप्ये कांस्ये ताम्रे वा पात्रे घृतं दूर्वां द्रव्यञ्च निधाय **तेजोसीत्यादि** पठन् छायां निरीक्षेत् । **ॐ तेजोसिशुक्क्रममृतमायुष्प्पाऽ-आयुर्म्मेपाहि । देवस्यत्त्वासवितुःप्प्रसवेश्श्विनोर्ब्बाहुब्भ्याम्पूष्णोहस्ता-भ्यामाददे ।।१।। ॐ ध्रुवासिद्ध्रुवोयंय्यजमानोस्म्मिनायतनेप्प्रजयापशु-भिर्ब्भूयात् । घृतेनद्यावापृथिवीपूर्य्येथामिन्द्रस्यच्छदिरसिव्विश्श्वजनस्य-च्छाया ।।२।।** तत आज्यादिस्पर्शपूर्वकं प्रार्थनां कुर्यात् ।

आज्यप्रार्थना- **ॐ अलक्ष्मीर्यच्च दौस्थ्यं मे सर्वगात्रेष्ववस्थितम् ।**
तत्सर्वं शमयाज्य त्वं लक्ष्मीं पुष्टिञ्च वर्द्धय ।।१।।
ॐ आज्यं तेजः समुद्दिष्टमाज्यं पापहरं शुभम् ।
आज्यं सुराणामाहार आज्ये लोकाः प्रतिष्ठिताः ।।२।।
भौमान्तरिक्षं दिव्यं वा यन्मे कल्मषमागतम् ।
सर्वं तदाज्यसंस्पर्शात्प्रणाशमुपगच्छतु ।।३।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

n Public Domain. Digitization by eGangotri.Funding

दूर्वाप्रार्थना- **ॐ काण्डात्काण्डात्प्ररोहन्तीपरुषःपरुषस्परि । एवानो-दूर्वेप्प्रतनुसहस्त्रेणशतेन च ।।**

ॐ या क्षीरसागरोत्पन्ना दूर्वा पीयूषसंभवा ।
तत्संस्पर्शनमात्रेण ह्यायुर्वृद्धिर्यशोबलम् ।। इति ।

आज्यपात्रदानम्- ततः कुशादिसहिततदवलोकिताज्यपात्रमादाय- ॐ अद्येत्यादि मम दुःस्वप्नदुर्निमित्तादिसर्वारिष्टोपशमनपूर्वकं तेजःप्रज्ञाशौर्य-यशोबलायुर्लक्ष्मीपुष्टिवर्द्धनार्थमिदं रौप्यकाँस्यताम्रान्यतमपात्रस्थितमाज्यं मृत्युञ्जयदैवतं मृत्युञ्जयप्रीतये अमुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे इति ब्राह्मणाय दद्यात् ।

प्रार्थना- **ॐ कामधेनोः समुद्भूतं देवानामुत्तमं हविः ।**
आयुर्वृद्धिकरं दातुराज्यं पातु सदैव माम् ।।

ॐ त्र्यम्बकंय्यजामहे० इति मन्त्रेण मृत्युञ्जयं प्रार्थयेत् । ब्राह्मणश्च स्वस्तीति गृहीत्वा आशिषं दद्यात् ।

यज्ञोपकरणदानम्- यजमानः कुशादीन्यादाय इदं मण्डलाद्युपकरणमाचार्याय प्रतिपादयामीति प्रतिपत्तिरूपं दानं कुर्यात् (निष्क्रेतव्यानि निष्क्रीणीयात्)।

अच्छिद्रवाचनम्- **ॐ प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् ।**
स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति श्रुतिः ।।

इत्युक्त्वा **ॐ विष्णुः विष्णुः विष्णुः**, इति त्रिर्विष्णुं स्मृत्वाञ्जलिं बध्वा ब्राह्मणान् प्रार्थयेत् ।

मया यत्कृतं ग्रहशान्तिरूपं कर्म तन्न्यूनातिरिक्तं युष्मद्वचनात् **सर्वं परिपूर्णमस्तु** इति, ते च ब्रूयुः - **अस्तु परिपूर्णम्** ।

यस्य स्मृत्या० चतुर्भिश्च० इत्यादि पठेत् ।

कर्मब्रह्मार्पणम्- कायेन वाचा० इति पठित्वा- अनेन यथाशक्तियथाज्ञान-कृतेन नवग्रहमखकर्मणा श्रीपरमेश्वरः प्रीयताम् । **ॐ तत्सद् ब्रह्मार्पणमस्तु**

pal Sanskrit University, Balmeeki Campus, Kathman

0. In Public Domain. Digitization by eGangotri.Funding: M

इति जलेन कर्म ब्रह्मार्पणं कुर्यात् । ततो ब्राह्मणा यजमानाय मन्त्राशिषो दद्युः ।

मन्त्राशीर्वादप्रदानम्

ॐ आब्ब्रह्मन्ब्राह्मणोब्ब्रह्मवर्च्चसीजायतामाराष्ट्रेराजन्यःशूरऽइषव्योतिव्याधीमहारथोजायतान्दोग्ध्रीधेनुर्वोढानड्वानाशुःसप्तिः-. पुरन्धिर्य्योषाजिष्णूरथेष्ठाःसभेयोयुवास्ययजमानस्यवीरोजायतान्निकामेनिकामेनःपर्ज्जन्न्योवर्षतुफलवत्त्योनऽओषधयःपच्च्यन्तांय्योगक्षेमोनः-कल्प्यताम् ।।१।। (य.सं.अ. २२-२२)।

ॐ दीर्घायुस्त्तऽओषधेखनितायस्मैचत्त्वाखनाम्म्यहम् । अथोत्त्वन्दीर्घायुर्भूत्त्वाशतवल्शाविरोहतात् ।।२।। (य.सं.अ.१२ मं. १००)।

ॐ पुनस्त्त्वादित्त्यारुद्रावसवःसमिन्धताम्पुनर्ब्रह्माणोवसुनीथयज्ञैः । घृतेनत्त्वन्तन्न्वंवर्द्धयस्वसत्त्याःसन्तुयजमानस्यकामाः ।।३।। (य.सं.अ. १२ मं. ४४)।

ॐ मनसःकाममाकूतिंवाचःसत्त्यमशीमहि । पशूनाꣳरूपमन्नस्यरसोयशःश्रीःश्रयताम्मयि ।।४।। (य.सं.अ. ३९ मं. ४) ।

ॐ आयुष्यंवर्चस्यꣳरायस्पोषमौद्भिदम् । इदꣳहिरण्यंवर्च्चस्वज्जैत्रायाविशतादुमाम् ।।५।। (य.सं.अ. ३४ मं. ५०)

ॐ नतद्रक्षाꣳसिनपिशाचास्तरन्तिदेवानामोजःप्प्रथमजꣳह्येतत्। योबिभर्त्तिदाक्षायणꣳहिरण्यꣳसदेवेषुकृणुतेदीर्घमायुःसमनुष्ष्येषुकृणुतेदीर्घमायुः ।।६।। (य.सं.अ. ३४ मं. ५१)।

ॐ श्रीर्वर्चस्वमायुष्यमारोग्यमाविधात्पवमानंमहीयते । धान्यंधनंपशून्बहुपुत्रलाभंशतंसंवत्सरंदीर्घमायुः ।।७।। (श्रीसूक्ते)

ॐ शतञ्जीवशरदोवर्धमानःशतंहेमन्ताञ्छतमुवसन्तान् । शतमिन्द्राग्नीसविताबृहस्पतिःशतायुषाहविषेमंपुनर्दुः ।।८।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

n Public Domain. Digitization by eGangotri.Funding

ॐ भद्रमस्तु शिवं चास्तु महालक्ष्मीः प्रसीदतु ।
रक्षन्तु त्वां सदा देवा आशिषः सन्तु सर्वदा ।।

इति तिलकमक्षतारोपणञ्च कुर्यात् ।

रक्षाबन्धनम्- ॐ येन बद्धो बली राजा दानवेन्द्रो महाबलः ।
तेन त्वां प्रतिबध्नामि रक्षे मा चल मा चल ।।

ॐ त्वंय्यविष्ठदाशुषोनॄँःपाहिशृणुधीगिरः । रक्षातोकमुतत्क्मना।।

इति मन्त्राभ्यां रक्षासूत्रं बध्नीयात् ।

इति ब्राह्मणेभ्यो मन्त्राशिषो गृहीत्वा यजमानस्तान् भोजयित्वा सानुनयं विसृज्य सुहृन्मित्रादियुतः सोत्साहो भुञ्जीत ।

— इति ग्रहशान्तिविधिः —

23699

pal Sanskrit University, Balmeeki Campus, Kathman